
TRIVANDRUM SANSKRIT SERIES.
No. XCIX.

Śrî Setu Laksmî Prasâdamâlâ.

No. XI.



THE

MÎMÂMSÀŚLOKAVÂRTIKA

WITH

THE COMMENTARY KĀŚIKĀ

OF

SUCARITAMIŚRA

EDITED BY

K. SÂMBAŚIVA ŚÂSTRÍ,

Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.

Part II.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HER HIGHNESS THE MAHARANI REGENT OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.
1929.

(*All Rights Reserved.*)

PREFACE.

This is the second part of the Kāśika, a commentary by Upādhyāya Sucarita Miśra on the Mīmāmsā ślokavārtika, and contains Nirālambana vāda and Śūnya vāda of the Autpattikasūtra. The printing of this part was delayed for want of sufficient manuscript materials; but fortunately, after the first three formes were struck off, a better manuscript was discovered at the library of Brahmasri Idappalli Subrahmanya Valiya Raja. This manuscript marked ख, about three centuries old, ran up to the end of Śūnya vāda and also contained at the end Śabdanityatādhikaraṇa and Vedapratyāyakatādhikaraṇa. The first three formes already struck contained some lacunae and the portions filling them as found in the new manuscript are separately printed and prefixed to the work. The department had already collected a manuscript about four centuries old from the library of the Raja of Kilimanur, and it may be mentioned here that it was this ancient manuscript marked क that prompted us to undertake the edition of the work.

Trivandrum,
24-12-1104,

K. SĀMBAŚIVA ŚĀSTRI.

निवेदना ।

अयम् उपाध्यायसुचरितमिश्रकृतायाः काशिकाख्यायाः मीमांसा-श्लोकवार्त्तिकव्याख्याया द्वितीयो भागः, यत्रौत्पत्तिकसूत्रे शून्यवादान्तो विषयः संघटितः । अस्य भागस्य प्रसाधने समुपक्रान्तेऽपि यत्सत्यं परिशुद्धं मातृकान्तरमनुपलभमानैरस्माभिर्मनागिवोदासि । अथ दैवादनुकूलात् कृतभूरिपरिश्रमाणामस्माकं किमपि चक्षुषीव प्रभातं मातृकान्तरमेकमुपलब्धं, यद् इडप्पल्लि-सुब्रह्मण्यवलियराजस्वामिकम् आदितोऽनुक्रमशः शून्यवादान्तेन भागेनान्तं शब्दनित्यतावेदप्रत्यायकताधिकरणाभ्यां च सनाथं स्व संज्ञितं त्रिशतवर्षवृद्धम् । अतश्च मातृकान्तराद् यथायथं समुद्धृतैर्भागैस्तत्र तत्र कासुचित् पङ्क्तिषु संमुद्रितचरीषु दृष्टाः खिला भागाः प्रपूरिताः । एतदर्थं कापि लघ्वी पट्टिकापि साकमनेन समायोजि । क-संज्ञा कापि मातृका प्रागेवास्मदधिकरणे सम्पादिता किळिमानूरराजसम्बन्धिनी माकीं चतुःशतवत्सरीवृद्धा निकाममस्माकं प्रथममूलं स्वमिति सुतरामादराभिनन्दनयोः स्थानम् ।

अनन्तशयनम्,
२४-१२-१९४.

के. साम्बशिवशास्त्री.

श्री

श्रीपद्मनाभसेवि-
न्यखिलश्रीवर्धनी महाराज्ञी ।
श्रीसेतुलक्ष्म्यभिख्या
प्रत्यक्षा जयति वश्चिभूलक्ष्मीः ॥

ग्रन्थावलिरियमिन्धे
प्रसाधिता तत्प्रसादगुणगुम्फा ।
श्रीसहितसेतुलक्ष्मी-
प्रसादमाला सुवर्णमणिचित्रा ॥

विषयानुक्रमणी ।

विषयः.	पृष्ठम्.
औत्पत्तिकसूत्रम् ॥ ५ ॥	
धर्मस्य प्रत्यक्षाद्यगम्यत्वेऽपि अभावगम्यत्वमाश्रित्य तन्निरसनपरतयौत्पत्तिकसूत्रमवतारितं भाष्ये, तद्ध्याप्यस्य धर्मे चोदनैव मानमित्यवधारणस्य चाक्षेपः ।	१
धर्माधर्मयोर्लोकप्रसिद्धिप्रदर्शनम् ।	२
पूर्वोक्ताक्षेपस्य समाधानम् ।	,,
प्रसिद्धेरार्यम्लेच्छविभागेनाव्यवस्थितत्वेन 'शास्त्रस्था वा तन्निमित्तत्वात्' इति न्यायाच्छास्त्रमूलकप्रसिद्धेरेव प्रामाण्यम् ।	३
सकलभावप्रमाणनिराकरणादभावनिराकरणाच्च धर्माधर्मयोश्चोदनैव प्रमाणमित्यवधारणस्योपपन्नत्वप्रदर्शनम् ।	,,
सूत्रस्थोपदेशपदस्य योग्यपदान्वयप्रदर्शनम् ।	४
उपदेशस्य धर्मे प्रामाण्यप्रकारप्रदर्शनम् ।	,,
'चार्थेऽनुपलब्धे' इति सूत्रांशस्य विमर्शः ।	,,
चोदना, विधिः, उपदेशः, इत्येषामेकार्थवाचित्वकथनम् ।	५
शब्दविशेषस्य विधेरेव धर्मे प्रमाणत्वेनाश्रयणे चोद्यम् ।	,,
विधिं विना यागादीनां पुरुषार्थसाधनत्वानवगतेस्तस्यैव प्रामाण्याश्रयणमिति परिहारः ।	६
कृतिविधौ पुरुषार्थस्य साध्यत्वसिद्धिप्रदर्शनम् ।	७
विधिः शब्दभेदो लिङादिस्तव्यापारातिशयो वा कोऽपि तदर्थभेदो वास्तु, सर्वथा कार्यविधौ पुरुषार्थस्य साध्यतालाभो न युक्त इत्याक्षेपः ।	,,
अस्मिन् विषये मतान्तरोपन्यासः ।	८
नियोगविचारः ।	९
अत्रानुपपत्तिप्रदर्शनम् ।	१०
अत्र ग्रन्थकर्तुरभिप्रायवर्णनम् ।	११

विषयः.	पृष्ठम्.
यथावार्त्तिकमनुसन्धाय निष्कर्षः ।	१३
'अनपेक्षत्वात्' इति सूत्रांशव्याख्यानम् ।	१६
वृत्तिकारग्रन्थः ।	
'वृत्तिकारस्त्वन्यथेमं ग्रन्थं वर्णयाञ्चकार तस्य निमित्तपरीष्टिमित्येवमादिम्' इति 'एवमादि' इति च पाठद्वये साध्वसाधुविवेचनम् ।	,,
वृत्तिकारमतरीत्या 'तस्य निमित्तपरीष्टिः' इत्यत्र नञोऽध्याहारकथनम् ।	,,
सङ्करात् परिचोदनेत्युक्तस्य प्रपञ्चनम् ।	१७
भाष्यमुपादाय सत्प्रत्यक्षस्वरूपदर्शनेन निमित्तसूत्रकृतापरीक्षाप्रतिज्ञायाः प्रत्यक्षसूत्रे उपसंहार इति कथनम् ।	,,
अयथार्थज्ञानविषयो विचारः ।	,,
तत्सत्पदयोर्व्यत्ययकरणेन सूत्रस्य सम्पूर्णलक्षणपरत्ववर्णनम् ।	२०
ईदृशं प्रत्यक्षमिति कथनेनानीदृशं प्रत्यक्षाभासमिति लाभात् तयोर्विवेकप्रदर्शनस्य शक्यत्वम् ।	२१
पूर्वोत्तरयोर्ज्ञानयोर्बाध्यबाधकभावे नियामकवर्णनम् ।	,,
बाधादृते न मिथ्यात्वं मिथ्यात्वाधीनो बाध इतीतरेतराश्रयत्वमाशङ्क्य तत्परिहारेण विषयभेदप्रदर्शनेन बहुधा बाधाबाधव्यवस्थापनम् ।	,,
'यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः' इति भेदेनोपन्यासस्य विषयप्रदर्शनम् ।	२३
निरालम्बनवादः ।	
चोद्यपरिहारपूर्वकं भाष्यकारकृतस्य बाह्यार्थसद्भावसाधनस्य मीमांसाशास्त्रीययावदर्थविचारोपयोगित्वप्रपञ्चनम् ।	२४
तत्र विध्यर्थवादमन्त्रनामधेयविचारोपयोगित्वकथनम् ।	२५
द्वितीयार्थविचारोपयोगित्वकथनम् ।	२८
तृतीयतुरीयार्थविचारोपयोगित्वकथनम् ।	,,
पञ्चमार्थविचारोपयोगित्वकथनम् ।	२९
षष्ठार्थविचारोपयोगित्वकथनम् ।	३०
उत्तरषट्कार्थविचारोपयोगित्वकथनम् ।	३१

विषयः.	पृष्ठम्.
अस्यैवार्थस्य निगमनम् ।	३२
संवृतिसत्यं परमार्थसत्यमिति द्विविधसत्याङ्गीकारेण प्रमाणादिव्यवहारोपपत्तौ पारमार्थिकबाह्यार्थसद्भावप्रतिपादनव्यसनं किमर्थमिति शङ्का ।	३३
अस्याः सत्यभेदानुपपत्त्या दूषणम् ।	,,
वृक्षसिंहयोर्वृक्षत्वस्येव मृषापरमार्थयोः संवृतिसत्यपरमार्थसत्ययोः सत्यत्वसामान्याभावः ।	,,
मिथ्यापर्यायोऽपि संवृतिशब्दः बौद्धैरनुद्वेगकरतया लोकवञ्चनार्थतया च लालायां वक्त्रासवशब्दवत् प्रयुक्त इति, कल्पनावाचोयुक्तिरपि स्वनास्तिक्यपरिहारार्थमेवेति च कथनं तन्निरसनं च ।	३४
सत्यमसत्यं संवृतिसत्यं चेति त्रिधा तत्त्वविभागस्य सत्यद्वयकल्पनायाश्चासङ्गतत्वकथनम् ।	,,
बाह्यशुभाशुभफलोपभोगस्य स्वाप्नोपभोगतुल्यत्वनिरासार्थं बाह्यार्थसाधने प्रयास इति कथनम् ।	३५
बाह्यार्थसद्भावविचारस्य सप्रयोजनत्वोपसंहारः ।	,,
बाह्यार्थमपलपतां योगाचाराणामर्थापलापेन ज्ञानमप्यपलपतां माध्यमिकानां च बाह्यार्थाभावस्य तुल्यत्वात् तदर्थसद्भावसाधनेनोभयेषां निरासस्सम्भवादर्थसद्भावसाधन एव भाष्यकारस्य विशिष्य प्रयत्न इति तात्पर्यविवरणम् ।	३६
प्रमाणतः प्रमेयतश्च द्विधा बाह्यार्थापह्नवस्य बौद्धैराश्रितत्वेऽपि प्रमाणमूलकस्यैव तदपह्नवस्य प्रपञ्चने बीजकथनम् ।	,,
तत्रापि प्राथमिकं प्रत्यक्षमुत्सृज्यानुमानतो विचारे बीजकथनम् ।	३७
प्रकृतसङ्गतिप्रदर्शनार्थमनुमानभाष्यस्यावतारणम् ।	,,
स्तम्भादिप्रत्ययो निरालम्बनः प्रत्ययत्वात् स्वप्नादिप्रत्ययवदिति भाष्यतिरोहितानुमानोपन्यासः ।	३८
'सर्व एव निरालम्बनः प्रत्ययः' इति भाष्यस्य जाग्रद्बुद्धिविवक्षयैव व्याख्येयत्वे बीजकथनम् ।	,,

विषयः.	पृष्ठम्-
'प्रत्ययस्य हि निरालम्बनतास्वभाव उपलक्षितः स्वप्ने' इत्यादिभाष्यस्यार्थविवरणम् ।	३९
बौद्धोक्तनिरालम्बनत्वानुमाने तद्दीत्या हेतोः पक्षैकदेशतापरिहारः ।	४०
एवं पूर्वपक्षं कृत्वा 'जाग्रतो हि बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यति' इति सिद्धान्तभाष्यस्य विमर्शः, तस्य च विकल्पसमतया वा वैधर्म्यसमतया वा जात्युत्तरमिदमित्याक्षेपः ।	४१
अस्याक्षेपस्यैकेन मतेन समाधानम् ।	,,
प्रतिज्ञादोष इति प्रत्यक्षबाध इति च प्रकारान्तरेणापि समाधानम् ।	,,
उक्तस्य प्रत्यक्षबाधस्य विवरणम् ।	४२
जाग्रत्प्रत्यक्षधियां बाधकप्रत्ययरहितानां स्वाप्नप्रत्ययतो बलवत्त्वेन तासु सतीषु नानुमानमुदेतुमलमिति कथनम् ।	,,
एतस्यार्थस्य प्रपञ्चनम् ।	४३
पूर्वोक्तानुमाने निरालम्बनत्वविशिष्टप्रत्ययानां साध्यत्वे बौद्धानां विशेषणविशेष्ययोर्विवेकासिद्ध्याप्रसिद्धविशेष्यविशेषणः पक्षोऽप्रसिद्धान्यतरो वेति दूषणम् ।	,,
पञ्चधा स्ववाग्विरोध इत्यादिना, निरालम्बनत्वं धर्मिणो भिन्नमभिन्नं वेति विकल्पेन च बौद्धमते नानादूषणानि ।	,,
अत्र बौद्धानां प्रत्यवस्थानम्, असतोऽपि सत्त्वकल्पनयानुमानादिव्यवहार इति तदुक्तार्थस्य निरसनं च ।	४४
कीदृश्यसतः कल्पनेति विकल्प्य सर्वथा तदुक्तकल्पनाया निरसनम् ।	४५
प्रत्ययो निरालम्बन इति धर्मिनिर्देशकस्य प्रत्ययशब्दस्य भावकर्तृकरणसाधनत्वे स्ववाग्विरोधः, कर्मसाधनत्वे सिद्धसाधनमिति च प्रतिपादनम् ।	,,
सिद्धसाधनत्वविवरणम् ।	,,
कर्तृकरणपरत्वे दोषान्तरकथनम् ।	४६
भावादिषु विरोधः स्यादित्युक्तार्थस्य विवरणम् ।	,,
प्रत्ययपदस्याखण्डरूपत्वेऽपि दोषकथनम् ।	,,

विषयः.	पृष्ठम्.
विस्तरेण धर्मिदूषणानन्तरं साध्यस्य निरालम्बनत्वस्य धर्मस्य विकल्प-पूर्वकं दूषणम् ।	४७
सर्वथा वा केनचित् प्रकारेण वा निरालम्बनत्वस्य साध्यत्वे दूषणक-थनम् ।	४८
द्विचन्द्रादिज्ञाने वैलक्षण्यकथनम् ।	४९
इन्द्रियार्थसम्प्रयोगसदसत्तया ग्राह्यस्य सदसत्ताव्यवस्थाप्रदर्शनम् ।	,,
बौद्धमते अस्य विभागस्यासम्भवप्रदर्शनम् ।	५०
अत्र नानादूषणानि ।	,,
निरालम्बनबुद्ध्युत्पत्तिमात्रस्य साध्यत्वाभ्युपगमेऽपि सिद्धसाधनत्वकथ-नम् ।	५२
तादृशबुद्ध्युत्पादनशक्तिविरहत्वस्य तथात्वाभ्युपगमे साध्याप्रसिद्ध्या-दिदूषणकथनम् ।	५३
अस्य पक्षस्य पूर्वाभ्युपगमविरुद्धत्वकथनम् ।	५४
अस्याप्ततमबुद्धाभिप्रायविरुद्धत्वकथनम् ।	,,
सर्वलोकप्रसिद्धमहीमहीधरोदध्यादिनिषेधादस्य लोकविरुद्धत्वकथनम् ।	५५
पक्षादिग्राहिव्यतिरिक्ता एव प्रत्यया निरालम्बना इति प्रतिज्ञाकरणेऽपि विकल्प्य दूषणम् ।	,,
उक्तेषु सर्वेषु पक्षेषु विरुद्धाव्यभिचारित्वमनुमानविरोधो वेत्यनुगतदूषण-कथनम् ।	५६
पूर्वपक्षे बाह्यार्थालम्बना बुद्धिः समीचीना बाधकापेतबुद्धित्वात् स्वप्नज्ञा-नादिबाधबुद्धिवदिति प्रतिसाधनवर्णनम् ।	,,
ज्ञानास्तित्वमिन्नत्वक्षणिकत्वादिधियां सत्यत्वेऽनैकान्तिकत्वं, मिथ्यात्वे पक्षबाध इति कथनम् ।	,,
तथाच ज्ञानाभावे शून्यत्वमेव प्रमाणार्थ इति बद्धमुक्ताद्यव्यवस्था, मो-क्षयत्नवैफल्यं चेति कथनम् ।	५७
सर्वसविकल्पकज्ञानानां मिथ्यात्वे ज्ञानास्तित्वादिपक्षो दुर्लभ इत्यादिना दूषणम् ।	,,

विषयः.	पृष्ठम्.
एवं सति साङ्ख्यादिसिद्धान्तपरित्यागेन बौद्धसिद्धान्ते पक्षपातस्यायुक्तत्वम् ।	५८
मिथ्यात्वव्यापकस्य बाधकप्रत्ययस्याभावाद् जाग्रद्बुद्धीनां मिथ्यात्वाभावः ।	,,
बाधकप्रत्ययं विना मिथ्यात्वाभ्युपगमे अव्यवस्था ।	,,
जाग्रज्ज्ञानं सत्यं तत्प्रतियोग्यपेक्षया स्वप्नादिज्ञानं मिथ्येति सम्यक्त्वमिथ्यात्वयोः सप्रतियोगिकत्वेन, सर्वमिथ्यात्ववादिबौद्धमते बीजाभावात् स्वप्नज्ञानस्यापि मिथ्यात्वासिद्धिः ।	,,
जाग्रज्ज्ञानप्रतियोग्यपेक्षया स्वमते स्वप्नादिधियां मिथ्यात्वोपपत्तिप्रदर्शनम् ।	५९
योगिदृष्ट्या जाग्रद्धियां सप्रतियोगित्वसम्भावनया स्वप्नमिथ्यात्वाशङ्का ।	,,
तत्र दूषणानि ।	,,
जाग्रद्बुद्धयः सत्याः इदानीं महाजनस्याबाधात् पराभिमतयोगिबाधबुद्धिवदिति प्रतिप्रयोगकथनम् ।	६१
अत्र प्रत्ययत्वमुभयसिद्धो हेतुर्न भवतीति कथनम् ।	६२
अन्तःकरणजन्मनः स्वाप्नविभ्रमस्य बाह्यालम्बनत्वप्रतिपादनम् ।	६४
बाह्येन्द्रियजन्मनां विभ्रमाणामपि बाह्यालम्बनत्ववर्णनम् ।	,,
शाब्दविभ्रमविषयेऽपि गतिप्रदर्शनम् ।	६५
सन्निकृष्टवर्तमानविषयकत्वस्य प्रत्यक्षधर्मत्वकथनम् ।	६६
अत्र चोद्यपरिहाराः ।	,,
स्वमतरीत्या निरालम्बनत्वस्वरूपप्रदर्शनम् ।	६८
अभावालम्बनस्य ज्ञानस्य शङ्कानिरसनपूर्वकमालम्बनकथनं, परमते निरालम्बनत्वस्याभावालम्बनत्वस्य च दुर्निरूपत्वकथनं च ।	,,
दृष्टान्ते साध्यहीनतां विवृत्य विरुद्धो हेतुरिति दूषणान्तरकथनम् ।	६९
वैधर्म्यदृष्टान्ताभावान्न्यूनः प्रयोग इति केषाञ्चिदनुयोगस्तस्यानवसरत्ववर्णनं च ।	,,

विषयः.	पृष्ठम्.
प्रक्षीणनिखिलकुहेतुजालमेवंवादिनं प्रति मीमांसकस्यापहासः ।	७२
निरालम्बनानुमाने हेतुप्रतिज्ञाविरोधाख्यस्य निग्रहस्थानस्यापादनम् ।	७७
असत्याद्धेतोः सत्यार्थविषयबुद्ध्यभावकथनम् ।	७९
रेखातो वर्णप्रतीतिवत् स्यादित्याशङ्का, तत्परिहारश्च ।	,,
अत्रार्थे श्रुतिप्रक्रियया शङ्का तत्परिहारश्च ।	८१
वासनाभेदनिबन्धनस्य विकल्पप्रविभागस्य तद्भेदनिमित्तासिद्ध्यानुपपत्ति-कथनम् ।	८४
ज्ञानानां क्षणिकत्वेनासाहित्यान्न वासनेत्यस्यार्थस्य प्रपञ्चः ।	८५
आनुरूप्यवासनापक्षनिराकरणम् ।	८७
ज्ञानातिरिक्तवासनापक्षे दूषणम् ।	८८
आश्रयदूषणेन वासनानिरासः ।	८९
स्वमतरीत्या ज्ञातुः स्थायित्वाद् वासनोपपत्तिकथनम् ।	९०
लाक्षोपसिक्तबीजपूरकुसुमवैलक्षण्यप्रदर्शनेन वासनाभावोपसंहारः ।	,,
तात्पर्यान्तरवर्णनेन निरस्तस्य वादिनः समाश्वासनम् ।	९१

शून्यवादः ।

'शून्यस्तु' इति भाष्यस्याक्षेपपूर्वकं तात्पर्यवर्णनम् ।	,,
पूर्वपक्षविवक्षया संवित्परीक्षावतारणम् ।	९२
संवित्परीक्षास्वरूपप्रदर्शनम् ।	,,
परीक्षायां फलविमर्शः ।	,,
ज्ञानं वा नीलमर्थो वा नील इति परीक्षाया युक्तत्वप्रतिपादनम् ।	९३
तत्राद्ये ज्ञानातिरिक्तबाह्यार्थासिद्ध्या सिध्यत्यद्वैतं, द्वितीये नीलादि-बाह्यार्थः तत्प्रकाशकं ज्ञानं चेति द्वैतसिद्धिरिति विचारे फल-भेदवर्णनम् ।	९४
तत्र ज्ञानमेवाकारवद् इति पूर्वपक्षपरिग्रहः ।	९५
बाह्यार्थस्यैव नीलाद्याकारत्वे ग्राह्यान्तरकल्पनागौरवमिति कथनम् ।	,,
प्रमाणवती कल्पना युक्तैवेत्याशङ्क्य कल्पनाया अप्रामाणिकत्वप्रति-पादनम् ।	९६

विषयः.	पृष्ठम्.
बौद्धमते ज्ञानस्य स्वच्छाकारत्वात् कथं ग्राह्यग्राहकाकाररूपिततया भानमित्याशङ्कायास्तन्मतरीत्या परिहारः ।	९८
अर्थाकारकल्पनापेक्षयोभयवादिसिद्धज्ञानाकारकल्पनाया एव ज्याय-स्त्वमिति वर्णनम् ।	९९
अत्र कारणवर्णनम् ।	,,
ज्ञानं प्रकाशकमिति वदता मीमांसकेनापि ज्ञानाकारत्वस्यावश्याङ्गी-कर्तव्यत्वकथनम् ।	१०२
बुद्धिज्ञानपूर्वकमेवार्थज्ञानमिति प्रतिपादनं तदुपसंहारश्च ।	१०४
निराकारासु बुद्धिषूपलब्धिर्नास्तीतिकथनम् ।	१०५
सहोपलम्भनियमान्मेयमातृमानत्रयस्याभेदापत्तिकथनम् ।	१०६
मीमांसकैकदेशरीत्या सहोपलब्धिनियमासिद्धिमाशङ्क्य तन्निरसनेन ज्ञानस्यैवाकारवत्तया बोध इति वर्णनम् ।	१०७
अर्थाकार एव ज्ञानं समारूढोऽतः साकारमिव ज्ञानमिति शङ्काया निरासः ।	१०९
अर्थाकारस्यैव ज्ञाने प्रतिबिम्बितत्वनिरासः ।	११०
रूपभिन्नस्पर्शादीनां प्रतिबिम्बितत्वायोग्यत्वकथनम् ।	,,
वह्निनायस इवार्थाकारेण ज्ञानस्य संसृष्टत्वनिरासः ।	,,
अर्थेन ज्ञानस्य संसर्गस्य निष्प्रमाणकत्वमुक्त्वा ज्ञानवैचित्र्यार्थं विचि-त्रार्थकल्पनाया दूषणम् ।	११३
भासमाननीलादेः ज्ञानार्थोभयाकारत्वोपन्यासः; तद्दूषणं च ।	११५
द्विचन्द्रादिविभ्रम इव ज्ञानाकारताया एवौचित्यम् ।	११६
प्रमदातनौ परिव्राट्कामुकशुनां कुणपकामिनीभक्ष्यबुद्धयनुरोधेन ज्ञाना-कारताया एवौचित्यम् ।	,,
सिद्धान्तारम्भः ।	११८
एकमेव ज्ञानं ग्राह्यग्राहकोभयात्मकं न सम्भवति तत्र दृष्टान्ताभावा-दित्यस्यैवार्थस्य सिद्धान्तमूलभूतस्य प्रपञ्चनम् ।	११९
घटादीन् प्रत्यग्न्यादेर्ग्राहकत्वमेव चक्षुरिन्द्रियं प्रति ग्राह्यत्वमतो नैक-रूपेण तेषां ग्राह्यग्राहकत्वमिति विशदीकरणम् ।	१२५

विषयः.	पृष्ठम्.
ज्ञानस्य स्वतो ग्राह्यत्वं ग्राहकत्वं चात्मवत् स्यादित्याशङ्क्यात्मनो वैलक्षण्यप्रदर्शनेन परिहारः ।	१२६
अहमित्यस्मत्प्रयोगसम्भिन्नबोधतयात्मनः ज्ञानकर्तृत्वमिदमिति भासमानतयार्थस्य ज्ञेयत्वमतो नैकस्य ज्ञानस्य द्व्यात्मकत्वमिति प्रपञ्चः ।	१२७
अत्र कुमारस्वामिवादिनामाक्षेपः ।	,,
तन्निरसनेनात्मनोऽस्मत्प्रयोगसम्भिन्नबोधविषयत्वप्रतिपादनम् ।	१२८
इदं नीलमित्यत्र नीलमात्रभानात् करणवज्ज्ञानज्ञात्रोरभानादप्येकस्योभयात्मकत्वाभाववर्णनम् ।	१३१
'स हि बहिर्देशसम्बद्धः' इत्यादिभाष्यस्य सिद्धान्तरीत्यार्थवर्णनम् ।	१३३
'भवति हि कदाचिदेतद् यद् ज्ञातोऽर्थः सन्नज्ञात इत्युच्यते' इति भाष्यस्यार्थविवरणम् ।	१३४
ग्राह्यग्राहकयोरभिन्नतायां दूषणानि ।	,,
एकग्रहणेऽपरस्यापि ग्रहणमित्यत्र पूर्वपक्षिणां चोद्यम् ।	१३५
ग्राह्यांशस्यैव ग्राहकत्वे कर्मणः कर्तृभावानुपपत्तिकथनम् ।	,,
भावानां ग्रहणाग्रहणनियामकतयोद्भवाभिभवयोरुपगमेन यदा यस्योद्भवः तदा तस्यैवांशस्य ग्राह्यत्वमिति कथनम् ।	१३६
अस्यार्थस्य दृष्टान्तेन विशदीकरणम् ।	,,
दृष्टान्तेषूक्तस्याभिभूताग्रहणस्य प्रकृते योजनम् ।	१३७
पूर्वपरिचोदनाया वस्तुन एकत्वेन कुतो योग्यत्वायोग्यत्वे उद्भवाभिभवौ वेत्याक्षेपपूर्वकं परिहारः ।	१३८
रूपादीनां परस्परं द्रव्यतश्च भेदानभ्युपगमे परस्य क्लेश इत्युपपाद्य स्वभावादेव ते भिद्यन्ते इत्येव साम्प्रतमिति वर्णनम् ।	१४०
सत्यपि द्व्यात्मकत्वे व्यात्मकं न गृह्यत इत्युक्तं निराकृत्य व्याकारमेव ज्ञानं गृह्यत इत्यपरैर्बौद्धैरुक्तस्य दूषणायोपन्यासः ।	१४३
आकारप्रचये कथितस्य दोषस्य परिहारः ।	१४५
'स्मरणाच्चानुमानिकी' इत्युक्तस्योपन्यासो दूषणं च ।	१४६

विषयः.	पृष्ठम्.
एकाकारे ज्ञाने द्व्याकारकल्पनेऽप्रामाणिकत्वाविशेषात् सहस्राकारता-कल्पनापादनम् ।	१ ४७
सिद्धान्तहान्यास्य वादिनो निग्रहकथनम् ।	१ ४८
ग्राह्यग्राहकयोरत्यन्तभेदे सिद्ध्यति द्वैतमिति कथनम् ।	१ ४९
ज्ञानशब्दव्युत्पत्तौ सर्वथा वस्तुभेदसिद्धिकथनम् ।	,,
अपरेषां बौद्धानां मतोपन्यासः, तद्दूषणं च ।	१ ५०
द्वयोर्ग्राह्यग्राहकयोः ज्ञानं ज्ञानमित्यनुगतसामान्याभावः, ताभ्यां तद्व्यतिरेके दोषकथनं च ।	,,
तदव्यतिरेके दोषकथनम् ।	१ ५१
अपोहरूपसामान्याभ्युपगमे दोषाधिक्यम् ।	,,
अपोहस्यैवासम्भवप्रदर्शनम् ।	१ ५२
अज्ञानप्रत्ययस्यागत्यार्थालम्बनत्वापत्त्याज्ञानवाचोयुक्त्यार्थस्यैव पराभिमतत्वप्रसञ्जनम् ।	१ ५३
अज्ञानस्याभावात्मकत्वे चोद्यपरिहारौ ।	,,
ज्ञानं ज्ञेयमिति वस्तुभेदे सिद्धे ग्राह्यः ग्राहक इति व्यपदेशस्य यथारुचित्वाभ्यनुज्ञा ।	१ ५४
'अर्थविषया हि प्रत्यक्षसिद्धिः न बुद्धिविषया क्षणिका हि सा न बुद्ध्यन्तरकालमवस्थास्यते' इति भाष्यार्थोपन्यासः ।	१ ५५
युगपद्भाविनोः कार्यकारणभावनिरासः ।	१ ५६
यौगपद्येऽपि प्रदीपवत् स्यादिति शङ्का तन्निरसनं च ।	१ ५७
शक्त्यपणद्वारा पूर्वस्योत्तरज्ञानालम्बनत्वनिरासः ।	१ ५८
शक्त्यर्पणदूषणम् ।	१ ६०
ज्ञानस्य ग्राह्यैकस्वभावत्वं दूषयित्वा ग्राहकैकस्वभावत्वे दोष-कथनम् ।	१ ६१
ग्राह्यग्राहकयोर्भेदस्य प्रयोगेण प्रदर्शनम् ।	१ ६२
प्रकारान्तरेण ग्राह्यग्राहकयोर्भेदप्रदर्शनम् ।	१ ६३
भयवादिसिद्धत्वाज्ज्ञानाकारकल्पनायां लाघवमित्यादिपरोक्तस्य परिहारप्रपञ्चः ।	१ ६५

विषयः.	पृष्ठम्.
प्रागनवगतानां स्मरणासम्भवकथनम् ।	१६८
भिक्षुणोक्तस्य भ्रान्तभाषितत्वकथनम् ।	,,
पूर्वं ज्ञानमुपलभ्यते पश्चादर्थ इति परोक्तस्यायुक्तत्वप्रतिपादनम् ।	१७१
मिथ्याज्ञानेष्वर्थाकारासम्भवस्य परोक्तस्यानुभाषणपूर्वकं परिहारः ।	१७२
अत्यन्तासम्भावनीयस्वशिरश्छेदादिविभ्रमेषु गतिप्रदर्शनम् ।	१७४
भ्रान्तिज्ञानानामन्यथास्थितस्यार्थस्यान्यथावभासकत्वं नात्मपर्यवसायित्वमित्युपसंहारः ।	१७५
तारकादिमतौ स्त्रीत्वादिलिङ्गप्रत्ययप्रसक्त्या लिङ्गस्वरूपविचारः तत्र वृद्धसम्मतिप्रदर्शनं च ।	१७६
तत्र मीमांसकानां प्रत्यवस्थानम् ।	१७८
एकस्यामेव प्रमदातनौ परिव्राजकादीनां कुणपादिप्रत्यये परोक्तदूषणस्य परिहारः ।	१७९
एकगोचरे दीर्घादिप्रत्यये घटपार्थिवादिप्रत्यये चोपपत्तिप्रदर्शनम् ।	१८०
ज्ञानविलक्षणबाह्यार्थसद्भावसाधनस्योपसंहारः ।	१८१
इन्द्रियाणां प्राप्यकारित्वे तद्विपर्ययेऽपि ज्ञानस्य बाह्यार्थविषयत्ववर्णनम् ।	१८२
परोक्तचोद्यान्तरपरिहारः ।	,,
'ननूत्पद्यमानैवासौ ज्ञायते ज्ञापयति चार्थान्तरम्' इत्यादिभाष्यस्याक्षेपः ।	१८३
आक्षिप्तस्य भाष्यस्य समाधानम् ।	१८४
'तन्न, नह्यज्ञातेऽर्थे कश्चिद् बुद्धिमुपलभते' इत्यादिभाष्यस्याभिप्रायवर्णनम् ।	,,
एकदेशिमतोपन्यासः ।	,,
'ननूत्पन्नायामेव बुद्धावर्थो ज्ञात इत्युच्यते नानुत्पन्नायाम्' इत्यादिभाष्यस्याक्षेपः ।	१८५
अस्याक्षेपस्य समाधानम् ।	१८६
'सत्यं पूर्वं बुद्धिरुत्पद्यते नतु पूर्वं ज्ञायते' इति भाष्यस्यार्थविवरणम् ।	१८७

विषयः.

आक्षेपनिरसनपूर्वकमस्य भाष्यस्य फलद्वारेण प्रतिज्ञानिराकरण-परत्वकथनम् ।

'काममेकरूपत्वे बुद्धेरेवाभावो न त्वर्थस्य प्रत्यक्षस्य' इति भाष्य-स्याक्षेपपूर्वकमर्थवर्णनम् ।

'न चार्थव्यपदेशमन्तरेण बुद्धे रूपोपलम्भनमि'त्यादिभाष्यस्य विवरणम् ।

'अपिच नियतनिमित्तस्तन्तुष्वेवोपादीयमानेषु पटप्रत्ययः' इत्यादि-भाष्यस्याक्षेपः ।

दोषपरिहारसाम्येऽन्यतरस्यानियोज्यत्वकथनम् ।

उक्तभाष्याक्षेपपरिहारः ।

विज्ञानव्यतिरिक्तायाः वासनायाः शक्तिशब्देादिताया दुर्निरूपत्वात् स्वकार्यनियमव्यवस्थापकत्वासम्भववर्णनम् ।

अस्यार्थस्य भाष्यकाराभिहितत्वकथनम् ।

एवञ्जातीयकेऽर्थे आगमस्य व्यापाराभावकथनम् ।

शून्यतायामुपमानाप्रामाण्यकथनम् ।

तत्रार्थापत्तेरप्रामाण्यकथनम् ।

शून्यतायाः षष्ठप्रमाणगोचरत्वोक्त्या तन्निरसनोपसंहारः ।

एवं बाह्यार्थसिद्धया माध्यमिकानामपि निरास इति कथनम् ।

तथाच ज्ञानज्ञेययाथार्थ्यविदां मीमांसकानामेव धर्मविचारभारवहन-क्षमत्वोपवर्णनम् ।

॥ श्रीः ॥

मीमांसाश्लोकवार्त्तिकं

सुचरितमिश्रप्रणीतया

काशिकाख्यया टीकया समेतम् ।

(द्वितीयो भागः ।)

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत् प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ (५)

प्रत्यक्षादौ निषिद्धेऽपि ननु लोकप्रसिद्धितः ।
धर्माधर्मौ प्रमास्येते ब्राह्मणादिविवेकवत् ॥ १ ॥

अत्र भाष्यकारेण प्रत्यक्षाद्यनिमित्तत्वे प्रतिपादिते सदुपलम्भकप्रमाणप्रत्यस्तम(य?यादभा)वप्रमेयतां धर्मस्याशङ्क्य तन्निराकरणपरतयौत्पत्तिकसूत्रमवतारितम् अभावोऽपि नास्ति यतः "औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात्" इति । तच्च चोदनैवेत्यवधारणं चाक्षिपति— **प्रत्यक्षादाविति ।** अयमर्थः— भावगोचरनिखिलप्रमाणाभावे ह्यभावः प्रमाणम् । नचेह तथा, लोकप्रसिद्धेरेवाभावात् । नच सा न प्रमाणं, ब्राह्मणादिवर्णविवेकस्य तदधीनत्वात् । इतरथा तदभावात् । नखलु सुनिपुणमपि विलोकयमाना वयं क्षत्रियादिविलक्षणं ब्राह्मणशब्दवाच्यं पिण्डानुगतमपरं रूपमपरोक्षमीक्षामहे । तदवश्यं वर्णविवेकाय लोकप्रसिद्धिः स्वतन्त्रा प्रमाणमाश्रेया । अपिच सकलशब्दार्थावधारणमेव तदायत्तं, तामन्तरेण प्रमाणान्तरासम्भवात् । अतो निषिद्धेऽपि प्रत्यक्षादौ नाभावश(ङ्का) । नच चोदनैवेत्यवधारणोपपत्तिरिति ॥ १ ॥

G. P. T. 383. 500. 12-3-102 B.

धार्मिकाधार्मिकत्वाभ्यां पीडानुग्रहकारिणौ ।
प्रसिद्धौ हि तथाचाह पाराशर्योऽत्र वस्तुनि ॥ २ ॥
इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।
आचण्डालं मनुष्याणामल्पं शास्त्रप्रयोजनम् ॥ ३ ॥
निर्मूलासम्भवादत्र प्रमाणैः सैव मृग्यते ।
कुतः पुनः प्रवृत्तेति प्रत्यक्षादि तु वारितम् ॥ ४ ॥
नचैतानि परित्यज्य पृथग् लोके प्रमाणता ।

प्रसिद्धिमेव दर्शयति— धार्मिकेति ह्यन्तेन । अनुग्रहकारिणि हि लौकिका धार्मिकशब्दं प्रयुञ्जाना दृश्यन्ते । पीडाकारिणि चाधार्मिकशब्दम्) । यश्च धर्ममाचरति स धार्मिकः । तद् यद्यनुग्रहो धर्मः तदेवमुपपद्यते नान्यथेति । एतदेव भगवतो व्यासस्याप्यभिमतामिति दर्शयति — तथेति प्रयोजनमन्तेन । नि(विषय)प्रयोगासम्भवात् तद्विषयमिदमा प्रतिनिर्दिशति । तदयमर्थः—विशिष्टविषये पुण्यपापपदद्वये आचण्डालं मनुष्याणां विद्यमाने तेनैव धर्माधर्मप्रमितिसिद्धेरनर्थकं शास्त्रमिति । नन्वेवं पुण्यपापप्रमाणकौ धर्माधर्मावुक्तौ, न लोकप्रमाण(कौ) । नैवम् । तत्प्रयोगस्यैव लोकायत्तत्वात् । तस्मादयमनुपालम्भ इति ॥ ३ ॥

एवमाक्षिप्य समादधाति — निर्मूलेतीत्यन्तेन । अयमर्थः — प्रसिद्धिर्हि प्रज्ञानम् । तच्च (ज्ञा)नद्रढिमा । नच निर्मूलं ज्ञानमात्मानं लभते प्रागेव ज्ञानद्रढिमा । तदेवं निर्मूलायाः प्रसिद्धेरभावात् कुतः सा प्रवृत्तेति प्रमाणैरन्विष्यत इति । ननु च कार्यद्रढिम्ना मूलं कल्पयिष्यते, स्मृतिद्रढिम्नेव श्रुतिरत आह—प्रत्यक्षादीति । सत्यम् । समूला प्रसिद्धिः प्रत्यक्षादिमूलतया प्रत्यक्षसूत्रे निवारिता चोदना (मूलं) भविष्यत्येवेति ॥ ४ ॥

ननु सन्निकृष्टार्थगोचरमेव सर्वं प्रमाणम् । अतः प्रसिद्धेः प्रमाणान्तरागोचरार्थत्वं गुणः न दोषाय, अत आह— नचेति । नच प्रत्यक्षादीनि परित्यज्य लोको नाम प्रमाणगणे प्रमाणमुपसंख्यायते । वर्णविवेकसम्बन्धावधारणयोस्तु प्रत्यक्षादिप्रमाणत्वं वनसम्बन्धपरिहारयोरभिधास्याम इति ।

संसारमोचकादेश्च हिंसा पुण्यत्वसम्मता ॥ ५ ॥
न पश्चात् पुण्यमिच्छन्ति केचिदेवं विगानतः ।
म्लेच्छार्याणां प्रसिद्धत्वं न धर्मस्योपपद्यते ॥ ६ ॥
नचार्याणां विशेषोऽस्ति यावच्छास्त्रमनाश्रितम् ।
तन्मूलार्थप्रसिद्धिस्तु तत्प्रामाण्ये स्थिते भवेत् ॥
तस्मादभाववक्तृस्थौ धर्माधर्मौ न शक्नुयात् ।
चोदना चेत् समुद्धर्तुं ग्रस्तौ तेनैव पश्यताम् ॥ ८ ॥

अपिच भवेदपि प्रसिद्धिः प्रमाणं, यदि व्यवस्थितैव प्रसिद्धिः स्यात् । सा त्वव्यवस्थिता । तथाहि— संसारमोचका नाम नास्तिका बाह्यहिंसामेव धर्ममाहुः । अन्ये तु तपः (प्र ? प्रा)जापत्यादि पीडात्मकत्वात् परपीडावत् अधर्म..... स्तु विधिनिषेधप्रमाणकौ तद्विपरीतौ धर्माधर्मौ साङ्गिरन्ते (?।) तदेवं म्लेच्छार्याणां परस्परविगानान्न लोकप्रसिद्धत्वं धर्माधर्मयोरुपपद्यत इत्याह— संसारेति सार्धेन ॥ ६ ॥

नन्वनुमानाभाससङ्करेण प्रमाणमप्रमाणीभवति । नहि प्रत्यक्षाभाससङ्करात् प्रत्यक्षमप्रमाणं भवति । अथ तत्र कारणदोषसदसद्भावनिबन्धनः प्रमाणतदाभासविवेकः, सोऽत्राप्यविशिष्टः । अत्रापि स्मृतिकारैर्विवेकोपायो दर्शित एव । 'आचारश्चैव साधूनाम्' इत्यादिना । साधवश्चार्याः । स्वाभाविककृष्णमृगचरणोपलक्षितार्यावर्तनिवासिनश्चार्यशब्दवाच्याः । अतस्तदाचारो धर्मोऽन्योऽधर्म इति विवेको भविष्यति, अत आह — **नचेति** । शास्त्रसदसद्भावनिबन्धनो ह्यार्यम्लेच्छविभागः तद(नाश्रयेण) त्वार्यम्लेच्छविभागो दुर्भणः । अत एव "शास्त्रस्था वा तन्निमित्तत्वात्" (१. ३. ९) इति वक्ष्यतीति । अस्तु तर्हि शास्त्रमूलार्थप्रसिद्धिः प्रमाणमत आह — तन्मूलेति। न स्वतन्त्रायाः प्रसिद्धेरेव प्रामाण्यं सिध्यतीत्यभिप्रायः ॥ ७ ॥

अतः सकलभावप्रमाणनिराकरणात् शङ्कितभावनिराकरणेन चोदनैव धर्माधर्मयोः प्रमाणमित्युपपन्नमित्याह — **तस्मादिति** । पश्यतामिति । षष्ठी चानादरे (२.३.३८) इत्यनादरे षष्ठीति ॥ ८ ॥

उपदेशो हि भवति ज्ञानं तस्येति योज्यते ।
ज्ञायते येन तज्ज्ञानमेकाधिकरणत्वतः ॥ ९ ॥
औत्पत्तिकगिरा दोषः कारणस्य निवार्यते ।
अबाधोऽव्यतिरेकेण स्वतस्तेन प्रमाणता ॥ १० ॥
सर्वस्यानुपलब्धेऽर्थे प्रामाण्यं स्मृतिरन्यथा ।

अत्र भाष्यकारेण 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्याग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तमि'त्युक्त्वा (कथमि)ति प्रश्नानन्तरम् 'उपदेशो हि भवती'ति सौत्रमुपदेशपदं व्याख्यातं, तत्र न ज्ञायते केनास्य सम्बन्ध इति योग्यपदान्वयं दर्शयति — उपदेश इति । तस्य धर्मस्योपदेशो ज्ञानं प्रमाणमिति । ननूपदेशो ग्रन्थसन्दर्भात्मा, ज्ञानं चार्थावग्रहः । कथमनयोः सामानाधिकरण्यमत आह — ज्ञायत इति । भावसाधनो हि ज्ञानशब्दो नोपदेशशब्देन सामानाधिकरण्यं लभते । अयं तु ज्ञायतेऽनेनेति करणसाधन इति युक्तं सामानाधिकरण्यमिति ॥ ९ ॥

कथं पुनरुपदेशो धर्मे प्रमाणमत आह — औत्पत्तिकेति । बाधकारणदोषाधीनं ह्यप्रामाण्यम् । तत्र सम्बन्धौत्पत्तिकत्वप्रतिपादनेन तद्द्वारा पुरुषानुप्रवेशाभावात्, पुरुषाश्रयत्वाच्च शब्दे दोषाणां कारणदोषनिवारणं तावत् कृतम् । तन्निराकरणेन सहाप्रामाण्यमनपोदितमित्यव्यतिरेकपदप्रयोजनमाह — अबाध इति । अव्यतिरेकपदेनाबाधः प्रतिपाद्यते नहि देशकालयोरुभयोरपि चोदनाजनितं ज्ञानं विपर्येतीति । तदेवं बाधकारणदोषनिराकरणे कृतेऽनपोदितमौत्सर्गिकं प्रामाण्यमिति तत् प्रमाणमित्यनेनोक्तमिति दर्शयति — स्वत इति ॥ १० ॥

अत्र चार्थेऽनुपलब्ध इत्युच्यते । तदयुक्तम् । उपलब्धार्थविषयमपि प्रमाणं भवत्येव । अनुभूतिर्हि प्रमाणं प्रत्युत्पन्नेन्द्रियलिङ्गादिजनिता च संविदनुभूतिः । अत एवोन्मीलि(ताक्ष)स्यैकभावगोचराणां धारावाहिकसंविदां प्रामाण्यमुपपन्नं भवति । अन्यथा तन्न स्यात् । नहि तत्रानवगतं किञ्चिदनुभूयते । देशकालान्तरसम्बन्धोऽनुभूयत इति चेद्, न । एकदेशस्थेऽपि भावात् ।

चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः ॥ ११ ॥
वाक्यान्तरे समर्थेऽपि किमर्थं विधिराश्रितः ।

कालस्तु परोक्षः । नच परोक्षापरोक्षसम्बन्धोऽपरोक्षो भवति, तरुमरुत्संयोगवत् । अतो(ऽवगतार्थ)मनधिकार्थमपि ग्रहणं प्रमाणमिति वाच्यम् । नचैवं स्मृतित्वापातः । स्मृतिर्हि पूर्वानुभवप्रभावितभावनावशलब्धासिद्धिर्नाधिकमपेक्षते (ग्रहण+त्व?) नेन्द्रियसापेक्षमित्युक्तम् । अतएव गृहीतमपि पुनर्गृह्यमाणं दृश्यत इति लौकिका व्यपदिशन्ति, नतु स्मर्यत इति । अतो न विद्मः किमर्थेऽनुपलब्ध इत्यनेन निरस्यत इति (अत आह —) **सर्वस्येति।** **अयमर्थः** — अनुपलब्धार्थविषयमेव सर्वं प्रमाणम् । अन्यथा स्मृतित्वापातात् । नहि ग्रहणस्मरणयोर्गृहीतागृहीतगोचरयोर्गृहीतागृहीतगोचरगतो विशेष उपलभ्यते । यत्तु कारणभेदाद् भेद इत्युक्तम् सत्यम् । स्वरूपभेदौपयिकः कारणभेदः । स्वरूपं तु गृहीतागृहीतविषयत्वादेव भिन्नम् । अनुभूतिर्ग्रहणमिति चेद्, यद्यपि सोऽनुभूतिः अनुमानादिषु स्मृतित्वप्रसङ्गः । अतोऽवश्यं गृहीतागृहीतागोचरत्वमेव ग्रहणस्मरणयोर्भेदः । किमिदानीं धारावाहिकसंविदो न प्रमाणम् । नहि का+++++क्तम् । अत्रोच्यते । तत्राप्युत्तरोत्तरकालाकलितभावप्रत्याकलनादुपपन्नमेवाधिकगन्तृतया प्रामाण्यम् । नच वैशेषिकादिवत् परोक्षं कालमाचक्ष्महे । प्रत्यक्षमेव हि +++वर्तमानकालसम्बन्धान् भावानुपलभामहे । कथमरूपं प्रत्यक्षमिति चेत् । आकाशवद् भविष्यति । नहि रूपि प्रत्यक्षमिति नः प्रत्यक्षलक्षणम् अपितर्हि संविदेव परोक्षापरोक्षनिर्भासोदीयमानेदं प्रत्यक्षमिदमप्रत्यक्षमिति विभजते । तदेवं विस्फारिताक्षस्य व्यक्तानुपलक्षितोत्तरोत्तरसूक्ष्मक्षणभेदभिन्नैकभाववि+++कापरोक्षनिर्भासावभासोदयात् उपपन्ना प्रत्यक्षता प्रमाणता च । अतः प्रमाणान्तरानुपलब्धस्वगोचरप्रत्याकलनादुपपन्नमुपदेशप्रामाण्यमिति सूक्तमर्थेऽनुपलब्ध इति । अत्र भाष्यम् 'उपदेश इति विशिष्टस्य शब्दस्योच्चारणमि'ति । तत्र **चोदना** विधिपदपर्यायः शब्दविशेषो भाष्यकारस्याभिमतः इत्याह— **चोदनेति** । एतदुक्तं भवति — विधायकशब्द उपदेश इति ॥ ११ ॥

अत्र चोदयति — **वाक्यान्तर** इति द्वयेन । अयमर्थः— यदिदं शब्दविशेषस्य विधेर्धर्मे प्रमाणत्वमाश्रितम, अनेन वाक्यान्तरमपि हि वर्त-

साध्यसाधनसम्बन्धः सर्वाख्यातेषु गम्यते ॥ १२ ॥
सर्ववाक्येषु चाख्यातं तेनाकाङ्क्षानिवर्तनात् ।
प्रवृत्तिसिद्धिरिच्छातः प्रतिषेधात् तु वर्जनम् ॥ १३ ॥
विधावनाश्रिते साध्यः पुरुषार्थो न लभ्यते ।
श्रुतस्वर्गादिबाधेन धात्वर्थः साध्यतां व्रजेत् ॥ १४ ॥

मानोपदेशकं धर्मप्रमितौ प्रमाणमेव । श्रेयस्साधनं हि धर्मः । सच श्रेयसः स्वर्गादेः साधनेन यागादिना साध्यसाधनसम्बन्धः सर्वाख्यातेषु सम्भवति । 'स्वर्गकामो यजेते'त्यतोऽपि हि यागेन स्वर्गः सिध्यतीति गम्यत एव । यथा लोके ओदनं पचतीति पाकौदनयोः साध्यसाधनसम्बन्धबुद्धिः । स्यादेतत् — आख्यातमन्तरेण साध्यसाधनसम्बन्धो न सिद्ध्येत्, तदर्थो विधिरिति । तन्न । अनाख्यातवाक्यप्रयोगासम्भवात् । प्रयोजनाय हि वाक्यमुच्चार्यते । निराकाङ्क्षं च वचः प्रयोजनक्षममाकाङ्क्षानिवर्तनं चाख्याताद्दते न सम्भवति । इतरथा विधेरप्यसम्भवात् । स्तुत्यापि ह्याख्यातमेव खादिरादिवाक्येषु विधायकं परिकल्प्यते । अथोच्येत — अनुष्ठितो यागादिर्धर्मः, नचानुष्ठानं (प्रव)र्तकाद्दते सम्भवति । नच विधिमन्तरेणान्यः प्रवर्तयतीति । तन्न । इच्छानिबन्धनत्वात् प्रवृत्तेः । अनिष्टेषु विधिशतेनाप्यप्रवृत्तेः । अतोऽनेनेदं सिध्यतीति संविदि वोपायार्थी स तत्र प्रवर्तत इति । नचाधर्मवर्जनार्थो विधिः । प्रतिषेधादेव नञस्तत्सिद्धेः । रागादिप्राप्तकर्तव्यतानुवादेन नञेव निषेधाधिकारे निवर्तकः । एषा हि तत्र वचनव्यक्तिः यद्धन्यात् तन्नेति । अतोऽनर्थको विधिप्रामाण्यप्रतिपादनप्रयासः । अपौरुषेयः शब्दः धर्मे प्रमाणमित्येतावदेव वचनीयमिति ॥ १३ ॥

परिहरति — विधाविति । अयमभिप्रायः — सत्यमिच्छातः प्रवृत्तिः । इच्छैव तु प्रेक्षावतां पुरुषार्थसाधनविषया । नच विधिना विना पुरुषार्थसाधनत्वं यागादीनां शक्यतेऽवगन्तुम् । अतएवौदुम्बरादीनां सत्यपि फलपदसम्बन्धे विधिविरहात् फलार्थत्वं नेत्यौदुम्बराधिकरणे वक्ष्यते । ननु लौकिकपाकौदनादिवत् साध्यसाधनसम्बन्धसिद्धिरुक्ता ।

विधौ तु तमतिक्रम्य स्वर्गादेः साध्यतेष्यते ।
तत्साधनस्य धर्मत्वमेवं सति च लभ्यते ॥ १५ ॥

सत्यमुक्ता । अयुक्ता सा । लोके प्रमाणान्तरावगतेः सिध्यत्यपि । नतु वेदे । प्रमाणान्तराभावात् । ननु स्वर्गकामपदसमभिव्याहारः प्रमाणं, न । तस्य श्रुत्या बाधात् । इहहि यजत इति साध्याकाङ्क्षिणी भावनावगता सती समानपदोपादानश्रुत्युपनीतयो ..... र्थात्वर्थसम्बन्धनिराकाङ्क्षा सती न व्यवहितकर्तृविशेषणत्वोपयुक्तस्वर्गादिभाव्यसम्बन्धमनुभवति । सन्निकृष्टालाभे हि विप्रकृष्टोऽपि वैदिको भवति न सन्निकृष्ट, ...च्यते । लभ्यते चेह धात्वर्थः सन्निकृष्ट इति न विप्रकृष्टफलपदसम्बन्धो युक्त इति ॥ १४ ॥

कृतिविधौ तर्हि कथं पुरुषार्थसाध्यसिद्धिरत आह—**विधाविति**। अयमभिप्रायः—विधिर्हि चेतनप्रवर्तनात्मकार्थे फले व्यापारे शक्यते पुरुषं प्रवर्तयितुम् । अतः समानप्रत्ययोपात्तविध्यवरुद्धा भावना विधेः प्रवर्तनाशक्तिर्मा व्याघानीति सन्निहितमप्यपुरुषार्थत्वादय ..... र्वमतिक्रम्य व्यवहितेनापि पुरुषार्थेन स्वर्गादिना साध्येन सम्बध्यते । धात्वर्थस्तु साध्यत्वात् प्रच्यावितो भावनायामेव साधनाकाङ्क्षिण्यां साधनतया निव .... तमावाक्यार्थो भवति यागेन स्वर्गं कुर्यादिति । अतः पुरुषार्थसाधनस्य यागादेर्धर्मत्वसिद्धिरिति युक्तमुपदेशप्रामाण्यप्रतिपादनमिति ।

इदं त्विह वक्तव्यम्—का(र्य)विधौ पुरुषार्थः साध्यो लभ्यते । विधिर्हि शब्दभेदो वा लिङादिः, तद्व्यापारातिशयो वा, कोऽपि तदर्थभेदो वा । सर्वथा च न युज्यते । शब्दे हि प्रवर्तयितरि पुरुषार्थसम्बन्धे प्रमाणमस्ति । आप्ते हि बुद्धिपूर्वकारिणि प्रवर्तके हितकार्ययं मामफले न प्रवर्तयतीति बुद्ध्वा भवति प्रवृत्तिविषयव्यापारफलवत्ता(ध्य)वसायः । शब्दस्त्वचेतनो नास्मिन् प्रवर्तयत्यपि पुरुषार्थफलप्रतिलम्भः । नहि प्रबलपवनाभिहतोऽवटे निपतत् फलं प्रतिलभते । अपिच प्रमाणं शब्दः । प्रमाणानां प्रमेयोपदर्शनादन्यत्र व्यापारः । प्रत्यक्षं हि रूपादीनुपदर्शयति नतु प्रवर्तयति । त्रेधा हि प्रामाणिकाः प्रमाणफलं विभजन्ते । हानमुपादानमुपेक्षा चेति । तदिदं प्रमाणानां प्रवर्तकत्वे नोपपद्यते । तदा ह्युपादानमेवैकं प्रमाणफलमापद्येत । कण्टकप्रत्यक्षेण हि कण्टकेषु प्रवर्त्यमानो जिहासन्नपि तान्

मृद्गीयात् । स्यादेतत् — शब्दप्रमाणधर्मोऽयं न प्रमाणान्तराणामिति । न, प्रमाणत्वाविशेषात् । एवंहि प्रयोगो भवति । शब्दो न प्रवर्तकः प्रमाणत्वात् प्रत्यक्षादिवत् । अस्तु वा प्रवर्तकः । नियमेन ..... प्रवृत्तिप्रसङ्गः । नच लिङादिश्राविणो नियमेन प्रवर्तमाना दृश्यन्ते । प्रथमश्रुतादप्रवृत्तेः । अविदितसमयत्वादप्रवृत्तिरिति चेत्, किमिदानीं सम्बन्धसंविदपेक्षया यदि शब्दः प्रवृत्तेः कारकः । नहि कारकाणि स्वरूपसंविदमप्यपेक्षन्ते । (प्रागेव समयसंविदं?) मृत्सलिलप्रच्छन्नं हि बीजमविदितस्वरूपसामर्थ्यमपि स्वकार्यमङ्कुरमारभमाणं दृष्टम् । एवमेव शब्दव्यापारो विधिरित्यपि निरसनीयम् ।

स्यान्मतम् — अभिधेय एव लिङादीनां व्यापारो विधिः । अतो न पूर्वोक्तदोषप्रसङ्गः इति । न, अनिरूपणात् । स खलु प्रेषणादिलक्षणो वा स्याद्, अन्यो वा । न तावद् प्रेषणादिलक्षणः शब्दे सम्भवति । अचेतनत्वात् । नचान्यस्तत्समर्थाचरणलक्षणः, तस्य कारीषादिवदनिरूपणात् । कारीषस्य हि वह्नेः शीतापनोदनोऽध्ययने दृष्ट(मु?उ)पकारः । न शब्दे तथा सम्भवति । प्रमाणान्तराभावात् । शब्दस्य चागृहीतसम्बन्धस्याप्रत्यायकत्वात् । यदि ब्रूयाद् व्यापारान्तरकल्पने स्यादयं दोषः, क्लप्त एव तु लिङादीनामभिधाभिधानलक्षणो व्यापारः शब्दान्तराणामिव स्वार्थप्रकाशनान्यथानुपपत्तिप्रमाणकः प्रवृत्तिहेतुत्वप्रतिलब्धप्रवर्तनापरनामा विधिरिति प्रतिब्रूयादेनम् । स खलु व्यापारभेदोऽभिधेयो वा स्यादनभिधेयो वा स्यात् । अनभिधेये अशब्दा ..... स्यभावनासमभिव्याहारानुपपत्तिः । किञ्च सर्वशब्दानामेवानुमानेन स्वार्थगोचरो व्यापार उन्नीयते । नच तथावगतः । प्रवृत्तिहेतुभाव..... ..... पाराः प्रवर्तयन्तीति चेद्, विशेषहेतुर्वाच्यः । यद्यर्थविशेषगोचरता विशेषहेतुः, स तर्ह्यर्थभेदो विधिः, तदन्वयव्यतिरेकानुविधानात् । प्रवृ..... .....वर्थभेदः । यदि भावना न, तस्या वर्तमानापदेशेष्वप्यविशेषात् । अन्यश्चेत् नैनमुपलभामहे प्रमाणाभावात् । अभिधीयत एव लिङादिभिरात्मीयमभिधानमिति चेत् । ..... सर्वशब्देभ्यः प्रवृत्तिप्रसङ्गः शक्यते वारयितुम् । नच कार्योन्नेयमभिधानमभिधीयत इति साम्प्रतम् । अनन्यलभ्यं हि शब्दाभिधेयमुपागमन् धीराः । किञ्च यदि व्यापारस्वरूपाभिधानं स..... ..... प्रवर्तकत्वप्रसङ्गः । सोपक्लेषो विशेष इति चेद्, न । स्वरूपाभिधानप्रसक्तेः । न ह्यनभिधाय विशेषणं विशेष्याभिधानं सम्भवति । अपिचा-

भिधाभिधानाभ्युपगमेन प ..... विशेषहेतोरभावात् । अस्तु तर्ह्यर्थभेदो विधिः । कः । कार्यम् । किं पुनः कार्यम् । कार्यमेव हि कार्यम् । नहीदं रूपान्तरेणानुभूयते । ननु न क्रियातिरेकि कार्यं प्रमाणान्तरैरवगम्यते । सत्यम् । अत एव शब्दप्रामाण्यसिद्धिः । अन्यथा प्रमाणान्तरगोचरत्वेन सापेक्षत्वादप्रामाण्यं चोदनायाः । अपिच कालत्रयविपरिवृत्त्यर्थगोचराणि मानान्तराणि । कार्यं च परामृष्टकालभेदं स्वप्रमाणादवगम्यत इति न प्रमाणान्तरगोचरः । कारकव्यापारो हि यागादिः कालत्रयावच्छेद्यो नाधिकारः । यद्येवमसत्कार्यं कालत्रयापरामर्शात् शशविषाणवदापद्येत । न । कालेनानेकान्तात् । कालो हि न तावत् कालान्तरपरिच्छिन्नः । नच नास्ति कालः । कालान्तरावच्छेदे त्वनवस्थापातः । अलब्धकालान्तरसम्बन्धोऽपि कालः प्रमाणसामर्थ्यादस्तीति चेत् । समानं हि कार्येऽपि । तदपि स्वप्रमाणेभ्यो लिङादिशब्देभ्यः कालानवच्छिन्नमवगम्यमानं कथमसद् भविष्यति । प्रमाणसम्बन्धो हि सत्ता, न कालसम्बन्धः । कार्यमेव तु मनसि वर्तमानं नियुङ्क्ष इति नियोग इत्युच्यते ।

ननु नियोगो नियुक्तिः । स च नियोक्तृव्यापारः । नच वेदे नियोक्तास्ति अपौरुषेयत्वात् । शब्दस्य चानियोक्तृत्वान्न तद्व्यापारो नियोगः । अदूरविप्रकर्षेण तु नियोगादिपदप्रयोगः । याथात्म्यवेदनायां तु लिङेव पठितव्यः । सा ह्यस्य प्रमाणम् । किमात्मकमस्तर्ह्यर्थम् । उक्तं कार्यात्मेति । नच द्रव्यादिनात्मकत्वादभावः, तद्वदेव कार्यमपि तद्विभक्तमेव देशकालनरावस्थान्तराविपर्ययात् स्वसंवित्संवेद्यं नास्तीति शक्यतेऽवगन्तुम् । उदीयते खल्वपि लिङादिश्राविणां कार्यसंवित् । नचेयमनालम्बना, नच स्वांशालम्बनेति विज्ञानवादे वर्णितम् । अतो निर्विषया संविदात्मानमलभमाना स्वविषयभूतं कार्यमुपकल्पयति । नच प्रतिभामात्रमिदमिति वाच्यम् । अनियतनिमित्ता हि प्रतिपत्तिः प्रतिभा । नचेयमनियतनिमित्ता, शब्दनिमित्तत्वात् तदनन्तरमुत्पत्तेः । कथमनन्यगोचरे कार्यात्मनि व्युत्पत्तिः । तदभावे वा शब्दात् प्रतिपत्तिः कल्प्यताम् । लिङादीनां सकलेतरशब्दविलक्षणः कोऽपि महिमा, यदविदितसम(या?या अ)पि स्वार्थं गमयन्ति । अथवा सर्वस्याकुमारमास्थविरं च कार्यावगतिः प्रवृत्तिहेतुरिति प्रसिद्धिः ।

तदन्यमपि लिङादिशब्दश्रवणानन्तरं चेष्टाविशिष्टमुपलभ्याकलयति नूनमितः सकाशादस्य कार्यसंविदासीत् कथमपरथा प्रवर्तत इति । नन्वेवं क्रियामेव कार्यतया अज्ञासीदिति परस्यापि तद्गोचरामेव कार्यधियमुन्नयति । न । वर्तमानापदेशेषु सत्यपि क्रियाज्ञाने प्रवृत्त्यदर्शनात्, क्रियात्मनः कार्यस्य व्यभिचारात् प्रवृत्तावहेतुत्वात् । एतदेव फलेऽपि दर्शयितव्यम् । अतो निर्मुक्ताखिलफलादिविकल्पमव्यभिचरितप्रवृत्तिसम्बन्धं कार्यमात्रं लिङादिभ्यः प्रयोज्यवृद्धेनावगतमिति व्युत्पद्यमानो जानाति । नहि कार्यावगतिर्भवति प्रवृत्तिश्च नेति सम्भवति । अतः कार्यमेव कार्यविधिरित्याचार्याः प्रतिपेदिरे । ननुच प्रेषणादयो लिङर्थाः । न, स्वसन्ताने प्रवृत्तिहेतुत्वेन तेषामनुपलब्धेः । वेदे च व्यभिचारात् । (ननु त)र्हीष्टाभ्युपायता लिङादीनामर्थो भविष्यति । सर्वो हि समीहितोपायमाकलय्य तत्र तत्र प्रवर्तत इति परमपि चेष्टमानमुपलभ्य जानाति नूनमिष्टो ..... मव्यापारः शब्दश्रवणानन्तरं चायं चेष्टत इति शब्देनेष्टाभ्युपायता प्रतिपादिता भवति । स एव विधिः । प्रवर्तनारूपो हि सः । प्रवृत्तिहेतुं धर्मं च प्रवदन्ति ..... । अतः प्रेषणाध्येषणाभ्यनुज्ञातिरिक्तमप्रवृत्तप्रवर्तनं नियोज्यार्थकर्मगोचरं लोकवेदसाधारणं चोदनोपदेशपर्यायपदवाच्यं लिङादीनामर्थो विधिरिति युक्तम् । हि ..... त्य जैमिनिनोक्तम् उपदेश इति । भाष्यकारेण च 'उपदेश इति विशिष्टस्य शब्दस्योच्चारणमि'ति विवृतम् । पुरुषार्थोपायं किलानवगतमवगमयन् शब्दान्तरे दूरमुत्कृष्टो लिङादिशब्दोऽविशिष्ट इत्युक्तम् । अतो लोकवेदतन्त्रान्तरानुगतोऽयमेव सिद्धान्त इति कैश्चिदुन्नीतम् ।

तदिदमनुपपन्नम् । तथाहि — संविदेव तावत् परिपन्थिनी । नहि लिङादिश्रवणसमनन्तरमिष्टाभ्युपायोऽयं व्यापार इति भवति मतिः । अपि तर्हि, प्रवर्तनावगतिः । ननु चेष्टाभ्युपायतैव प्रवर्तना प्रवृत्तिहेतुत्वात् । तन्न । एवं सति 'यस्य पर्णमयी जुहूर्भवति' इत्यत्रापि विधित्वप्रसङ्गः । 'तरति मि'त्यत्रापि । भवति हि तत्रापि पर्णमयता 'अपापश्लोकश्रवणस्य' अश्वमेधो वा ब्रह्महत्यातरणस्य साधनमिति प्रतिपत्तिः । यदि मतम् —अस्येदं भवतीत्यन्वयमात्रमत्रावगम्यते न व्यतिरेकः, नच तमन्तरेण साध्यसाधन-

सम्बन्धोऽवगम्यते इति । कथं तर्हि 'स्वर्गकामो यजेते'त्यत्रापि स्वर्गयागयोः साध्यसाधनसंवित् । नहि तत्रापि सति यागे स्वर्गो भवति असति नेति मतिः । यागेनेति हि तृतीया साधनभावमवगमयतीति चेद्, न । तृतीयाश्रवणात् । विधेरयं महिमा यदतृतीयान्तोऽपि यजिः करणतया निर्दिश्यते । स चेदन्यो नाभ्युपगम्यते कथं स्वभावसाध्यो यजिः करणतया निर्दिश्यते । अपिच यत्र स्पष्टमिष्टाभ्युपायत्वमवगम्यते यागस्य यथेष्टाभ्युपायोऽयं यागः यागेन स्वर्गः सिध्यतीति वा, तत्रापि विधित्वप्रसङ्गः । किञ्च तद्वेषीति तत्कारि चायमेवं ब्रुवाणो दृश्यते । तथाहि प्रतिभा विधिरिति निरस्यैतदुक्तं —

"न निरालम्बनं ज्ञानं क्रिया साधनयोगिनी ।
समान्यस्मिन्"

इति । तदिदं तवापि समानमिति वर्णितम् । अपिच एवंवादिना साधु समर्थितं 'विधावनाश्रिते' इति । अत्र हि विध्यधीना यागादेरिष्टाभ्युपायता नतु सैव विधिरिति दर्शयति । तस्मादतिकुशलैरुपदेशापदेशयोरविशेष एवोपपादित इति निर्मुक्ताखिलोपाधिविधितत्त्वमतीन्द्रियमन्यदेवेति पूर्वोक्तमेव साधीयः ।

अत्र वदामः— नैवमपि यागस्वर्गयोः साध्यसाधनसम्बन्धसिद्धिः । नियोगो हि तदा साध्यः । नच साध्यद्वयमेकत्र समवैति, समत्वादसम्बन्धात् । ननु नियोगसिद्धिनान्तरीयकी स्वर्गसिद्धिः । अतएव साध्यविवृद्धिरियं नतु स्वर्गोऽपि स्वतन्त्रतया साध्यः । निरपेक्षं च साध्यद्वयमेकत्र विरुध्यते, नानुगुणम् । यथाह — "नियोगसिद्धौ सर्वं तदनुगुणम्" इति । केन नेष्यते । तस्मादविरोध इति । तदसत् । किं हि स्वर्गसिद्धिमन्तरेण नियोगस्य न सिध्यति । नहि नित्याधिकारेषु नियोगः साध्यान्तरमाकाङ्क्षति । कामाधिकाराः काम्यपर्यन्ता इति चेत्, को हेतुः । कर्मिसाध्यत्वावगतिः । तथाहि 'स्वर्गकामो यजेते'ति साध्यस्वर्गविशिष्टाधिकारिसाध्यो नियोगोऽवगम्यते । स कथमसिध्यति स्वर्गे सिध्येत् । अतः स्वर्गसिद्धिरवगम्यत इति नः साध्यस्वर्गविशिष्टोऽधिकारी ।

कस्तर्हि । काम्यस्वर्गविशिष्टः । अतः स्वर्गं कामयमानः पुरुषो नियोगं साधयिष्यति । अन्यदिच्छतोऽन्यत्र क्रिया नोपपद्यत इति चेद्, न । नियोगसामर्थ्यादुपपत्तेः । नियोगो हि प्रधानभूतः साध्यतयावगतः स्वर्गमपि कामयमानमात्मन्याकर्षतीति किमनुपपन्नम् । अपिच सिध्यन्नपि स्वर्गो यागात् सिध्यतीति न नः प्रमाणम् । स्वर्गयागौ हि युगपदरुणैकहायनीवदेकप्रधानकार्यान्वयिनौ नान्योन्यान्वयमनुभवतः । नचारुणिमन इव द्रव्यावच्छेदशक्तिर्यजेरपि स्वर्गसाधनशक्तिरवधृता प्रमाणान्तरेण । ननु किमत्र प्रमाणान्तरेण । स्वर्गे याग एव प्रमाणम् । स हि स्वर्गकामं यागे नियुङ्क्ते । नचाकामोपाये कामी नियोक्तुं शक्यते । उक्तोत्तरमिदम् । किंहि भगवतो नियोगस्यालौकिकस्यासदृशमहिम्नो दुः(खत)या फलेऽपि नरं प्रवर्तयति । तस्य ह्यनुपाये कामिनं नियुञ्जानस्य किमिव हीयेत । यागे नियोगो नियुङ्क्ते इति वदता नूनमिदमवधीरितम् । आरम्भे हि पुरुषो नियुज्यते न कर्मणीति । तस्मान्न स्वर्गयागयोः साध्यसाधनसम्बन्धसिद्धिः । यदपि च क्रियादिकार्ये व्यभिचारादनुपाधिके व्युत्पत्तिरित्युक्तं, तदयुक्तम् । प्रतीतविषयत्वाद् व्युत्पत्तेः । नहि क्रियादिव्यभिचारात् शशविषाणं लिङाद्यर्थ इति शक्यते वक्तुम् । यदपि मन्यते क्रियाकार्य एव लोके व्युत्पन्नः फलसमभिव्याहाराद् वेदेऽन्यदविनाशि कार्यं लिङाद्यर्थ इति प्रत्येष्यते । लोके तु संमुग्धेनापि व्यवहारसिद्धेर्न शब्दार्थतत्त्वनिरूपणम् । बहव एव गौणलाक्षणिकशब्दनिबन्धना लोके व्यवहारा दृश्यन्ते । वेदे तु 'स्वर्गकामो यजेते'ति क्रियात्मनः कार्यस्य भङ्गुरत्वादामुष्मिकस्वर्गादिफलसाधनाशक्तेः कालान्तरस्थायिक्रियातो भिन्नं कार्यमुपेयते । वाक्यशेषाच्चैकत्र समुन्नीतः शब्दार्थो यववराहाद्यर्थवदन्यत्रासत्यपि वाक्यशेषेऽवगम्यते । नित्याधिकारेष्वसत्यपि फलपदसमभिव्याहारे तथाविधमेव कार्यं लिङादीनामर्थो भविष्यतीति । तदिदमन्यदेवाभ्यस्तमन्यच्चोपनिपतितम् । क्रियाकार्ये (विप्पन्न?) स्थायिकार्यं प्रतिपद्यते । नच क्रियायाः फलसाधनताशक्तेरशब्दार्थः सन् युक्तः कल्पयितुम् । कामं कर्मण एवाफलनिष्पत्तेः समस्ति रूपमिति कल्पयितुमुचितम् । नच पूर्वावगतशब्दार्थान्यथाकरणम् । नहि कर्मण्यनुशिष्टा द्वितीया सक्तुषु तदसम्भवाद् विपरिवर्त्य करणमभिधत्त इति युक्तमभिधातुम् । सर्वशब्देष्वनाश्वासप्रङ्गात् । अतएव

तत्र तत्र यथाश्रुतार्थसमन्वयानुपपत्तेः क्वचिद् गुणवादः क्वचिल्लक्षणा क्वचिद् विनियोगभङ्ग इति तन्त्रे व्यवहारः । ननु विनियोगभङ्गादभिधानमेव शब्दानामन्यथा नीयते । अपिच श्रुतकर्मफलसम्बन्धानुपपत्तेरनवगतपूर्वमपूर्वं कार्यं लिङर्थमुपयता साधु श्रुतमुपपादितम् । किं हि लिङापराद्धं यत् तस्यालौकिकमर्थमतिक्रम्य कर्मफलसम्बन्ध उपपाद्यते । ननु नाद्यापि लिङर्थो निश्चीयते । अयमेव हि निर्णयसमयः । अत्र च श्रुतफलपदान्तरसमभिव्याहारोपपत्तयेऽतीन्द्रियमेव कार्यमिति निश्चीयते । अतो न किञ्चिद् विरोत्स्यत इति । किमिदानीं 'स्वर्गकामो यजेते'ति श्रुतेरप्रतीतिरेव, लिङर्थे संशयो वा । अप्रतीतौ क्रियात्मनः कार्यस्य फलसम्बन्धानुपपत्तिरित्येतदेव दुर्भणम् । संशयस्तु पक्षद्वयावलम्बी । नचालौकिके क्रियातिरेकिणि कार्ये लिङादयो निरूपितप्रयोगाः । नचात्यन्तापरिदृष्टापूर्वार्थगोचरः संशयो दृष्टचरः । यवादिषु त्वार्यम्लेच्छप्रयोगनिबन्धनो दृष्टपूर्वार्थगोचरः संशयो युक्त एव । अतएवात्र न वाक्यशेषान्निर्णयः । सन्दिग्धे हि स वर्णितः । नच लिङर्थे संशयः । किन्तु लोके व्युत्पत्त्यनुसारेण क्रियात्मन्येव कार्ये निश्चयः । यदप्युच्यते कर्मफलसम्बन्धोपपत्तयेऽन्यत् कार्यमुपलभ्यत इति । केन वा कर्मफलसम्बन्धो दर्शितः । नह्ययं वैनियोगिकः । नियोग एवात्र प्रमाणम् । स चेत् तदधीनसिद्धिः दुरुत्तरमितरेतराश्रयम्, सिद्धो हि नियोगो विषयीभूतस्य भावार्थस्य करणतामाह । तत्सिद्ध्या च नियोगात्मलाभ इत्यलमनेनापि ।

यथावार्त्तिकमनुसन्धास्यामः । एवंहि वार्त्तिककृता भावार्थाधिकरणे उक्तं 'लिङादिशब्दानां पुरुषं प्रति प्रयोजकव्यापारोऽभिधात्मिका भावना विधिरि'ति । द्वे किल भावने मीमांसकाः सङ्गिरन्ते शब्दात्मिकामर्थात्मिकां च । तत्रार्थात्मिका सर्वाख्यातसाधारणी स्वर्गादिफलधर्मिका यागादिधात्वर्थकरणिका स्ववाक्यप्रकरणान्यप्रकरणानारभ्यवादस्मृतिलोकाचारप्राप्ततत्तदितिकर्तव्यतावती तत्र तत्र सिध्यति । शब्दात्मिका तु लिङादिशब्दानां प्रयोजकानां प्रयोज्यपुरुषकर्मिकाभिधासम्बन्धज्ञानकारणिकार्थवदोदितप्राशस्त्येतिकर्तव्यतावतीति विवेचनीयम् । कथं पुनरभिधा शब्दात्मिका । शब्दव्यापारो हि सः । न । व्यापारतद्वतोरनतिभेदादुपपत्तेः । द्रव्य-

मेव हि पूर्वावस्थातः प्रच्युतं परामवस्थामप्राप्तं पूर्वापरीभूतं व्यापारशब्दवाच्यम् । कथं लिङादीनामभिधा पुरुषकर्मिका । नहि ते पुरुषमभिदधति भावनावचनत्वात् । सत्यम् । भावनैव तैरभिधीयमाना न स्वरूपमात्रेण वर्तमानापदेशवदभिधीयते । किन्तु कुर्यादि(ति) प्रवृत्तिविषयतया । नच शब्दशक्तयोऽनुयोक्तुमर्हन्ति । तथाहि — लिङादिश्रवणानन्तरं प्रयोज्यवृद्धं चेष्टमानमुपलभ्य ततः प्रवृत्तिहेतुप्रत्ययः प्रयोज्यस्यावगम्यत इति तावत सर्ववादिसिद्धमविवादम् । प्रवृत्तिहेतुस्वरूपे तु बहुधा विवादः । तत्र क्रियाफलादीनां व्यभिचारादप्रवृत्तिहेतुत्वात्, प्रमाणान्तरागोचरे तु प्रवृत्तिहेतौ व्युत्पत्त्यसम्भवात्, कर्मफलसम्बन्धानुपपत्तेश्च सकलेतरप्रकारासम्भवाद्विवादसिद्धमभिधेयप्रत्ययबलोन्नीयमानस्वरूपं लिङादीनामभिधानमेव प्रवृत्तिहेतुरिति साम्प्रतम् । सा च प्रवर्तनेति स्थितम् । सा च प्रवर्त्यकर्मिका । प्रवर्त्यश्च पुरुष इति युक्तं पुरुषकर्मत्वमभिधायाः । लिङादिव्यापारोऽप्यभिधेयप्रत्ययहेतुत्वादभिधेत्युच्यते । पुरुषं च प्रवर्तयन् प्रवर्तनेति गीयते । नच सर्वाभिधासु प्रसङ्गः, शब्दशक्तिवैचित्र्यादित्युक्तम् । शक्तिर्हि कार्यदर्शनसमधिगम्या । तद् यतः प्रवृत्तिदर्शनं तद्व्यापारः प्रवर्तना, प्रवृत्तिहेतुत्वात् । नच शब्दान्तरेभ्यः प्रवृत्तिरुपलभ्यत इति न तदभिधायास्तथात्वप्रसङ्गः । यश्चाभिधाया अनभिधाने दोषः उक्तः, सोऽभिधानपक्षाभ्युपगमेनैव परिहृतः । यत्तु कार्योन्नेयत्वादनभिधानत्वमुक्तं तदप्ययुक्तम् । किं हि कार्यमनुपपद्यमानं प्रवर्तनामवगमयति । न तावद् भावनावगतिः, वर्तमानापदेशेष्वपि प्रसङ्गात् । अतोऽनन्यप्रमाणत्वादुपपन्नमभिधेयत्वमभिधायाः । यत्तु अनन्यप्रमाणके व्युत्पत्त्यसम्भव इत्युक्तम् । न, अर्थापत्तिप्रमाणकत्वात् । नन्वर्थापत्त्या प्रवर्तनापदेशसाधारणमभिधाया रूपमुन्नीयते । नच तावन्मात्रं प्रवर्तना लडादिभ्योऽपि प्रवृत्तिसंवेदनप्रसङ्गात् । असाधारणस्तु कोऽपि विशेषो लिङ्प्रवृत्तेः प्रमाणान्तरागोचर एवेति दुष्परिहरो व्युत्पत्तिविरहः । मैवम । प्रवृत्तिहेतुत्वेनार्थापत्तितस्तदवगमात् । तथाहि — यत्र तावत् लिङादिभ्यः प्रवृत्तिरुपलभ्यते, तत्र मया प्रवर्तितव्यमित्यन्तःसङ्कल्पमूलात्मा लिङ्प्रवृत्तिविशेष उन्नीयते । अप्रवर्तमाना अपि प्रवर्तस्वेति मामयमाहेति लिङ्श्राविणो वक्तारं निर्दिशन्ति । तदवसीयते प्रवृत्तिहेतुरभिहितो लिङा । स च नर्ते व्यापारात् सिध्यतीत्युक्तमेव । नच किमात्मको लिङ्व्यापार

इति वाच्यम् । 'अन्तःसङ्कल्पमूलात्मा ह्यसावि'ति वक्ष्यति । नासावुदासीनः कदाचिदवगम्यते । प्रवृत्तिजनन एव हि भावभेदे व्युत्पत्तिरासीदिति स्वयमपि प्रवर्तितव्यमिति प्रतिपद्यमान एव हि लिङर्थं प्रतिपद्यते । नोदासीनमाख्यातान्तरवत् । नो हि फलादयः स्वरूपेणावगताः प्रवर्तयन्ति । अस्य त्वयमेवात्मा यत् प्रवृत्तिधियं जनयति । अपर्यनुयोज्यत्वाद् वस्तुस्वरूपाणां नामाख्यातविभागवदुपपत्तेः । सोऽयमेवमात्मनि लिङर्थे व्युत्पन्नः स्वप्रतिपत्तिकाले न शब्दादृते तमर्थं बुध्यत इत्यनन्यप्रमाणकत्वम् । नतु प्रवर्तनास्वरूपमेवान्यतो नावगतं, येन मतान्तरवद् व्युत्पत्तिविरहश्चोद्येत । सम्प्रति तु न जातेरिव व्यक्तिमन्यतः प्रवर्तनां प्रतिपद्यामह इति शाब्दीमभिदध्महे । नचाभिधा नाभिधीयत इति वाच्यम् । अभिधाशब्दवदुपपत्तेः । यदेव हि शब्दश्रवणानन्तरमनन्यलभ्यं बुद्धौ विपरिवर्तते तदभिधेयम् । तथाच लिङादीनामभिधानमिति किं नाभिधीयते । उक्तं हि 'लिङादिभ्यः प्रवृत्तिहेतुरुपलभ्यत' इति । नच लिङादीनामभिधात्मनो व्यापारादन्यः प्रवृत्तिहेतुः शक्यते निरूपयितुमिति । अतएव नानवस्था । नहि प्रवर्तनावत् तदभिधानमपि शब्दादवगम्यते, यत् तद्दोचरमपरमभिधानमुपेयते । नच लिङादिस्वरूपाभिधानप्रसक्तिः, स्वयमेव तद्व्यापारवैलक्षण्यात् । लिङुपश्लेषे हि विशेषके विशेषणाभिधानमापादितम् । स्वगते तु विशेषे तदनवकाशमेव । सर्वे शब्दव्यापाराः खल्वपि स्वरूपेणैव व्यतिभिद्यन्ते । अतएव विलक्षणाभिधेयप्रत्ययहेतुभावभाजः एकस्या अपि विधिविभक्तेः क्रियाकालादिवन्नाभिधाभिधानमनुपपन्नम् । अतो लिङादीनामभिधा प्रवर्तना सोऽयं विधिः । आह च—

"अभिधां भावनामाहुरन्यामेव लिङादयः ।"

इति । तदनेनैवमात्मना विधिना सम्बद्धा भावना प्रवृत्तिविषयतयावगता फलवत्तया निश्चीयते, स्वसन्ताने फलवतः प्रवृत्तिविषयतयावगतेः । तथाचावगतानुष्ठीयत इति विधिशक्तिमुपक्रान्तामवसीदन्तीमुत्तभ्नाति फलवत्ता, न तु सैव विधिरिति । अतएवापुरुषार्थेषु सागरं तरेदित्येवमादिषु विध्यवगतिः । तथा तत्र न स्यादितरथा तत्र न स्यात् अपुरुषार्थत्वात्(?) । लिङ्व्यापारस्तु तत्राप्यविशिष्टः, निर्वाहिकायास्तु फलवत्तायाः प्रमाणाभावाद् न

स्वप्रत्ययान्तरापेक्षा स्यादनाप्तनरोक्तिषु।
आप्तोक्तिषु नरापेक्षा नोभयं चोदनासु नः ॥ १६॥

अथ वृत्तिकारग्रन्थः।

आदिशब्दो मकारान्तो लुकि क्लेशेन सङ्गतिः।
नञध्याहियते सूत्रे सङ्करात् परिचोदना ॥ १७॥

निर्वहति। तदभावश्चानाप्तवाक्यत्वात्। वेदे त्वपौरुषेयत्वान्न पुरुषदोषाशङ्कापीत्युपपादितम्। 'विधौ तु तमतिक्रम्ये'ति प्रपञ्चितश्च विधिरपि मनागित्युपरम्यते इति ॥ १५ ॥

(अपौरुषेयत्वात्?) अनपेक्षत्वादिति सूत्रावयवं व्याचष्टे — **स्वप्रत्ययेति**। अनाप्तवाक्ये हि दृष्टव्यभिचारित्वात् तज्जनितात् प्रत्ययात् प्रत्ययान्तरं स्वीयमर्थावधारणायापेक्षते। नच तत्राप्यनाप्तवचः प्रमाणमनुवादत्वात्। आप्तोक्तीनां तु प्रमाणविषयगोचराणां प्रामाण्यात् तस्यैवाप्तस्य नरस्यापेक्षा किमयमर्थोऽनेन प्रमाणेनोपलब्धो न वेति। नचेयमुभय्यप्यपेक्षा चोदनासु सम्भवति, अपौरुषेयत्वस्य वेदाधिकरणे वक्ष्यमाणत्वात्। तत उपपन्नं चोदनायाः प्रामाण्यमिति ॥ १६ ॥

अत्रानन्तरं वृत्तिकारमतारम्भभाष्यं — "वृत्तिकारस्त्वन्यथेमं ग्रन्थं वर्णयाञ्चकार तस्य निमित्तपरीष्टिः इत्येवमादिमि"ति। तत्रादिशब्दे तावद् द्वैविध्ये साध्वसाधुविवेकार्थमाह — **आदिशब्द** इति। **मकारान्तोऽयमादिशब्दः** न लुगन्त इति। कारणमाह — लुकीति। सामान्यविवक्षायां तु नपुंसकलिङ्गता। अत्र च प्रथममेव ग्रन्थात्मके विशेषेऽवगते न सामान्यविवक्षा युक्तेति। भित्त्वा तु वाक्यं सामान्यविवक्षायां क्लेशो भवतीति। अपरमपि वृत्तिकारमतेन परीष्टिसूत्रव्याख्यानार्थं भाष्यं 'न परीक्षितव्यं निमित्तमि'ति। तदयुक्तम्। सूत्रे नञोऽश्रुतत्वात्, अत आह — नञिति। इदं हि सूत्रं विधिनिषेधशून्यमपरिपूर्णं नञध्याहारेण परिपूर्यते। प्रसिद्धस्य धर्मनिमित्तस्य परीक्षाविधेरयोग्यत्वादिति व्याख्याते तु नञध्याहारेण परीष्टिसूत्रे प्रत्यक्षसूत्रमवतारयितुं भाष्यकृतोक्तं — 'ननु व्यभिचारात् परीक्षितव्यं निमित्तं शुक्तिका हि रजतवत् प्रकाशते यतः' इति। एवंह्यत्र परि-

प्रमाणलक्षणाज्ञानाद् व्यभिचारात् परीक्षणम् ।
नैतत् प्रत्यक्षमित्येवमपरीक्षोपसंहृता ॥ १८ ॥
तत्रान्यस्यायथार्थत्वं प्रत्यक्षे तु यथार्थता ।

चोदितं — न प्रसिद्धत्वं निमित्तापरीक्षायां हेतुः, प्रसिद्धतरस्य प्रत्यक्षस्य शुक्तिरजतवेदने व्यभिचारादिति । तदयुक्तं, नहि प्रत्यक्षं व्यभिचरति अपितर्हि तदाभासम् । नचाभासव्यभिचारे प्रमाणव्यभिचारपरिचोदना युज्यते । अत आह — सङ्करादिति । प्रत्यक्षतदाभासयोरक्षजत्वेन सादृश्यान्मोहादाभासव्यभिचारेऽपि प्रत्यक्षव्यभिचारं चोदयतीति ॥ १७ ॥

तदेव प्रपञ्चयति—**प्रमाणे**ति । वक्ष्यमाणपारमार्थिकप्रत्यक्षलक्षणाज्ञानाद् व्यभिचारात् परीक्षा कार्येति चोदयति । एतत्परिचोदनोत्तरतया प्रत्यक्षसूत्रमुपवर्णितं 'नैतदेवम् । यत् प्रत्यक्षं न तद् व्यभिचरति । यद् व्यभिचरति न तत् प्रत्यक्षम् । किं तर्हि प्रत्यक्षम् । तत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म सत्प्रत्यक्षम् । यद्विषयं ज्ञानं तेनेन्द्रियाणां पुरुषस्य सम्प्रयोगे यद् बुद्धिजन्म तत् सत्प्रत्यक्षम्' । नचेदृशस्य व्यभिचारोऽस्ति । तदिदं वार्त्तिककारो दर्शयति — नैतदिति । परीष्टिसूत्रेणापरीक्षा प्रतिज्ञाता प्रत्यक्षसूत्रेणोपपाद्योपसंहृतेति ॥ १८ ॥

कथं पुनरेवंलक्षणकेऽपरीक्षा सिध्यतीत्यत आह— **तत्रे**ति । तत्र हि प्रत्यक्षलक्षणे । यदनेवंलक्षणकं तदयथार्थम् । प्रत्यक्षं तु यथार्थमेव । अयथार्थाशङ्का तु परीक्षायां हेतुरिति युक्तमपरीक्ष्यत्वमिति ।

किं पुनरयथार्थज्ञानम् । शुक्तौ रजतमिति । सा खलु दोषवशादन्याकारेणावभासत इति भवति तद्गोचरज्ञानमयथार्थम् । तदिदमयुक्तम् । नहि शुक्तौ रजतमिति भासते । किं तर्हि इदमिति शुक्तिरजतसाधरणात्मना पुरोवर्ति द्रव्यं गृह्यते । अनन्तरं च सदृशदर्शनोद्बोधितप्राचीनरजतानुभवप्रभावितभावनाबीजजन्मा दोषवशाल्लुप्ततदवमर्शा रजतमिति स्मृतिरुदेति । तदेते द्वे एव ग्रहणस्मरणात्मके विज्ञाने । तद्गोचरयोश्च दोषवशादेव भेदकधर्मानवधारणम् । भेदाग्रहणादेव विभ्रमव्यवहारः, न पुनरन्यस्यान्यथाभासनात् । इदमिह भासत इति प्रतीतिसाक्षिकम् । अतः कथं रजतरूपरूपितस्य शुक्तिरालम्बनम् । इदमेव ह्यालम्बनस्यालम्बनत्वं यदात्माकार-

ज्ञानजननम् । अतो नातदाकारस्य तदालम्बनमिति ज्ञानमेव साकारमिति बलादापतितम् । न खलु रजतमिति शुक्तेराकारः । रजतं तु नासन्निहित-मक्षजज्ञानालम्बनमिति युक्तम् । अतो बाह्यरहितं निरालम्बनमेव ज्ञान-मिति बलादापन्नम् । एवञ्च शुचैव निरालम्बनानुमानग्रन्थाख्यानग्रयासः । अपिच दोषनिबन्धनो विभ्रमः । दोषाश्च स्वकार्ये शक्तिविघातहेतवः । अतो युक्तं तद्वशेन भेदकधर्मानवधारणं, न पुनरन्यस्यान्यथा भानम् । अपिच एवमयं विपरीतख्यातिवादी वक्तव्यः रजतधियः शुक्तिगोचरायाः किं निबन्धनमिति । न तावदिन्द्रियं प्राप्यकारित्वाद्, असन्निहितरजत-प्राप्त्यसम्भवात् । अन्यप्राप्तौ चान्यप्रकाशनेऽतिप्रसङ्गात् । प्रमाणान्तरं त्वस-म्भवादनुपन्यसनीयम् । अतो ग्रहणकारणाभावात् स्मृतिरियमिति निश्चीयते । अस्ति हि स्मृतेः कारणं पूर्वानुभवप्रभावितोभयवादिसिद्धा भावना । नन्वसति तत्परामर्शे स्मरणमपि नोपपन्नम् । न नोपपन्नम् । अनुभूतविषयं हि ज्ञानं स्मृतिः । न तदिति परामर्शः । तस्मादिदं रजतमिति ग्रहण-स्मरणयोरुभयोरपि यथार्थत्वाद् यथार्थायथार्थज्ञानविभागो दुर्भणः ।

अत्र वदामः—यदि द्वे अप्येते यथार्थे, न तर्हि भ्रान्तिः । अयथार्थ-ज्ञानं भ्रान्तिरिति लौकिका मन्यन्ते । स्मरामीत्यग्रहो भ्रान्तिरिति चेत् । तन्न । भाष्यकारो हि "स एवासमीचीनः प्रत्यय" इति प्रत्ययमस-मीचीनं दर्शयति । अपिच कोऽयमग्रहः । ग्रहणाभाव इति चेत् । अभावो नाम न कश्चिदायुष्मतां यो भ्रान्तिरित्युच्यते । ननु स्मरणमेव स्मरामीत्यु-लेखशून्यमग्रहणमाचक्ष्महे न तत्त्वान्तरम् । एवं तर्हि रजतमिति स्मृति-र्भ्रान्तिः । नच तद् युक्तम् । मिथ्या भ्रान्तिरिति पर्यायौ, न स्मृतिर्मिथ्या, यथावस्थितार्थविषयत्वात् । पूर्वानुभूतदेशकालाग्रहो भ्रान्तिरिति चेत् । न । अन्यानवभासोऽवभासान्तरं मिथ्याकरोति, सर्वमिथ्यात्वप्रसङ्गात् । नह्येकस्मिन् भासमाने सर्वं भासते । अतो यद्यपि रजतस्य देशकालौ न स्मर्येते, रजतं तु यथावस्थितं स्मृत्या विषयीकृतमिति न भ्रान्तिः । अथ सापेक्षत्वात् स्मृतेरप्रामाण्यम्, अतो भ्रान्तिरिति चेत् । यद्येवं सर्वस्मृतीनां भ्रान्तित्वापातः, अविशेषात् । नच स्मरन् भ्राम्यतीत्युच्यते । अथ मतं—गृह्यमाणस्मर्यमाणयोर्विवेकाग्रहो भ्रान्तिरिति, उक्तमस्माभिः नाग्रहो नाम कश्चिदृते ग्रहणस्मरणाभ्याम् । तयोश्च न ग्रहणं भ्रमः, प्रमाणत्वात् । नच

स्मृतिः । व्यभिचारादतिप्रसङ्गाच्च । विवेकाग्रहे च विभ्रमे सर्वसंविदां भ्रान्तित्वप्रसङ्गः । अवश्यं हि येनकेनचिद् विवेको न गृह्यते । स्यान्मतं—व्यवहारविसंवादो मिथ्यात्वमिति, तन्न । तद्धेतोरभावात् । यदि खल्विदमिति ग्रहणं रजतमिति देशकालानवच्छिन्नं रजतस्मरणं, को व्यवहारहेतुः । नो खलु रजतपदादनधिष्ठानं रजतं स्मरन् रजतमिति व्यवहरत्यत्रेदमिति तद्विद्वान् । यो यदर्थी स तदुपादित्सया चेष्टते । अनधिष्ठानं तु रजतं जानतो न व्यवहारहेतुमुपलभामहे । अपिच कोऽयं नियमः स्मृतरजतस्तदर्थी शुक्तावेव प्रवर्तत इति । यदि ह्ययं तामेव रजतं जानीयात्, ततस्तत्र प्रवर्तत इति युक्तम् । इतरथा लोष्टादावपि प्रवर्तेत । नह्ययं शुक्तेरिव रजतं ततोऽपि विविनक्ति । अवश्यं स्थूलोऽपि विवेको जिघृ(क्षि?क्ष)तो नानुभूयते । अथोच्यते—ज्ञानद्वयमप्येतद् विवेकाग्रहणात् सत्यरजतसंविदो भिन्नमिति नावभासते । सा च व्यवहारहेतुतयावगता । ततोऽप्यापि प्रवर्तत इति । अहो दुरूहमिदमूहितम् । इदं तु ब्रूमः—किमिह सत्यरजतसंविदो विवेको नावभासते, तदभेदो वा भासते इति । पूर्वस्मिन् कल्पे पूर्ववत् प्रवृत्त्यभावः । उत्तरस्मिन् विपरीतख्यातिवादः । संवित्ती भिन्ने अभिन्ने भासेते वस्तुनी चेति न विशेषः । अथ सत्यरजतबोधतुल्यतां मन्यते न तत्त्वं, न तर्हि तद्बद्धावे तद्व्यवहारः । नहि गवा सदृशं गवयं जानन् गौरयमिति व्यवहरति । व्यवहारविसंवादे च भ्रान्तिहेतावतदर्थिनो व्यवहाराभावाद् भ्रान्त्यभावः । तस्यापि शब्दप्रयोगोऽस्तीति चेद्, न । निर्विकल्पकभ्रान्तौ तददर्शनात् । स्वतन्त्रस्मृतं च रजतमप्रसक्तं कथं शुक्तौ निषिध्यते नेदमिति । प्राप्तिपूर्वको हि प्रतिषेधो भवति । स कथमसत्यां प्राप्तावात्मानं लभते । ननु नात्र किञ्चिद् बाध्यते । किन्त्वनवगतो विवेकोऽवगम्यते नेदं रजतमिति । कोऽर्थः । शुक्तेर्विविक्तं रजतमिति । अहो व्याख्यानकौशलं तत्रभवतां यत् संविदोऽप्यन्यथा व्यवस्थिता अन्यथा व्याख्यायन्ते । रजतव्यवहारो बाध्यत इति चेद्, न । तस्याप्यप्रसक्तेरुक्तत्वात् । अप्रसक्तव्यवहारस्य बाधविरहप्रसङ्गात् । व्यवहारबाधोऽपि न राजाज्ञया । अपितर्हि, प्रसक्तताद्रूप्यनिवारणेन । अतोऽन्यदन्याकारेण प्रसक्तं बाध्यत इति साम्प्रतम् । अपिच स्पष्टीकृता तादूप्यप्रसक्तिरिदं रजतमिति । नन्वनालम्बनता प्राप्नोतीत्युक्तम् । सत्यम् । यदन्यथासन्तमन्यथा प्रतिपद्यते तन्निरालम्बनं ज्ञानमि-

यदाभासं हि विज्ञानं तत्संयोगे तदिष्यते ॥ १९ ॥

सम्पूर्णलक्षणं ह्येतत् तत्सतोर्व्यत्ययः कृतः ।

शोभनार्थस्तु सच्छब्दो यद्वाध्याहारकल्पना ॥ २० ॥

ष्यते । किमिहाद्भुतं बाह्यानालम्बनता हि यत्नतो नः प्रतिषेध्या, सर्वत्र देशान्तरादिगतबाह्यालम्बनताभ्युपगमात् । कथमसन्निहितं ज्ञानमुत्पादयतीति चेत् । किमयं प्रत्यक्षधर्मः सर्वज्ञानेष्वारोप्यते । प्रत्यक्षं हि सन्निहितवर्तमानगोचरं, न ज्ञानान्तराणि । नचेदं प्रत्यक्षमाभासत्वात् । यदप्युक्तं — कथमन्यसम्प्रयुक्तमिन्द्रियमन्याकारस्य ज्ञानस्य हेतुरिति । उक्तमत्र भाष्ये — 'दोषो मिथ्याज्ञानस्य कारणमि'ति । तद्भावे हि मिथ्याज्ञानं भवति । असति तस्मिन् सम्यग्ज्ञानदर्शनात् । ननु दोषाः कार्यं विघ्नन्ति, न कार्यान्तरं जनयन्ति । न । स्वप्ने मनोदोषादवर्तमानस्यापि वर्तमानवद् ज्ञानात्, कारणाधीनात्मलाभं हि कार्यं तद्दोषे दुष्यतीति नानुपपन्नम् । एष ज्ञानस्य दोषो यदन्यगोचरस्यान्याकारत्वम् । अतः सन्निहितमसन्निहितजाताकारेणावलम्बते दुष्टकारणजं ज्ञानमित्युभयालम्बनस्य ज्ञानालम्बनत्वम् । आत्मेन्द्रियमनोर्थसन्निकर्षो हि ज्ञानस्य हेतुः । सोऽसत्सु दोषेषु सम्यग्ज्ञानहेतुः, सत्सु तु विपरीतज्ञानहेतुरिति सूक्तो यथार्थायथार्थज्ञानविभाग इति । किं पुनः प्रत्यक्षस्य लक्षणं, येन तद् यथार्थमत आह—**यदाभासमिति** । यदाकारं ज्ञानं तेनेन्द्रियाणां सम्प्रयोगे यत् पुरुषस्य बुद्धिजन्म तत् प्रत्यक्षमिष्यते । कथं तदयथार्थं भविष्यतीति ॥ १९ ॥

ननु लक्षणपरत्वे सूत्रस्यातिप्रसक्तिरुक्ता । नचाप्येतेन सूत्रेण प्रत्यक्षं लक्ष्यत इति वदता कथमिदानीं लक्षणपरतया सूत्रं वर्ण्यते । अत आह — **सम्पूर्णेति** । यथावस्थितं सूत्रमाभाससङ्कराद्लक्षणम् । वृत्तिकारमते तु व्यत्यस्तं शक्नोति लक्षणं लक्षयितुमिति, कथं पुनः सम्पूर्णमत आह — तत्सतोरिति । यथाश्रुते हि सूत्रे इन्द्रियसम्प्रयोगजत्वमात्रं प्रत्यक्षलक्षणम् । तच्चाभासेऽप्यविशिष्टमित्यतिप्रसज्यते । व्यत्यस्तेन तु तदा बुद्ध्याकारपरामर्शनाद् भासमानाकारेन्द्रियसम्प्रयोगे या बुद्धिः सा प्रत्यक्षमित्युपस्कारे शुक्तिरजतज्ञाने भासमानेन्द्रियसम्प्रयोगाभावान्न प्रत्यक्षमतिप्रसज्यत इति । उत्कृष्टस्य सच्छब्दस्यार्थमाह — शोभनार्थ इति । ननु पूर्व

अर्थापत्त्येतरेषां च प्रत्यक्षाभासलक्षणम् ।
बाधकज्ञानलाभो हि पूर्वाबाधे न सम्भवेत् ॥ २१ ॥
स चास्तीत्यवबोधत्वे सति नान्योन्यसंश्रयम् ।
नचानागतबाधेन पूर्वेणात्मा हि लभ्यते ॥ २२ ॥

वर्तमानार्थतया सम्प्रयोगविशेषणार्थः सच्छब्दो व्याख्यातः । कथमिदानीं शोभनार्थ इत्युच्यते । युक्तं च सम्प्रयोगविशेषणम् । अविशिष्टे हि तस्मिन्ननागतादिसम्प्रयोगजं योगिप्रत्यक्षमनिराकृतं स्यादिति प्रागेवोक्तम् । तद्वृत्तेनापि व्यवहितपठितेन समासो दुष्प्रतिपादतरः । पुनरपि चेदृशं यत्तत्सम्यक्प्रत्यक्षमिति तदपेक्षा विद्यत एवेति व्यत्ययेऽपरितुष्यन् प्रकारान्तरमाह — यद्वेति । द्वयोरपि तत्सतोरत्राध्याहारः । तत्र भासमानाकारपरामर्शार्थोऽध्याहृतस्तच्छब्दः । परस्तु प्रत्यक्षरूपपरामर्शार्थः । सच्छब्दस्तु सम्प्रयोगसन्निधिपठितस्तद्विशेषणार्थ एव । अध्याहृतस्तु शोभनार्थ इति विवेचनीयमिति ॥ २० ॥

ननुच आभासलक्षणाकथनान्न प्रत्यक्षतदाभासविवेको दर्शयितुं शक्यते, अत आह—अर्थापत्त्येति । ईदृशं प्रत्यक्षमित्युक्ते अर्थादनीदृशमाभासं भवतीति । अत्र भाष्यकारेण कथं तदतद्योगजत्वविवेकोऽवगम्यत इत्याशङ्क्योक्तं 'बाधकं हि यत्र ज्ञानमुत्पद्यते नैतदेवमिति तदन्यसम्प्रयोगे। विपरीतस्तत्सम्प्रयोगे' इति । तदयुक्तम् । किं हि कारण यदुत्तरेण पूर्वं बाध्यते, पूर्वेणैव जघन्यमुत्तरं बाध्यत इति युक्तमत आह — बाधकेति । तद्धि बाधकं यदन्याबाधकमात्मानमेव न लभते । तथाचोत्तरम् । अतस्तत् पूर्वं बाधत इति युक्तम् । जघन्यमपि पूर्वानपेक्षं बलवदिति षष्ठे वक्ष्यते । यत्र पूर्वापेक्षमुत्तरं, तत्र पूर्वं बलवदिति तृतीय उक्तमिति ॥ २१ ॥

किं पुनरुत्तरेण मिथ्या सतः पूर्वस्य बाधः प्रमाणस्य वा । प्रमाणस्य बाधेऽतिप्रसङ्गः । मिथ्यात्वं तु नर्ते बाधात् सिध्यति, तदधीनो बाध इति इतरेतराश्रयमत आह — स चेति । नखलु पूर्वमिथ्यात्वावधारणादुत्तरस्य जन्म, अपितर्हि । तन्निरपेक्षमुत्तरं स्वकारणादेवोत्पन्नम् । अतो नोत्पत्तावन्यापेक्षत्वम् । नच कार्यकल्पौ । अवबोधरूपत्वादवबोधस्य । तस्य च स्वगोचरप्रकाशनेऽन्यानपेक्षणात् । अतो नान्योन्याश्रयत्वमिति । यदि तर्हि पूर्वानपेक्षमुत्तरमिति तद् बाधकं, पूर्वं वा किमुत्तरमपेक्षते येन बाध्यते ।

निमित्तदोषबोधेन पश्चाद् यत्राप्यबाधनम् ।
भवत्येव हि तत्रापि नरान्तरविपर्ययः ॥ २३ ॥
सर्वेषां सर्वदा यत्र धीः स्यात् तत्र न बाधनम् ।
नहि कारणदुष्टत्वबुद्धिस्तत्र बलीयसी ॥ २४ ॥
जात्यादिषु यदा जाता बुद्धिः पश्चादसम्भवात् ।

तदपि हि निरपेक्षमेव, अत आह — नचेति । यद्यपि तदुत्तरानपेक्षं, तथाप्यनागतोत्तरबाधकात्मकत्वेनानवभासान्न बाधकमिति ॥ २२ ॥

यत्र तर्हि नैतदेवमिति न बाधकोदयः, अपितर्हि निमित्तेदापज्ञानं, तत्रेतरेतराश्रयमपरिहार्यम् । निमित्तदोषेण तत्रोत्थाप्यो बाधः । स च पूर्वाप्रमाणत्वे शक्यत उत्थापयितुं, तदुत्थापनाच्च तदप्रमाणमिति नावकल्पते, अत आह — **निमित्तेति** । प्रायेण हि शङ्खादिषु पीतादिविभ्रमाः पित्तादिदोषेभ्यः समुत्पन्नाः पश्चाद् बाध्यन्ते । नेदं पीतं शुक्लोऽयमिति हि सम्प्रतिपत्तिः सम्भवति । अतो न तत्र निमित्तदोषबोधमात्रान्मिथ्यात्वम् । यत्र तु ज्ञातेऽपि निमित्तदोषे तद्रूपप्रत्ययानुवृत्तेः पश्चादबाधनमेव, यथा दिङ्मूढस्य जानतोऽपि निमित्तदोषाद् दिङ्मोहो न निवर्तते । तत्रापि नरान्तरविपर्ययादन्यतः परिच्छेदान्नेतरेतराश्रयमिति ॥ २३ ॥

यत्र तर्हि न नरान्तरादिषु विपर्ययः तत्र कथं यथा जात्यादिविज्ञाने । नच तत् सत्यं, तेषां व्यतिरेकाव्यतिरेकविकल्पाक्षमत्वादत आह — **सर्वेषामिति** । यद्धि देशान्तरादिषु न विपर्येति तदबाध्यं सम्यगेवेति । ननु तत्रापि अनुपपत्तेर्बाधिका धीरुत्पाद्या, कथं सम्यक्त्वमत आह — नहीति । प्रत्यक्षो ह्यविकलकरणस्य पिण्डात् पिण्डान्तरेषु पूर्वरूपावमर्शः । स कथं यौक्तिकेन बाधेन बाध्यते । यस्य ह्यव्युत्पद्यमानस्य बलवता मुखं निरुध्यते न तदात्मानं लभते । उक्तं च स्वयूथ्यैरपि — 'न प्रत्यक्षविरुद्धकारणविषयमनुमानमात्मानं लभते अग्नाविव शैत्यानुमानमि'ति ॥ २४ ॥

अयमसावितरेतराश्रयस्य व्यक्तो विषय इत्याह — **जात्यादिष्विति** । अत्र हि जात्यादिज्ञानमिथ्यात्वाद् बाधकबुद्धयुदयः । तदुदये तन्मिथ्यात्वम् । नच व्यक्तोदिता शुक्तिरजतज्ञानादिष्विव बाधिका धीरस्तीति ।

नाद्रियते युक्तिभिस्तत्र व्यक्तमन्योन्यसंश्रयम् ॥
स्वतः प्रामाण्यतश्चात्र निर्णयोऽस्तित्वबोधनात् ।
तद्रूपप्रत्ययोत्पत्तेस्तदसद्वादिनामपि ॥ २६ ॥

इति वृत्तिकारग्रन्थः ।

यदि तर्हि बाधकज्ञानमन्तरेण न कारणदोषमात्रान्मिथ्यात्वमवगम्यते, कथमुच्यते 'यस्य च दुष्टं करणं यत्र चं मिथ्येति प्रत्यय इति' भेदेन । तदा हि मिथ्यात्वप्रत्यय एवासमीचीनतायां हेतुरुक्तः स्यात् । तस्माद् वक्तव्यो विषयः । स उच्यते — येन तर्हि प्रागेकश्चन्द्रोऽवधारितः सम्प्रत्यङ्गुलीनिपीडितलोचनो द्वौ पश्यति । तस्य प्राचीनज्ञानानुसारेण जातविचिकित्सस्याधुना च व्यक्तं कारणदोषमवगतवतो भवति निर्णयः । यथा पूर्वज्ञानमदुष्टकारणजम् । इदं च व्यक्तावगतकारणदोषप्रभवम् । कारणदोषनियतश्च कार्यदोषः । तस्मादसमीचीनम् । तदिह पूर्वानुभवो विचिकित्सोदयहेतुः । कारणदोषावधारणादेव मिथ्यात्वावधारणम् । एवं बाह्यागमानामपि कारणदोषावधारणादेव मिथ्यात्वावधारणम् । नहि तदर्थाः साक्षाद् बाध्यन्ते । पौरुषेयत्वात् कारणदोषाशङ्कयैव मिथ्यात्वं भवतीति युक्तमेव द्वैविध्यम् ॥ २५ ॥

ननु मा बाधि जात्यादिज्ञानम् । प्रमाणत्वं तु तस्य कथं, प्रमाणतदाभाससाधारणं हि ज्ञानत्वम् । अतो व्यभिचारदर्शनात् संशयो युक्तः । वृत्त्यादिविकल्पाश्चाप्रामाण्यमनापादयन्तोऽपि तद्वत् प्रामाण्यं विघ्नन्ति । अत आह — **स्वत** इति । यदि ज्ञानत्वानुबन्धिनी प्रमाणत्वाप्रमाणत्वे द्वे अपि स्यातां, स्यादेवानिर्णयः । स्वतस्तु प्रमाणमित्युपपादितम् । अतो जात्याद्यस्तित्वबोधादनपोदितो निर्णयो युक्तः । स चायं बोधो न परमस्माकमेव । येऽपि तु जात्यादीनपलपन्ति, तेषामप्यस्ति । तेऽपि हि न तद्बोधमनपलपन्तो जात्यादीनपलपितुमर्हन्तीति ॥ २६ ॥

इत्युपाध्यायसुचरितमिश्रकृतौ कारिकाटीकायां
वृत्तिकारग्रन्थव्याख्या ॥

अथ निरालम्बनवादः ।

प्रमाणत्वाप्रमाणत्वे पुण्यपापादि तत्फलम् ।
विध्यर्थवादमन्त्रार्थनामधेयादिकल्पना ॥ १ ॥

सर्वेषु लक्षणेष्वेवं स्वप्रमाणगणैः स्थितिः ।
वचनव्यक्तिभेदेन पूर्वसिद्धान्तपक्षता ॥ २ ॥

कर्मिभ्यः फलसम्बन्धः पारलौक्यैहलौकिके ।
सर्वमित्याद्ययुक्तं स्यादर्थशून्यासु बुद्धिषु ॥ ३ ॥

अत्र भाष्यकारेण 'ननु सर्व एव निरालम्बनः स्वप्नवत् प्रत्ययः' इत्याक्षेपपुरस्सरं 'जाग्रतो हि बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यती'ति बाह्यार्थसद्भावः प्रतिपादितः । तस्य प्रकृतवेदार्थविचारोपयोगं दर्शयति — **प्रमाणत्वेति** चतुर्भिः । सर्वो ह्ययं मीमांसाप्रपञ्चो बाह्यार्थाश्रय एव । यथा तावच्चोदनैव धर्मे प्रमाणं, योगिप्रत्यक्षबुद्धागमाद्यप्रमाणमिति चोदनासूत्रे प्रतिज्ञातं, तदसति बाह्ये चोदनापदार्थे दुःस्थितमेव । प्रमाणत्वोपन्यासेनैव तत्परिकरप्रथमपादोक्तसम्बन्धौत्पत्तिकत्वशब्दनित्यत्ववाक्यार्थप्रतिपत्तिमूलसद्भावापौरुषेयवेदवाक्यरचनादिपरिग्रहः । अप्रमाणत्वोपन्यासेन च प्रत्यक्षसूत्रनिर्दिष्टान्याप्रमाणत्वकारणोपादानमिति दर्शयितव्यम् । तथा यदपि चोदनासूत्र एव श्रुत्यार्थेन च पुण्यपापापरनाम्नोर्धर्माधर्मयोः स्वरूपं प्रतिज्ञातं, तदपि नासति बाह्येऽर्थे शक्यं दर्शयितुम् । तत्र हि विधिनिषेधात्मकचोदनाप्रमाणकं पुण्यपापयोः स्वरूपमिति वर्णितम् । आदिशब्देन पुण्यपापोभयरूपरहितमशुभेभ्यो निवर्तनमुपादत्ते । यदर्थसाधनं वस्तु तद्विपरीतं वा तत् पुण्यपापपदयोरास्पदम् । अशुभेभ्यो निवर्तनं तु न सुखाय न दुःखायेत्युभयरूपरहितम् । एतदपि चोदनासूत्रस्थेनार्थपदेन प्रतिपादितम् । तत्फलमिति च त्रिविधस्य पुण्यपापोदासीनात्मनो वेदप्रमेयस्येष्टानिष्टात्मकं फलमुपादत्ते । एतदपि स्वरूपप्रतिज्ञान्तर्गतमेव । नह्यनाश्रितफलसम्बन्धं धर्मादिस्वरूपमनुभवितुं शक्यमिति । तदेवं

तावद् बाह्यार्थसिद्धेरस्ति प्रथमपादोक्तसमस्तोपयोगः । तथा वक्ष्यमाणोपयोगोऽपि । नहि विध्यर्थवादमन्त्राणां साध्यसाधनसम्बन्धविधिविधेयस्तुतिविहितस्मृतिरूपार्था अर्थवादपादगोचरा बाह्यार्थं विना सिध्यन्ति । औदुम्बराधिकरणे हि 'औदुम्बरो यूपो भवत्यूर्जोपरुध्या' इत्यत्र विध्यभावान्न फलपदसम्बन्धः सिध्यत्यौदुम्बरत्वस्येति वक्ष्यते । तथार्थवादाधिकरणेऽर्थवादानां स्तुत्युपयोगो दर्शितः । एवंहि तत्रोक्तम् 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' (१. २. १) इति । अस्यार्थः—यानि हि क्रियां क्रियासम्बद्धं वा कञ्चिदर्थं प्रतिपादयन्ति, तानि सन्तु प्रमाणम् । यानि त्वक्रियार्थानि 'सोऽरोदीद् यदरोदीदि'त्यादीनि तानि न कञ्चिद्धर्मं प्रमिमते इति पूर्वपक्षिते उक्तं 'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः' (१. २. ७) इति । अस्यायमर्थः—विधेयानां स्तुतिरूपेणार्थेनार्थवादाः प्रमाणं स्युरिति । कथं पुनः स्तुत्यर्थता । नह्यनपेक्षिता स्तुतिरर्थवादानामर्थो भवितुमर्हति । न । अपेक्षितत्वात् । अपेक्ष्यते खल्वपि शब्दभावनापरनामधेयेन विधिना स्तुतिः । स हि पुरुषं प्रवर्तयन् प्रवृत्तिविषयप्राप्तिस्त्यज्ञानमपेक्षते । अर्थवादाश्च स्वाध्यायविध्यध्यापितास्तद्बलेनैवाप्रयोजनसम्पदो न पर्यवस्यन्ति । तत्रैव किं कर्तव्यमित्यपेक्षिते तच्छक्तिनिरूपणायामक्षरग्रहणादिक्रमेण कथञ्चित् प्ररोचनायां बुद्धावुत्पन्नायां तत्कार्यत्वमर्थवादानां निश्चीयते । विधिर्हि प्ररोचनामपेक्षते, ते च तां शक्नुवन्ति कथञ्चिदुत्पादयितुमित्यनन्यप्रयोजनतया मनसि विपरिवर्तमानास्त एव तत्प्रयोजनतया निश्चीयन्ते । तदेष शास्त्रार्थो भवत्यर्थवादैरेव प्ररोचितं कर्माभ्युदयाय घटत इति । विधिस्वरूपं च प्रागेवोक्तमिति नेह प्रतन्यते । मन्त्रार्थोऽपि मन्त्राधिकरणे वक्ष्यते । तत्र 'बर्हिर्देवसदनं दामी'त्यादिमन्त्रानुदाहृत्य विचारितं—किममी उच्चारणमात्रादेवादृष्टार्थाः, उतार्थप्रकाशनार्था इति । तत्र 'तदर्थशास्त्रात्' (१. २. ३१) इत्याद्युपपत्तिभिरदृष्टार्थतया पूर्वपक्षितं यमेव ह्यर्थं मन्त्रः प्रकाशयति तत्रैवायं ब्राह्मणेन विनियुज्यमानो दृश्यते । यथा प्रथममन्त्रः 'उरु प्रथस्वे'ति पुरोडाशं प्रथयतीति । यदि चायमर्थपरः, लिङ्गेनैव तत्र विनियोगे सिद्धे विनियोगानर्थक्यम् । अतोऽविवक्षितवचना मन्त्राः इति पूर्वपक्षिते अभिहितम्—'अविशिष्टस्तु

वाक्यार्थः' (१. २. ४०) इति । यथा हि ब्राह्मणवाक्यानामर्थः प्रतीयमानो नाविवक्षितो भवति तथा मन्त्राणामपि । तेऽपि ह्यनुष्ठानौपयिकमर्थं प्रकाशयन्तः किमविवक्षितवचना मन्त्रा भविष्यन्ति । दर्शपूर्णमासादयो ह्यनुष्ठानकालेऽस्मृतानुष्ठानासम्भवादनु(ति)ष्ठासितस्वपदार्थस्मृतिहेतुमपेक्षन्ते । मन्त्राश्चार्थवादवदेव स्वाध्यायाध्ययनविधिबलप्रतिलब्धाध्ययनसंस्कारसम्बन्धात् किंस्विदस्माभिः कर्तव्यमित्यपेक्षमाणा विलम्बन्ते । तत्राशक्तिके विनियोगासम्भवात् तच्छक्तिनिरीक्षणायां क्रत्वपेक्षितानन्यसाधितविहितस्मृतिप्रयोजना निश्चीयन्ते । यथाहुः —

"अनुष्ठाने पदार्थानामवश्यम्भाविनी स्मृतिः ।
अनन्यसाधनानन्यकार्यैर्मन्त्रैर्नियम्यते ॥"

इति । यत्तु विनियोगानर्थक्यमुक्तं, तन्न । अर्थवादार्थत्वाद् वाक्यस्य । प्रथनं हि तत्र श्रूयते । ईदृशमिदं प्रथनं प्रशस्तं यत् क्रियमाणमनेन मन्त्रेण क्रियत इति । सोऽयं विध्यर्थवादमन्त्राणामर्थो नासति बाह्येऽर्थे सिध्यति । तथा 'उद्भिदा यजेत पशुकामः' इत्युदाहृत्य विचारितं किमयं गुणविधिः उत कर्मनामधेयमिति संशय्य, प्रवृत्तिविशेषकरतया गुणविधिरिति पूर्वपक्षितम् । गुणं हि विदधतां प्रवृत्तिविशेषकरत्वम् । इतरथा नाममात्रमनर्थकम् । शक्नुवन्ति चोद्भेदनक्रियायोगवशेन किञ्चित् खनित्राद्यर्थमभिधातुमिति गुणविधय इति प्राप्ते उक्तं— न गुणविधयः । कर्मसमानाधिकरणा ह्येते, तृतीयानिर्देशात् । कर्म खल्विह 'उद्भिदा यजेत पशुकामः' इति पशुभावनाकरणत्वेनाभिहितं यजेत पशुकाम इति । किमुक्तं, यागेन पशून् भावयेदिति । अत उद्भिदा यागेनेति व्यक्तमेव सामानाधिकरण्यम् । गुणविधौ तु यागस्योद्भित्त्वाभावादुद्भिद्वता यागेनेति मत्वर्थलक्षणया सामानाधिकरण्यं स्यात् । तत्र च लक्षणैव दोषः । नन्वेवं 'व्रीहिभिर्यजेते'त्येवमादावपि भावनाकरणेन यजिना समभिव्याहृता व्रीह्यादिशब्दाः कर्मनामधेयतां प्रतिपद्येरन् । न । तेषां निरूढार्थत्वात् । अज्ञातसन्दिग्धार्थस्य हि पदस्य प्रसिद्धसामानाधिकरण्यादेवार्थो निश्चीयते । निरूढं तु स्वार्थान्न प्रच्यावयितुं शक्यते । आह च —

"पदमज्ञातसन्दिग्धं प्रसिद्धैरपृथक्श्रुति ।
निर्णीयते निरूढं तु न स्वार्थादपनीयते ॥"

इति । अतः पशूनामुद्भेदनं प्रकाशनमनेन कर्मणा क्रियते इति योगादुद्भिच्छब्देन कर्माभिधीयते । गुणफलसम्बन्धविधानेनाम्नातानामप्युपयोगोऽस्तीति नानर्थक्यम् । अतः सिद्धं कर्मनामधेयतयैवज्ञातीयकानां क्रियोपयोग इति । चित्रादिशब्दानां नामधेयत्वहेतवो विस्तरभयान्नानुक्रम्यन्ते । क्वचित् कर्मणः प्रापकशब्दान्तराभावाद् गुणविधित्वमेव । यथा आग्नेयोऽष्टाकपाल इत्याग्नेय इति सगुणकर्मविधायिनः शब्दस्य । नहि तत्र द्रव्यदेवतासम्बन्धविधानात् प्राक् कर्मणो रूपमवगम्यते यस्याग्नेयशब्दो नामधेयं भवेदित्येवमादि नामधेयपादोक्तमादिशब्देनानुक्रान्तं वेदितव्यमध्यायान्तम् । यावत्स्मृतिपादोक्तार्थोऽप्यनेनैवानुक्रान्तो वेदितव्यः ।

प्रत्यक्षवेदोपयोगप्रतिपादनप्रसङ्गेन चार्थवादाद्युपयोगानन्तरं नामधेयपादार्थोऽनुक्रान्तः । तत्रादिशब्देनानुक्रान्तः स्मृतिपादार्थः । तथाहि—अश्रूयमाणवेदानष्टकादीनुदाहृत्य तेषां धर्माधर्मत्वसंशये, 'धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात्' (१. ३. १) इति पक्षं परिगृह्य वेदमूलतया सिद्धान्तितं — सर्वाः स्मृतयो हि नासति पूर्वज्ञाने आत्मानं लभन्ते । पूर्वज्ञानं च मूलभूतं विभ्रमो वा स्यात्, प्रत्यक्षानुभवो वा, पौरुषेयागमजन्यं वा, विप्रलम्भो वा, चोदनाजनितं वा । तत्र तावद् भ्राम्यतामाप्तानां मन्वादीनां स्मृतिनिबन्धनप्रणयनमयुक्तम् । ते हि तावद् ऋषयो भ्राम्यन्तीत्येतदेव दुर्भणम् । भ्राम्यतां तु यन्महाप्रबन्धरचनं तत् स्मृतिभ्यश्चाद्ययावदार्यैः पश्यद्भिः परि(ग्रह?गृह्यते) इति नैतदुत्प्रेक्षितुमपि शक्यम् । अनुभवश्चातीन्द्रियगोचरः प्रत्यक्षसूत्रे निराकृतः । पुरुषवाक्यमप्यसम्भवन्मूलमप्रमाणमेव । विप्रलम्भोऽपि भ्रान्तिवन्निराकार्यः । चोदना तु सम्भवद्वेदसंयोगिनां त्रैवर्णिकानां स्मृतिमूलं भवतीति तत्कल्पनैव लघीयसीति । नन्वेवमग्निहोत्रादिचोदनावदष्टकादिचोदना अपि किं नोपलभ्यन्ते । नेदमनुपपन्नम् । विप्रकीर्णानेकशाखाश्रया हि श्रुतयः क्रतुपुरुषार्थोपदेशसङ्कीर्णाः प्रमाद्यद्भिरद्यतनैर्न विविच्योपलभ्यन्त इति किं नोपपद्यन्ते । अतो यदश्रूयमाणमप्यष्टकादिधर्मस्य निमित्तं चोदनेति सिद्धमष्टकादयो धर्मा इति । तदेवं प्रत्यक्षश्रुत्याविरुद्धाभ्यः श्रुत्यनुमानम् । प्रत्यक्षश्रुतिविरोधे तु न श्रुतिरनुमातुं शक्यत इति विरोधा-

धिकरणे उक्तम् । उपरिष्टाच्चाचारप्रामाण्यं स्मृत्या च सह बलाबलपरीक्षेत्यादि दर्शयितव्यम् । सर्वेषु च भेदादिलक्षणेषु स्वप्रमाणगणैः शब्दान्तरादिभिः सिद्धान्तस्थिति(:?र)सति बाह्येऽर्थे न सम्भवति । 'सोमेन यजेत' 'दाक्षिणानि जुहोति' 'हिरण्यमात्रेयाय ददाती'ति यागहोमदानभावनानां शब्दभेदादेव भेदो वक्ष्यते । तथाच 'समिधो यजती'त्येवमादीनां पञ्चानां प्रयाजानामसत्यपि शब्दभेदेऽभ्यासानर्थक्यप्रसङ्गाद् भेदो दर्शितः । 'तिस्र आहुतीर्जुहोती'ति पृथक्त्वानिवेशित्वात् संख्याया आहुतीनां भेदो दर्शितः । 'अथैष ज्योतिरेतेन यजेते'ति ज्योतिष्टोमाज्ज्योतिरि ति संज्ञान्तरेण कर्मभेदः । 'वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमि'ति च उत्पत्तिशिष्टश्रौतामिक्षाविरोधाद् वाजिनं वैश्वदेवे कर्मणि निवेशमलभमानं स्वाश्रयं यागान्तरमुपकल्पयति । सोऽयं वाजिनगुणाद् भेदः । कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोती'ति नैयमिकाग्निहोत्रात् प्रकरणान्तरेण कौण्डपायिनहोमस्य भेदः । तदेवं षोढा कर्मभेदो द्वितीये । अन्यदुपोद्घातादिना ।

तृतीये तु पारार्थ्यलक्षणस्य शेषत्वस्य षोढैव विनियोगसिद्धिरुक्ता । यथा तावदरुणिन्नः तृतीयाश्रुत्या क्रियाङ्गभावे सामान्यतोऽवगते 'अरुणया क्रीणाती'ति क्रियाविशेषलाभो वाक्यात् । लिङ्गविनियोगस्तु — यथाप्रकरणाम्नानसामर्थ्यावधृतसामान्याङ्गभावस्य बहिर्मन्त्रस्य सामर्थ्यापरनाम्नो लिङ्गाद् बर्हिर्लवने विनियोगः । प्रकरणविनियोगस्तु — इष्टिप्रकरणाम्नातानां प्रयाजादीनां साध्याकाङ्क्षिणामुपकाराकाङ्क्षिण्या तया सह सम्बन्धः । उभयाकाङ्क्षालक्षणमेव हि प्रकरणमाचक्ष्महे । क्रमविनियोगस्तु — प्राकृतोपकारनिराकाङ्क्षायां विकृतौ सन्निधिसमाम्नातानामङ्गानाम् । नहि तत्र प्रकरणविनियोगः सम्भवति । उभयगामिनी ह्याकाङ्क्षा प्रकरणम् । अनाकाङ्क्षा चेह विकृतिः प्राकृतोपकारद्वारपरिप्राप्तपदार्थपरिष्वक्ता वैकृतमेव त्वङ्गानां सन्निहितसमाम्नानमनर्थकं मा भूदिति तत्सन्निधिपाठादेव तेषां तत्र विनियोगो निश्चीयते । समाख्याविनियोगस्तु — आध्वर्यवसमाख्यातेषु पदार्थेष्वध्वर्योरनेनामी कर्तव्या इति ।

चतुर्थेऽपि श्रुत्यादिभिरेवावधृताङ्गाङ्गिभावानां दध्यानयनामिक्षादीनां प्रयोज्यप्रयोजकत्वे वक्ष्येते । यद्धि श्रुत्यादिभिर्यच्छेषतयावगम्यते तत् तेन

प्रयुज्यत इति स्थापितम् । तदिह प्रयुक्तिलक्षणेऽपि श्रुत्यादिरेव प्रमाणगणः, शेषलक्षणेऽपि शेषिणां शेषाणामुभयेषां वा क्रमनियमः किञ्चिन्मात्रविशेषभिन्नश्रुत्यादिभिरेव क्रियते । यथा तावद् 'अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति' इति क्त्वाश्रुत्या क्रमनियमः । 'अग्निहोत्रं जुहोति यवागूं पचति' इति पाठादन्याद्दशेऽपि क्रमेऽवगम्यमानेऽर्थात् क्रमनियमविपर्ययः । होमोत्तरकालं हि पाकः क्रियमाणोऽनर्थकः स्यात् । होमोऽपि नासति हविषि सं(प्र)वर्तत इत्यर्थात् पाकोत्तरकालमेव निश्चीयते । तदिदं लिङ्गमेवार्थ इति नाममात्राभिन्नं, सामर्थ्यमेव हि भावानां लिङ्गमिति निश्चीयते । इहापि द्रव्यक्रिययोः शक्तिनिरीक्षणादेव क्रमनियमावधारणम् । पञ्चानां तु प्रयाजादीनां 'समिधो यजती'त्येवमादीनां पाठात् क्रमनियमः । बहूनां हि पदार्थानां युगपदेकेन कर्त्रानुष्ठातुमशक्तेरवश्यम्भाविनि क्रमेऽवगमाधीनत्वादनुष्ठानस्य क्रमेण तूच्यमानेषु तथैवावगमादनुष्ठाने क्रमापेक्षायां स एव क्रमो निश्चीयते । प्रतीतहानाप्रतीतोपादानयोरनुपपत्तेः । अयमपि पाठापरनाम्ना स्थानेनैव क्रमनियमः । स्थानात् क्रमनियमो यथा—साद्यस्के कर्मणि 'सह पशूनालभते' इत्यग्नीषोमीयसवनीयानुबन्ध्यानां सवनीयस्थाने सहोपलम्भे चोदिते कः प्रथमं प्रयुज्यतामित्यपेक्षायां स्थानात् सवनीयो बुद्धौ भवन् प्रथमं नियम्यते । तस्य तदनुष्ठानस्थानम् । सोऽयमनुष्ठानसादेश्यलक्षणः क्रमः । पूर्वं तु पाठसादेश्यलक्षणः । द्वेधा च तार्तीयक्रमो विभक्तः । यथोक्तं

"तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः ।
पाठानुष्ठानसादेश्याद् विनियोगस्य कारणम् ॥"

इति । प्रवृत्त्या च क्रमनियमो यथा— 'समदश प्राजापत्यान् पशूनालभते' इति चोदितेषु पशुषु चोदकप्राप्तानां प्रोक्षणादीनां यत्रकचिदेकस्मिन्नेकस्यानुष्ठाने द्वितीयादिषु किं प्रथमप्रवृत्त्यैव अथानियम इति संशये नियमकारणाभावात् प्रथमप्रवृत्तेश्चानियमात्मकत्वादनियमः इति पक्षं परिगृह्य प्रथमप्रवृत्त्यैव नियमो दर्शितः । प्रयोगवचनबलेन हि पशूनां यौगपद्यमवधारितम् । तच्चावर्जनीयाद् विलम्बनान्न व्यवधानान्तरमङ्गानामनुजानीते । साङ्गेषु हि पशुषु युगपदनुष्ठातव्यतया चोदितेष्वपीश्वरेणापि तथा सम्भा-

वयितुमशक्तेः अवर्जनीयव्यवधानं तु विधेरनुमतं भवति । तत्र च वैषम्यकारणाभावात् सर्वेषां सदृशमेवाङ्गव्यवधानम् । प्रथमपदार्थकर्त्रानुष्ठिते तदैवाङ्गान्तरानुष्ठानाय तेनैव प्रधानेन चोद्यमाने कर्तरि प्रयोगवचनप्रमाणकयौगपद्यबलेन पश्चन्तरैराकृष्यमाणे तत्पदार्थमात्रस्य पश्चन्तरेष्वनुष्ठानं स पशुः प्रतीक्षते । तदन्ते च द्वितीयपदार्थानुष्ठानाय कर्तारमाकर्षतीति । एवं सप्तदशानां पशूनां षोडशभिरेकैकस्य व्यवधानं विध्यनुमतम् । व्यवधानविशेषस्तु विशेषाग्रहणान्नाश्रयितुं शक्यम् । अतो द्वितीयादीनामप्यनुष्ठानं तत एवारभ्येति सिद्धान्तात् क्रमनियमः । अयं च प्रकरणान्तर्गत एवाकाङ्क्षैकप्रमाणकत्वादेकैकोऽपि पशुरव्यवधानेन पदार्थानुष्ठानमाक्षिपति । पदार्थश्च तत्सन्निधावात्मनोऽनुष्ठानम् । अत उभयाकाङ्क्षया क्रमनियमो जायमानः प्राकरणिको भवति । मुख्यक्रमेण चांशानां क्रमनियमो यथा —— 'सारस्वतौ भवत' इति युगपदुत्पन्नयोः स्त्रीपुंदेवतयोः कर्मणोर्याज्याक्रमेणानुष्ठानेऽवगतेऽङ्गेषु क्रमापेक्षायां मुख्यक्रमेणैव क्रमो नियम्यते । नह्यङ्गानां प्रधानकालाद् बहिर्भावोऽस्ति । 'साङ्गं प्रधानमैकशब्द्यादि'ति वक्ष्यति । सोऽयं वाक्येनैव क्रमनियमः । साङ्गं हि प्रधानमेकवाक्यचोदितमेकोपक्रमावसानमिति प्रधानक्रमेणैवाङ्गानां क्रमनियमो जायते । अत्रापि श्रुत्यादिरेव प्रमाणगणः ।

एवमधिकारविचारादावपि शेषशेषिप्रपञ्चार्थत्वात् शेषलक्षणोक्तान्येव श्रुत्यादीनि सिद्धान्तस्थितिहेतुतया दर्शयितव्यानीति । यथा तावदाद्य एव 'स्वर्गकामो यजेते'ति यागस्वर्गयोः कः शेषः को वा शेषीति चिन्तायां 'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः' (६. १. १) इति स्वर्गस्य यागशेषतया लिङ्गबलेन पूर्वपक्षः परिगृहीतः । तद्धि भूतस्य द्रव्यस्य सामर्थ्यं यद् भाव्यं कर्म निष्पादयति । द्रव्यं च स्वर्गः, लकुचन्दनवासस्तु तत्प्रयोगात् सूक्ष्माणि वासांसि स्वर्ग इति यथा । अतो द्रव्यमेव कर्मार्थं, कामपदसम्बन्धश्च साधनविषयतया दर्शयितव्यः । यो हि यदर्थी स तत्साधनमपि कामयत एवेति लिङ्गबलेन पूर्वपक्षिते विधिश्रुतिबलात् सिद्धान्ततम् । विधिर्हि चेतनप्रवर्तनात्मकः । नचानर्थे पुरुषः प्रवर्तयितुं शक्यते इति यागार्थं स्वर्गं कर्मासाधकमापद्यते । यथोक्तम् 'असाधकं तु तादर्थ्यात्' (६. १. २) इति । अतो विधेः प्रवर्तनाशक्तिर्मा व्याघानीति कर्मैव स्वर्गा-

र्थम् । नच द्रव्यं स्वर्गः । अन्वयव्यतिरेकाभ्यां प्रीतिवचनत्वावगमात् । तदेव हि द्रव्यमप्रीतिकरं न स्वर्गशब्देनोपचरन्तो दृश्यन्ते इति प्रीत्यन्वयव्यतिरेकानुविधायित्वात् स्वर्गपदं तद्वचनमिति निश्चीयते । नच सर्वस्येष्टतमा प्रीतिरन्यनिष्पत्तये भवतीति साध्यतम् । अतो यदेव किञ्चित् प्रीत्या समभिव्याहृतं तत् तदर्थमेवेति लिङ्गमपि विपरीतम् । अतः सिद्धं यागः स्वर्गार्थ इति सिद्धश्चाधिकार इति । परस्तादपि शेषभूतस्यैव कर्तुस्तत्राधिकारो दर्शयिष्यत इति श्रुत्यादिबलेनैवाधिकारलक्षणेऽपि सिद्धान्तस्थितिः ।

उत्तरषट्के तु शेषा एव किं सर्वत्रोपदेशेनैव सम्बध्यन्ते, अथ यथाप्रकृति व्यवतिष्ठन्त इति श्रुत्यादिबलेनैव निर्णेष्यन्ते । औपदेशिके हि धर्मसम्बन्धे नातिदेशः सिध्यति, पारिप्लवा हि तदा धर्मा भवेयुः । तदिहातिदेशोपोद्घातेनैव सप्तमाद्ये यज्यपूर्वप्रयुक्तत्वं विचारितं यज्युद्देशेन धर्मविधानात् यजेश्च सामान्यवचनत्वात् सर्वत्रेति प्राप्तम्, नच दर्शपूर्णमासपदं नियामकं, परिसंख्यानाद् विशिष्टोद्देशेन विशिष्टानुवादादिति प्राप्ते निरूपितं — नात्र 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'ति यागोद्देशेनाङ्गानि विधीयन्ते, किं तर्हि, साङ्गप्रधानविशिष्टापूर्वभावनैव चोद्यते । पश्चात् त्वेकभावनापरिगृहीतानामङ्गानां प्रधानानां चारुणैकहायनीवत् परस्परान्वयसिद्धिः । भिद्यन्ते च शब्दान्तरादिभिः प्रतिप्रकरणमपूर्वभावनेति कुतो धर्मसङ्करः । सेयं श्रुत्यादिप्रमाणकविनियोगपरामर्शादेव व्यवस्था सिध्यति । यदा ह्यपूर्वभावनान्वयगर्भो विनियोगो धर्माणां न यागसामान्योद्देशेनेति सिद्धं भवति, तदा व्यवस्था सिध्यति । तत्सिद्धया चाश्रुतेतिकर्तव्यताकेषु सौर्यादिषु विध्यन्तापेक्षायां सामान्यातिदेशसिद्धौ प्रत्यक्षवचननामाव्यक्तचोदनातदवयवद्रव्यदेवतासामान्यबाहुल्येन विशेषातिदेशसिद्धिः । यथेष्टौ 'समानमितरत् श्येनेने'ति श्येनवैशेषिकाणां वाचनिकोऽतिदेशः । 'मासमग्निहोत्रं जुहोती'ति कुण्डपायिनामयने होमनाम्ना नित्याग्निहोत्रधर्मातिदेशः । एकाहाहीनसत्राणामव्यक्तचोदनाचोदितत्वेन सोमसादृश्यात् तद्धर्मातिदेशः इत्यादि दर्शयितव्यम् । सर्वश्चायमतिदेशः श्रुत्या विनियोगानुसारेणैव शेषाणां सिध्यतीति तत्प्रमाणगणकारित एव । ऊहोऽपि षोढा विभक्तः । प्राकृतोपदेशानुसारेणैव मन्त्रादीनां सिध्यतीति सोऽपि श्रुत्यादिप्रमाणक एव । सोऽपि ह्यपूर्वार्थो धर्मविनियोग इति सिद्धे सेत्स्यति । अत

तस्माद् धर्मार्थिभिः पूर्वं प्रमाणैर्लोकसम्मतैः ।
अर्थस्य सदसद्भावे यत्नः कार्यः क्रियां प्रति ॥ ४॥

एवापूर्वप्रयुक्तिराद्ये साधिता । बाधोऽपि श्रुत्यादिप्रमाणानुसारेणैव । तत्रापि प्राकृतशास्त्रातिदेशात् सर्वानुष्ठानेन पूर्वपक्षिते उपकारप्रधानत्वादतिदेशस्य तदभावेऽन्यतो वा तल्लाभे प्रतिषेधेन वा बाधो वक्ष्यते । यथा कृष्णलचरावघातस्य, खलेवालीशराभ्यां यूपबर्हिषोरित्यादि दर्शयितव्यम् । एतदपि प्रकृतावेवोपकारपर्यन्तश्रुत्यादिविनियोग इति निर्णयिते । (सिध्यति ?) एतावांस्तु विशेषः प्रकृतौ पदार्थपरिग्रहपुरस्सर्युपकारकल्पना, प्राक् तदसिद्धेः । विकृतौ तु प्रकृतिपरिकल्पितोपकारसन्दर्शनेन तत्परिग्रहपुरस्सरं पदार्थपरिग्रहः । स एव हि विधिनापेक्ष्यते । स तु प्रकृतावसिद्धो(ऽपि) कल्पयित्वा गृह्यते । विकृतौ च प्रकृतिसिद्ध एवोपादीयत इति । अत एव शास्त्रपदार्थयोरनतिदेशः, तयोर्विध्यनपेक्षितत्वादिति । तन्त्रावापलक्षणेऽपि विशेषा एव प्रधानानां किं तन्त्रेणोपकारका उतावृत्त्येति शेषाणामेव विचार्यमाणत्वात् तत्प्रमाणगणानुसारी निर्णयो दर्शयितव्यः । तत्र हि देशकालफलादीनां तन्त्रसम्बन्ध आग्नेयादीन् प्रति प्रयाजादीनां तन्त्रानुष्ठाने हेतुर्भविष्यति । स च श्रुत्यादिप्रमाणक एवेति तत्रापि स एव प्रमाणगणः । प्रसङ्गलक्षणेऽपि पश्वर्थानुष्ठितानां प्रयाजादिशेषाणां पशुतन्त्रमध्यपातिपुरोडाशोपकारकत्वं देशादितन्त्रनिबन्धनमेवेति पूर्ववत् प्रमाणगणः । अतएव भाष्यकारेण प्रथमसूत्रे दशाध्याय एव शेषलक्षणशब्दः प्रयुक्तः । योऽपि वचनव्यक्तिभेदेन पूर्वपक्षसिद्धान्तविभागः यथा 'स्वर्गकामो यजेते'ति स्वर्गकामो यागं कुर्यादिति पूर्वः पक्षः यागेन स्वर्गं कुर्यादिति सिद्धान्त इति, सोऽपि नार्थशून्यासु बुद्धिषु सिध्यति । कर्मभ्यश्च दर्शपूर्णमासकारीर्यादिभ्यः परलोके इहलोके भवत्स्वर्गवृष्ट्यादिफलसम्बन्धो बाह्याश्रय एव, असति तस्मिन् द्वैविध्यानुपपत्तेः । अतः सर्वमिदं बाह्यार्थसिद्धावसत्यामयुक्तमापद्येतेति तदुपपादनाय धर्मार्थिभिर्मीमांसकैर्लोकप्रसिद्धैः प्रत्यक्षादिभिः प्रमाणैः पूर्वोत्तरपक्षविभागेनार्थस्य सदसद्भावयोर्यत्नः कार्यः । पूर्वपक्षविशुद्धा हि बुद्धिः सिद्धान्तकरी भवति । अतोऽनुमानेनैवार्थापह्नवपूर्वपक्षं कृत्वा प्रत्यक्षेण तत्सद्भावसिद्धान्तो दर्शयितव्यः । सर्वश्चायं प्रयासः सकललौकिक-

यदा संवृतिसत्येन सर्वमेतत् प्रकल्प्यते ।
ज्ञानमात्रेऽपि कस्माद् वो वृथाग्रहोऽर्थकल्पने ॥ ५ ॥
संवृतेर्नतु सत्यत्वं सत्यभेदः कुतोन्वयम् ।
सत्यं चेत् संवृतिः केयं मृषा चेत् सत्यता कथम् ॥
सत्यत्वं नच सामान्यं मृषार्थपरमार्थयोः ।
विरोधान्नहि वृक्षत्वं सामान्यं वृक्षसिंहयोः ॥ ७ ॥

वैदिककियां प्रति तत्सिद्ध्यर्थमिति यावत् । अन्यथा सर्वार्थक्रियाणामुच्छेदो भवेत् । अतः प्रयोजनवद् बाह्यार्थप्रतिपादनम् । अक्रियाङ्गस्य तु प्रतिपादितस्याप्यनर्थ(त्व)मेवेति क्रियां प्रतीति युक्तमेवेति ॥ ४ ॥

अत्र चोदयति—यदेति । ज्ञानमात्रपक्षे हि बौद्धानामिव सर्वोऽयं प्रमाणादिव्यवहारः सिध्यत्येव । ते हि वदन्ति—

"द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोके संवृतिसत्यं च सत्यं च परमार्थतः ॥"

इति । अतस्तद्वदेव व्यवहारसिद्धौ किं पारमार्थिकार्थप्रतिपादनव्यसनेनेति॥५॥

अत्र दूषणमाह—**संवृतेरिति** । सत्यम् । संवृतिसत्येन सर्वमिदं बौद्धैराश्रीयते । नत्वेतद् युक्तम् । सत्यभेदानुपपत्तेः । यः खल्वयं सत्यभेदो बौद्धैराश्रितः संवृतिसत्यं परमार्थसत्यमिति, नायमुपपद्यते । **संवृतेः** सत्यत्वाभावात् । मिथ्यापर्यायो हि संवृतिशब्दः । कथं तस्य सत्यशब्दसमभिव्याहारः । नह्ययमक्षशब्द इव विभीतकादीनां संवृतिपरमार्थयोः साधारणः सत्यशब्दः । अतः सत्यभेदानुपपत्तिरिति । विरोधमेव व्यनक्ति—सत्यं चेदिति ॥ ६ ॥

विरोधादेव च मृषार्थपरमार्थयोः सामान्यमपि सत्यत्वं नाभ्युपगन्तुं शक्यम् । समानानां भावः सामान्यम् । कुतस्तस्य विरोधिनोरवकाशः । नहि भवति धर्माधर्मयोर्धर्मत्वमधर्मत्वं वा सामान्यमित्याह—**सत्यत्वमिति** विरोधादन्तेन । अन्यमात्रयोरपि तत्परामर्शाभावाद् दुरुपगमं सामान्यं वृक्षसिंहयोरिव वृक्षत्वम् । किं पुनर्विरोधिनोस्तत् स्यादित्याह—

तुल्यार्थत्वेऽपि तेनैषां मिथ्यासंवृतिशब्दयोः ।
वञ्चनार्थ उपन्यासो लालावक्रासवादिवत् ॥ ८ ॥
नास्तिक्यपरिहारार्थं संवृतिः कल्पनेति च ।
कल्पनापि त्वभिन्नस्य नैव निर्वस्तुके भवेत् ॥ ९ ॥
तस्माद् यन्नास्ति नास्त्येव यत् त्वस्ति परमार्थतः ।
तत् सत्यमन्यन्मिथ्येति न सत्यद्वयकल्पना ॥ १० ॥

नहीति । अत्र चाक्षादिवत् साधारणशब्दता पूर्वं सत्यशब्दस्य निराकृता इह गवादिवत् सामान्यशब्देतेति विवेचनीयमिति ॥ ७ ॥

अतो लोकं वञ्चयितुं मिथ्यापर्यायोऽपि संवृतिशब्दो बौद्धविद्वद्भिरनुद्वेगकरतया मिथ्यात्व एव विवक्षिते स्वनास्तिक्यपरिजिहीर्षया प्रयुक्तो लालायामिव वक्रासवशब्द इत्याह — तुल्यार्थत्व इति संवृतिरन्तेन । वक्ष्यमाणेनेतिकरणेन सम्बन्ध इति । कल्पनावाचोयुक्तिरपि स्वनास्तिक्यपरिहारार्थमेव तैराश्रितेत्याह — कल्पनेति चेति । कल्पनामात्रकल्पितेन बाह्येन सर्वलौकिकव्यवहार इत्यपि निर्वस्तुके जगत्यभिन्नस्य चिन्मात्रस्य कल्पनाया भेत्तुमशक्यत्वाद् दुर्भणम् । क्वचिद्धि भिन्नमेव किञ्चिद् रूपान्तरं कल्पनास्पदं भवति शुक्ताविव रजतरूपम् । यस्य तु न किञ्चिद् भिन्नमस्ति, तत् केन रूपेण कल्प्यताम् । तदेतदाह — कल्पनापीति ॥ ९ ॥

ननु त्रिधैव तत्त्वं विभजामहे सत्यमसत्यं संवृतिसत्यं चेति । संवृतं हि नात्यन्तमसद् भवति, व्यवहाराविसंवादात् । नापि सदेव, प्रमाणान्तराविरोधाज्जात्यादिवत् । अतो न संवृतिः प्रमाणं नाप्रमाणमिति विधान्तरमेवेदमिति युक्तस्तदाश्रयतया व्यवहार इत्यत आह — तस्मादिति । यतः खलु संवृतिर्मिथ्याज्ञानं न वस्तुक्लप्त्यै प्रभवति, तस्माद् यत् परमार्थतो नास्तीति निरूप्यते न तत् संवृत्या तद्रूपं भवितुमर्हति । नास्त्येव तत् । यत् तु तावद् व्यवहाराविसंवादि तदस्त्येव, नह्यसतः सर्वदा व्यवहारहेतुभावः सम्भवति । यदेवार्थक्रियाकारि तदेव च परमार्थसदिति वः सिद्धान्तः । अतः कथमर्थक्रियाकारित्वे सत्यपि जात्यादीनामसत्यत्वम् । तस्माद् यदि व्यवहाराङ्गतया बाह्यमस्ति, तत् तर्हि परमार्थत एवास्ति ।

स्वप्नादिभोगवच्चापि योपभोगत्वकल्पना ।
तन्निवृत्त्यर्थमेवेह परमार्थे प्रयस्यते ॥ ११ ॥
नहि स्वप्नसुखाद्यर्थं धर्मे कश्चित् प्रवर्तते ।
यादृच्छिकत्वात् स्वप्नस्य तूष्णीमास्येत पण्डितैः ॥
परमार्थफलावाप्तिमिच्छद्भिस्तेन यत्नतः ।
प्रतिपत्तिर्विधातव्या युक्तिभिर्बाह्यवस्तुषु ॥ १३ ॥
तत्रार्थशून्यं विज्ञानं योगाचाराः समाश्रिताः ।

तदेव सत्यमित्युच्यते । अन्यत्तु संवृतिर्मिथ्येति । नतु सत्यद्वयकल्पनात्मानं लभते । तन्त्रेण तद्वृत्तस्य पूर्वापराभ्यां सम्बन्धः । परमार्थत इति च नास्तीति पूर्वेण सम्बध्यत इति ॥ १० ॥

अपिच स्वप्नावगता अप्यर्थाः केचिच्छोकहर्षादिव्यवहारहेतवो दृश्यन्ते । अतस्तेऽपि सांवृता एव । तद्वच्च बाह्यार्थाभ्युपगमे स्वप्नादिभोगतुल्य एव शुभाशुभकर्मफलोपभोगो भवेत् । अतस्तन्निवृत्त्यर्थमपि परमार्थसत्ये बाह्ये प्रयस्यते इत्याह — **स्वप्नादीति** ॥ ११ ॥

कः पुनः स्वप्नतुल्यत्वे दोषः, अत आह — **नहीति** । किमिति न प्रवर्तते अत आह — यादृच्छिकत्वादिति । नहि स्वप्नसुखं मे भवतीति विद्वांसः प्रयस्यन्ति । यादृच्छिकं हि स्वप्नसुखमगणितसाम्परायिकैहिकनिमित्तं, न तत् प्रयस्यतो भवतीति बुद्ध्वा विद्वद्भिस्तूष्णीमुदासीनैरेवास्येत, न क्वचित् प्रयत्नः क्रियेतेत्यर्थः ॥ १२ ॥

अतोऽवश्यं पारमार्थिकीं फलप्राप्तिमिच्छद्भिरुपपत्त्या बाह्यवस्तुविषया प्रतिपत्तिर्विधातव्येत्यस्ति विचारस्य प्रयोजनमित्युपसंहरति — **परमार्थेति** ॥ १३ ॥

अत्र भाष्यकारेण बाह्यार्थसद्भाव एव पूर्वपक्षपुरस्सरं प्रतिपादितः, नतु ज्ञानसद्भावः । तत् कस्य हेतोः । अस्ति हि तत्सद्भावविप्रतिपत्तिरपि । माध्यमिका हि ज्ञानमप्यपलपन्ति । अतस्तन्निराकरणमपि युक्तम् । यत्

तस्याप्यभावमिच्छन्ति ये माध्यमिकवादिनः ॥ १४ ॥
तत्र बाह्यार्थशून्यत्वं तुल्यं तावद् द्वयोरपि ।
निवृत्त्यास्य ततो ज्ञाने तद्वत् संवृतिकल्पना ॥ १५ ॥
तस्मात् साधारणत्वेन तन्मूलत्वेन चाप्ययम् ।
बाह्यार्थसदसद्भावे यत्नो भाष्यकृता कृतः ॥ १६ ॥
बाह्यार्थापह्नवे द्वैतमेकोऽर्थस्य परीक्षणात् ।
प्रमाणमाश्रितश्चैकस्तत्रास्तां यः प्रमेयतः ॥ १७ ॥
प्रमाणस्थस्तु मूलत्वादिहेदानीं परीक्ष्यते ।

पुनस्तदुपेक्ष्यैव बाह्यार्थापलापो निराक्रियते, तत्र कारणं वक्तव्यमत आह—**तत्रेति** त्रयेण । अस्यार्थः— योगाचारा हि ज्ञानमात्रमर्थशून्यं पारमार्थिकं मन्यन्ते । माध्यमिकास्तु ज्ञेयाभावादकर्मकज्ञानानुत्पत्तेर्ज्ञानस्याप्यभावमिच्छन्ति । तत्र द्वयोरपि वादिनोस्तावद् बाह्यार्थशून्यत्वं साधारणम् । अर्थनिवृत्त्यधीनत्वात् ज्ञाननिवृत्तेः । अतो द्वयोरपि साधारणो बाह्यार्थापलाप इति स एव निराक्रियते । अपिच तन्मूलो ज्ञानापह्नवः । ततस्तस्मिन् निराकृते निराकृत एवेति बाह्यार्थसद्भावे पूर्वोत्तरपक्षविभागेन भाष्यकृता प्रयत्नः कृतः । आद्यस्तत्रशब्दो वाक्योपन्यासार्थः । द्वितीयस्तु पूर्वोक्तदर्शनभेदपरामर्शार्थः । तत्र मतभेदे इत्यर्थः ॥ १६ ॥

ननु बाह्यार्थापह्नवो द्विधैव बौद्धैराश्रितः प्रमाणतः प्रमेयतश्च । तथाहि—एवं तैरुक्तं— न तावदणवोऽतीन्द्रियाः प्रमाणविषयाः । न तत्समूहः, तस्य तदतिरेकिणोऽभावात् । नावयवी । तस्यावयवव्यतिरेकेणानुपलम्भात् । अव्यतिरेके च तन्मात्रापातात् । एवमान्त्यावयवेभ्यो विकल्प्य अवयवी निराकार्यः । ते त्वतीन्द्रिया एव । अतो न किञ्चन ग्राह्यमवतिष्ठते इति । तदेतत्परित्यागे किं कारणं, यत् प्रमाणत एव बाह्यापह्नव उपन्यस्यते निरस्यते चेति । अत आह—**बाह्यार्थेति** सार्धेन । अयमर्थः—यद्यपि द्वेधा बाह्यार्थापह्नवो बौद्धैराश्रितः, तथापि प्रमाणाश्रित एव मूलभूतत्वादिह विचार्यते । प्रमाणमूला हि प्रमेयस्थितिः । तद् यदि प्रमाणमनुगुणं, किं वस्तुविकल्पैः । न तद्बलेन तदनुपपत्तिं परिहृत्यार्थो व्यवस्थाप्यते । अथतु

प्रस्तुतः स द्विधा चात्र प्रथमं त्वनुमानतः ॥ १८ ॥
प्रत्यक्षबाधने चोक्ते पश्चात् तच्छक्त्यवेक्षणात् ।
तत्रानुमानमाहेदं नास्त्वित्यस्य च सङ्गतिः ॥ १९ ॥
तत्सम्प्रयोगजं नाम प्रत्यक्षमिति भाषितम् ।
तत्रेन्द्रियार्थसम्बन्धभेदो न परमार्थतः ॥ २० ॥
कल्पितः सम्प्रयोगस्तु स्वप्नादावपि विद्यते ।
तदतद्योगजन्यस्य विभागस्तेन दुर्लभः ॥ १२ ॥

प्रमाणमेवार्थं प्रत्याचष्टे, किं प्रमेयविकल्पैः कृतकैरिति । इह शाबरे तन्त्रे । इदानीम् अस्मिन्नवसरे । प्रमाणस्थ एव बाह्यापह्नवो विचार्यत इति ॥ १७½ ॥

ननु यदि प्रमाणस्थो विचारयितव्यः, ततः प्रत्यक्षस्य मुख्यत्वात् तदनुसारेणैव विचारो युक्तः । बौद्धैरपि प्रत्यक्षसामर्थ्यादेवैकं तत्त्वमाश्रितम् । नैकस्मिन्नाकारे भासमाने द्वैतमात्मानं लभते इति हि मन्यन्ते । अनुमानं तु भ्राम्यतः प्रत्युक्तमिति किं तत्पुरस्सरीक्रियते अत आह — **प्रस्तुत** इति । एवंहि मन्यते— यद्यपि प्रत्यक्षशक्तिनिरूपणमेव बाह्यार्थसदसद्भावयोः प्रधानं, तथापि परैरनुमानमपि बाह्यापह्नवे दर्शितमिति तदपि निराकार्यम् । अनिराकृते हि तस्मिंस्तत्रैव केचिदास्थां प्रतिबध्नीयुः । अत्र चायमेवोपन्यासक्रमो युक्तः यत् प्रथममनुमानमुपन्यस्यते, ततस्तस्य प्रत्यक्षेण बाधमुपन्यस्य तस्मिंश्चोक्ते पुनः प्रत्यक्षशक्त्यपेक्षणेन पूर्वोत्तरपक्षावा(दावे?द ए)व प्रत्यक्षशक्तिनिरूपणेन निर्णये कृतेऽनुमानस्योपन्यासोऽनवसर एव स्यादिति ॥ १८½ ॥

अनुमानभाष्यमिदानीं प्रकृतसङ्गतिदर्शनार्थमवतारयति — **तत्रेति** इत्यन्तेन । सङ्गतिमाह— **अस्येति** दुर्लभ इत्यन्तेन । अयमर्थः — यत् सूत्रकारेण तत्संयोगजं प्रत्यक्षमुक्तं तदाक्षेपेणैव सङ्गच्छते । काल्पनिको ह्ययमिन्द्रियार्थसम्प्रयोगः, इन्द्रियादेरभावात् । काल्पनिकश्च सकलमिथ्याज्ञानसाधारण इति तदतद्योगजत्वविभागो न युक्त इति सूत्रोक्ताक्षेप इति ॥ २१ ॥

मिथ्यात्वं यद् द्विधैवोक्तं नान्यथेत्यत्र चोच्यते ।
सर्वस्यैव च मिथ्यात्वे किं विशिष्याभिधीयते ॥
स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात् तथाहि यः ।
प्रत्ययः स मृषा दृष्टः स्वप्नादिप्रत्ययो यथा ॥ २३ ॥
सिद्धसाधनभावांशे दृष्टान्ताभाव एव च ।
मा भूतामेवशब्दश्च व्यर्थोऽशेषप्रसाधने ॥ २४ ॥
सर्व एवेति तेनात्र जाग्रद्बुद्धिपरिग्रहः ।
स्वांशाभ्युपगमाच्चापि बाह्यग्राह्यनिवारणम् ॥ २५ ॥

स्वोक्ताक्षेपेण वा सङ्गतिरित्याह — **मिथ्यात्वमिति** । यदेतद्वृत्तिकारग्रन्थान्त उक्तं — 'यस्य च दुष्टं करणं यत्र च मिथ्येति प्रत्ययः स एवासमीचीनप्रत्ययः नान्यः' इति तदनेनाक्षिप्यते । सर्वमिथ्यात्वे विशेषणोपादानवैयर्थ्यमिति ॥ २२ ॥

भाष्यतिरोहितमनुमानमिदानीं विस्पष्टमुपन्यस्यति—**स्तम्भादीति** । स्तम्भादिप्रत्यय इति धर्मिनिर्देशः । मिथ्येति धर्मवचनं, प्रत्ययत्वादिति हेतुः । तथाहीति दृष्टान्तवचनमिति ॥ २३ ॥

अत्र भाष्यं 'सर्व एव निरालम्बनः स्वप्नवत् प्रत्ययः' इति । तद् यथाश्रुतं सर्वेषामनालम्बनत्वं साधयति । तत्र चांशे सिद्धसाधनता स्यात्, विभ्रमाणामनालम्बनत्वात् । यद्विज्ञानमन्यथा सन्तमन्यथा बुध्यतेऽर्थं तन्निरालम्बनमिष्यत एव । तथा सर्वस्मिन् पक्षीकृते स्वप्नज्ञानस्यापि तदन्तर्भावाद् दृष्टान्ताभावः । सर्व एवेति चैवशब्दानुपपत्तिश्च । स हि विभक्तप्रतिषेधे दृष्टः । यथेदं देवेभ्य इदं ब्राह्मणेभ्य इति विभक्ते भवति वचनं सर्वमेवेदं ब्राह्मणेभ्य इति । तत्र विभागप्रतिषेधपर एवकारो दृश्यते । सर्वस्मिंस्तु पक्षे सर्व इत्याचक्षीत, नैवकारं प्रयुञ्जीत । अतो जाग्रद्बुद्धिविवक्षयैव भाष्यं व्याख्यातव्यमित्याह — **सिद्धसाधनेति** सार्धेन । नन्वेवमप्यविशेषितनिरालम्बनत्वोपादानेऽभ्युपगमविरोधः । स्वांशालम्बनत्वं ज्ञानानां बौद्धैरिष्यत एवात आह — **स्वांशेति** । अतएव कारणाद् बाह्यविशेषणविशिष्टमनालम्बनत्वं साधनीयमित्यर्थः ॥ २५ ॥

प्रत्ययस्येति साध्यांशव्याप्तहेतुर्निदर्शनम् ।
हेतुश्चोपनयेनात्र जाग्रतोऽपीति दर्शितः ॥ २६ ॥

अपरमपि भाष्यं 'प्रत्ययस्य हि निरालम्बनतास्वभाव उपलक्षितः स्वप्ने । जाग्रतोऽपि स्तम्भ इति वा कुड्य इति वा प्रत्यय एव भवति, तस्मात् सोऽपि निरालम्बनः' इति । तस्यार्थमाह — प्रत्ययस्येति । प्रत्ययस्य हि निरालम्बनतास्वभाव उपलक्षितः स्वप्ने इत्येतावता भागेन तावत् साध्येन निरालम्बनत्वेन व्याप्तं प्रत्ययत्वं हेतुर्निर्दिश्यते । दृष्टान्तवचनमिति यावदिति । ननु न प्रत्ययत्वादिति हेतुरुपात्तः, कस्य व्याप्तिर्निर्दिश्यते । अत आह — हेतुश्चेति । यद्यपि प्रत्ययत्वस्य न व्यक्तं पञ्चम्या हेतुत्वमुपात्तं, तथापि उपनयनाख्येन साधनवाक्यावयवेन जाग्रतोऽपीत्यादिना हेतुः प्रदर्शित एव । यदेव हि साध्यान्वितं प्रदर्शितं प्रत्ययत्वं पुनः प्रतिज्ञार्थ उपनीयते, तदेव तदत्र हेतुरिति प्रदर्शितं भवत्येव । साध्यान्वितस्यैव पक्षस्थस्य हेतुत्वादिति । कः पुनरयमुपनयः । साधनवाक्यावयवविशेषः । पञ्चावयवं हि साधनवाक्यं प्रतिज्ञा हेतुरुदाहरणमुपनयो निगमनं चेति । तत्र साध्यनिर्देशः प्रतिज्ञा । यथा अनित्यः शब्द इति । उत्पत्तिधर्मकत्वादिति हेतुः । उत्पत्तिधर्मकं स्थाल्यादि द्रव्यमनित्यं दृष्टमित्युदाहरणम् । तथाचोत्पत्तिधर्मकः शब्द इत्युपनयः । स उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनय इति वर्णितम् । किमुक्तं भवति । द्वेधा हि हेतुः साध्यं साधयति उदाहरणसाधर्म्याद् वैधर्म्याद् वा । तत्र साधर्म्यं प्रदर्शितम् । वैधर्म्यं तु यथा — तस्यामेव प्रतिज्ञायां तस्मिन्नेवोत्पत्तिधर्मकत्वादिति हेतौ अनुत्पत्तिधर्मकमात्मादि द्रव्यं नित्यं दृष्टम् । नच तथा शब्दोऽनुत्पत्तिधर्मक इति । तत्र योऽयं द्विविधोदाहरणापेक्षः साधर्म्योदाहृते तथेति वैधर्म्योदाहृते न तथेति साध्यस्य शब्दस्य सम्बन्धितयोत्पत्तिधर्मकत्वस्योपसंहारवचनमुपनयः, स चोदाहरणापेक्ष एव । उदाहरणद्वैतादेव तदुपसंहारद्वैतं भवति । वैधर्म्योदाहरणेन च विरुद्धनिवृत्त्या साध्यसम्बन्धित्वेन हेतोरुपसंहारः । यथात्मादि द्रव्यं नित्यमनुत्पत्तिधर्मकम्, नच तथा शब्दः इत्यनुत्पत्तिधर्मकत्वप्रतिषेधेनोत्पत्तिधर्मकत्वमुपसंह्रियते । प्रकृते तु साधर्म्यो-

विपक्षाभावतश्चात्र व्यतिरेको न कथ्यते ।
सामान्यस्य च हेतुत्वान्न स्यात् पक्षैकदेशता ॥
जाग्रज्ज्ञाने विशेषोऽयं यतः सुपरिनिश्चयः ।
बाह्यालम्बनसम्बन्धो न प्रसिद्धः परं प्रति ॥ २८ ॥
तस्माद् यद् भाष्यकारेण दत्तमुत्तरमत्र तु ।
विकल्पसमता वा स्याद् वैधर्म्यसमतापि वा ॥ २९ ॥

दाहरणे तथैवेति हेतोरुपसंहार उपनयो वेदितव्यः । निगमनं तु हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनम् । तस्मादुत्पत्तिधर्मकत्वादनित्यः शब्द इति । निगम्यन्तेऽनेन प्रतिज्ञाहेतूदाहरणोपनया एकत्रार्थ इति निगमनम् । सम-र्थ्यन्ते सम्बध्यन्ते इति यावत् । असति हि तस्मिन्ननभिव्यक्तसम्बन्धानामर्थ-प्रतिपादकत्वं न स्यात् । सति तु तस्मिन् सर्वेषामवयवानां तात्पर्यदर्शी-नात् परस्परसम्बन्धः स्फुटो भवति । निगमनं सङ्गमनं सम्बन्धनमिति यावदिति ॥ २६ ॥

ननु नाव्यावृत्तो विपक्षाद्धेतुर्भवतीति वैधर्म्यदर्शनेन हेतोर्व्यतिरेको दर्शयितव्यः । नचात्र तथा दर्शितः, साधर्म्यमात्रवचनात् । अत आह —— **विपक्षेति** । निरालम्बनत्वे हि साध्यमाने सालम्बनत्वं विपक्षः । **नच** सर्वानालम्बनत्ववादिनस्तदस्तीति किं तद्व्यतिरेकप्रदर्शनेनेति । **ननु** प्रत्यये पक्षीकृते तस्मिन्नेव हेतौ प्रतिज्ञार्थैकदेशो हेतुरत आह—सामान्य-स्येति । सामान्यविशेषात्मका हि प्रत्ययाः । तत्र विशेषे पक्षीकृते सामान्यं हेतुरिति न प्रतिज्ञार्थैकदेशतेति ॥ २७ ॥

अत्र सिद्धान्तभाष्यं 'जाग्रतो हि बुद्धिः सुपरिनिश्चिता कथं विपर्यसिष्यती'ति । अनेन किल सुपरिनिश्चितत्वेन जाग्रद्धियां **सालम्बनत्वं** साध्यते । नच सुपरिनिश्चितत्वं बाह्यालम्बनसम्बद्धं परान् प्रति प्रसिद्धम् । अतो नानेनासिद्धावयवेनानालम्बनानुमानं पराणुद्यते, सप्रतिसाधनं **वा** भवति । तस्योभयप्रसिद्धावयवत्वात् । अस्य च तद्विपरीतत्वात् । **अतो**

दुष्टत्वात् पूर्वपक्षस्य जात्युक्तिः कैश्चिदाश्रिता ।
प्रतिज्ञादोषमेवाहुः केचित् प्रत्यक्षबाधनम् ॥ ३० ॥

जात्युत्तरमेवेदं भाष्यकारेण दत्तमित्याक्षिपति — जाग्रज्ज्ञाने इति द्वयेन । वैधर्म्यविकल्पसमयोश्च स्वरूपं शब्दे वक्ष्यामः । सत्येव प्रत्ययत्वे सुपरिनिश्चितासुपरिनिश्चितधर्मान्तरविकल्पनात् साध्यधर्मविकल्पादनेन विकल्पसमता । तथा साधर्म्ये वादिना प्रयुक्ते निरालम्बनानां स्वप्नज्ञानानामसुपरिनिश्चितत्वदर्शनात् साध्येषु जाग्रज्ज्ञानेषु सुपरिनिश्चितत्वेन वैधर्म्यात् प्रत्यवस्थानेन वैधर्म्यसमता । प्रपञ्चस्तु पश्चाद् भविष्यतीत्युक्तमिति ॥ २८, २९ ॥

एवमाक्षिप्तं भाष्यमेकेन मतेन समादधाति — दुष्टत्वादिति । एवं हि मन्यन्ते — दुष्टसाधनप्रयोगे दुष्टमेवोत्तरं देयमिति, एवं हि तदा वादी प्रतिबोधितो भवति यथा भवान् मदीयं दूषणं दुष्टं मन्यते तथाहमपि त्वत्साधनम्, अतोऽसौ स्वसाधनान्निवर्तते इति । इदं तु समर्थनं नोपपद्यते । निग्रहस्थानद्वयप्रसक्तेः । पर्यनुयोज्योपेक्षणानिरनुयोज्यानुयोगात्मकनिग्रहस्थानद्वयमेवंवादिनो भवेत्, यः सन्तं दोषमनुक्त्वान्यमसन्तं जल्पति । नचैवंवादिनः स्वसाधनदूषणावगमो भवति । परमेव तु दुष्टदूषणप्रयोगेणोपालभते । अतः पाशुपतोत्तरतुल्यमेकजातीयकं वर्जनीयमित्यन्यथा समाधानमाह — प्रतिज्ञेति । नानेनानुमानमुपन्यस्यते । किन्तु परोक्तानुमानस्य प्रत्यक्षविरोधो वर्ण्यते । असन्निकृष्टेऽर्थेऽनुमानं प्रमाणम् । इह तु सुपरिनिश्चिताभिर्जाग्रद्बुद्धिभिर्निश्चितसद्भावस्य बाह्यस्य प्रत्याख्यानानुमानं प्रत्यक्षेण मुखनिरोधान्न जायत एवाग्नाविव शैत्यानुमानम् । यदि परं बाह्यस्य प्रयोगमात्रपर्यवसितमेव साधनवचनम्, अनुमिमानस्यापि स्फुटो बहिर्विषयबो(धे? धो) जायत एव । तथाविधस्यापि मिथ्यात्वे कः समाश्वासः । नन्वेवमनुमानमनाश्वासनीयमेव, न । तदभावात्, उक्तमेतत् प्रत्यक्षे परिपन्थिनि न तत्प्रतिपक्षमनुमानमात्मानं लभेत श्रौत इव विनियोगे लैङ्गिकः । साधनवाक्ये त्वयोग्यान्वयपदसान्निध्यादे वन्ध्यासुतवाक्यवत् संसर्गज्ञाने भ्रान्तिरेव । नतु कस्यचिद् लैङ्गिकं स्तम्भादिष्वभावज्ञानमुत्पद्यते । ननु व्याप्तं प्रत्ययत्वमनालम्बनत्वेन । व्याप्याच्च ज्ञातसम्बन्धस्य व्यापकज्ञानं नोत्पद्यत इति

१. 'केषां म', २. 'त' ख. पाठः.

शक्ष्यामो यदि विस्पष्टं स्वांशग्राह्यनिवारणम् ।
तदा ते शुद्ध एव स्यात् पक्षो ग्राह्यनिवारणः ॥
प्रत्यक्षादेश्च विषयो बाह्य एवावशिष्यते ।
तन्निषेधकृतस्तस्य तैर्भवेत् पक्षबाधनम् ॥ ३२ ॥
सुनिश्चयेन चैतेषां बाधकप्रत्ययादृते ।
प्रमाणाभासता नास्तीत्येतस्मात् कथ्यते बलम् ॥

हठ एवायम् । न । व्याप्तिभङ्गात् । संविदन्नेव हि व्याप्तिमबाधितेन प्रत्यक्षेण सर्वदेशकालादिभाविना न प्रत्ययत्वप्रयुक्तं मिथ्यात्वम्, अपितु पूर्वोक्तहेतुद्वयप्रयुक्तमिति निश्चिनोति । तदिदमुक्तम् — 'अन्यतस्तु स्वप्नप्रत्ययस्य मिथ्याभावो विसंवादादवगम्यते' इति ॥ ३० ॥

कथं पुनरत्र प्रत्यक्षबाधः । प्रत्यक्षं हि ग्राह्यमन्तरेणात्मानमलभमानं तन्मात्रमवस्थापयति न बाह्यम् । किं हि तस्य बाह्येन विना न सिध्यति । ग्राह्यश्च स्वांशो बौद्धैरभ्युपगत एव । अतो न बाह्यापह्नवे प्रत्यक्षत्वादिविरोधः । अत आह — शक्ष्याम इति द्वयेन । अयमभिप्रायः — शून्यवादे हि प्रत्यक्षस्य स्वांशगोचरत्वं निराकरिष्याम एव । तन्निराकरणे च बाह्यविशेषणोपादानमनर्थकमेव, तद्व्यतिरिक्तग्राह्यान्तरासम्भवात् । अतोऽनालम्बनपक्षो ग्राह्यमात्रनिवारण एव भवति । प्रत्यक्षादेः स्वांशनिराकर(णा)द् बाह्य एव विषयोऽवशिष्यते । अतो बाह्यविशेषणेन विना ग्राह्यमात्रापह्नवे भवति प्रत्यक्षादिभिः पक्षबाधः । सत्यपि कथञ्चिद् बाह्यविशेषणे प्रत्यक्षादेरपि बाह्यविषयावशेषात् तन्निषेधं कुर्वाणस्य वादिनस्तैः प्रत्यक्षादिभिः पक्षबाधनं भवेत् । पूर्वं तु प्रत्यक्षग्रहणमुपलक्षणार्थं सर्वप्रत्यक्षादिविरोध एव त्वनालम्बनानुमानस्य दर्शयितव्य इति ॥ ३२ ॥

यत्तु सुपरिनिश्चयेन बाह्यालम्बनसम्बन्धः प्रसिद्धः । किं तदुपन्यासेनेत्युक्तम्, अत आह — सुनिश्चयेनेति । उक्तमिदमस्माभिर्नायमनुमानप्रयोग इति, किन्त्वनुमानेन जाग्रत्प्रत्यक्षधियां स्वप्नधीसामान्यं मन्यमानस्य तद्वैषम्यप्रदर्शनार्थं सुपरिनिश्चितत्वाभिधानम् । सुपरिनिश्चिता एते

दुष्टज्ञानगृहीतार्थप्रतिषेधो हि युज्यते ।
गृहीतमात्रबाधे तु स्वपक्षोऽपि न सिध्यति ॥ ३४ ॥

अग्राह्यत्वाच्च भेदेन विशेषणविशेष्ययोः ।
अप्रसिद्धोभयत्वं वा वाच्यमन्यतरस्य वा ॥ ३५ ॥

वक्तृश्रोत्रोश्च यज्ज्ञानं विशेषणविशेष्ययोः ।
तन्निरालम्बनत्वेन स्ववाग्बाधो द्वयोरपि ॥ ३६ ॥

प्रत्यया बलीयांसः । नैषु परिपन्थिष्वनुमानमात्मानं लभते । एतस्माद् अनुमानादित्यर्थः ॥ ३३ ॥

एतदेव प्रपञ्चयति — दुष्टज्ञानेति । दुष्टेनासुपरिनिश्चितेन गृहीतोऽर्थः प्रतिषेधमर्हति नेतर इति । गृहीतमात्रबाधे तु बहवः साधनदोषा भाष्यकारेणान्तर्णीताः । तान् प्रतिपादयिष्यन् पक्षाभावं तावदाह — गृहीतेति । यदि गृहीतमात्रं मिथ्येत्युच्यते, तदा योऽयं निरालम्बनाः प्रत्यया इति स्वपक्षः सोऽपि गृहीतत्वान्मिथ्या स्यात् । अतः शक्यं वक्तुं पक्ष एवास्मिन् भवत्साधने नास्तीति ॥ ३४ ॥

अपिच, निरालम्बनत्वेन विशिष्टाः प्रत्ययाः साध्यन्ते । तादिह विशेषणविशेष्यभेदावग्रहस्यापि मिथ्यात्वान्न विशेषणविशेष्ययोर्विवेकः सिध्यति, तदभावाच्च वक्तुं शक्यमप्रसिद्धविशेषणविशेष्यः पक्षोऽप्रसिद्धान्यतरो वेति । तदेतदाह — अग्राह्यत्वाच्चेति । अन्यतरस्य वा असिद्धिर्वक्तव्येत्यर्थः ॥

दूषणान्तरमाह — वक्तृश्रोत्रोरिति । पञ्चधा स्ववाग्विरोधः । अभिधोच्चारणधर्मधर्म्युभयोक्तिभिः । तदिदमुभयोक्त्या स्ववाग्विरोधः । द्वयोरपि विशेषणविशेष्ययोर्निरालम्बनत्वप्रत्यययोर्यद् वक्तुः श्रोतुश्च ज्ञानं जायते, तदपि प्रत्ययत्वादनालम्बनमिति पक्षो न सिध्यतीति, तत्सालम्बनत्वे चानैकान्तिकत्वान्न प्रत्ययानामनालम्बनत्वं भवेत् । सोऽयमुभयोक्त्या स्ववाग्विरोध इति ॥ ३६ ॥

सम्भवो नच भेदस्य विशेषणविशेष्ययोः ।
तस्मान्निरूपणं नास्ति प्रतिज्ञार्थस्य शोभनम् ॥
निरालम्बनता नाम न किञ्चिद् वस्तु गम्यते ।
तेन तद्व्यतिरेकादौ प्रश्नो नैवोपयुज्यते ॥ ३८ ॥

यद्यवस्तु कथं त्वस्मांस्त्वं बोधयितुमिच्छसि ।
बुध्यसे वा स्वबुद्ध्या त्वं कल्पिता त्वथ साध्यते ॥

दूषणान्तरमाह — **सम्भवो नचेति** । एवं हि विकल्पनीयम् । किं निरालम्बनत्वं धर्मिणो भिन्नमभिन्नं वा । न तावदभिन्नं विशेषणमर्हति । नच भेदग्राहिणो ज्ञानस्य मिथ्यात्वाद् भेत्तुमर्हतीति । उपसंहरति — तस्मादिति ॥ ३७ ॥

बौद्धानां प्रत्यवस्थानमाह — **निरालम्बनतेति** । एवं हि मन्यन्ते — वस्तुनि व्यतिरेकादिविकल्पो युक्तः नावस्तुनि । यथाहुः — "वस्तुन्येष विकल्पः स्यादि"ति । नचालम्बनप्रतिषेधो वस्तुनः किं तद्व्यतिरेकादिप्रश्नेनेति ॥ ३८ ॥

दूषणान्तरमाह—**यदीति त्वमन्तेन** । यदि तावदवस्तु, **कथं** तदस्मान् प्रतिबोधयितुमिच्छा भवतः । स्वयं वा तद्विषया बुद्धिः । न ह्यवस्तु बुद्धिविषयो भवति । तद्विषयत्वे च वस्तुत्वापातात् । अर्थक्रियालक्षणत्वाच्च सत्त्वस्य । तल्लक्षणत्वाच्च वस्तुत्वस्येति । यदितूच्यते — यद्यपि निरालम्बनत्वं नाम न किञ्चित् परमार्थतोऽस्ति । तथापि तत्सत्त्वं कल्पयित्वानुमानव्यवहारः क्रियते प्रतिमायामिव देवतात्वमाराधनादिव्यवहार इति । तदयुक्तम् । असतः कल्पनायोगात् । अन्यत्र प्रसिद्धसद्भावा हि विष्ण्वाद्या देवता युक्तं यदन्यत्र कल्प्यन्ते । अत्यन्ताप्रसिद्धसद्भावं त्वनालम्बनत्वं न गगनकुसुमादिवत् कल्पनामर्हति । तदेतदाशङ्क्या सह[1]ह — कल्पितेति । ३९ ॥

---

१. 'णमा', २. 'क्षा' ख. पाठः.

असतः कल्पना कीदृक् कल्पितौ वस्तु प्रसज्यते ।
कथमिष्टमभावे चेद् वस्तु सोऽपीति वक्ष्यते ॥ ४० ॥
तथा प्रत्यय इत्येष कर्म भावादि वा भवेत् ।
भावादिषु विरोधः स्यात् कर्म चेत् सिद्धसाधनम् ॥
प्रत्याख्यस्य हि रूपादेर्निरालम्बनतेष्यते ।
अविज्ञानात्मकत्वेन किञ्चिन्नालम्बते ह्यसौ ॥ ४२ ॥

अपिच केयं कल्पना । यदि ज्ञानं, किं तेन ज्ञायते । यदि निरालम्बनत्वम् , तत् तर्हि कल्पना ज्ञानात्पन्नौ व्याप्रियमाणा कथमवस्तु भविष्यति । अर्थक्रियाकारित्वमेव हि वस्तुत्वं, ज्ञानोत्पादनमपिचार्थक्रियेत्यभिप्रायेणाह-कल्पितौ वस्तु प्रसज्यत इति । अत्र चोदयति — कथमिति । यद्यवस्तु न साध्यं, कथं तर्हि भवतामपि मेघाभावेन वृष्ट्यभावः साध्यत इति । परिहरति — वस्त्विति । भवेदेवं यद्यभावो न वस्तु स्यात् । स वास्त्वत्यभावपरिच्छेदे वक्ष्यते । यद्यपि चाभावो न वस्तुशब्दवाच्यः लोकविरोधात् , तथापि नासौ निस्स्वभावः । प्रख्यायते ह्यसौ स्वसंवेद्येन भावातिरेकिणा रूपेण । अतोऽर्थक्रियाया एव घटिष्यत इति न किञ्चिदनुपपन्नमिति ॥ ४० ॥

किञ्चेदमपि चात्र विकल्पनीयं — योऽयं धर्मिणो निर्देशकः प्रत्ययशब्दः स किं भावे कर्तरि करणे वा व्युत्पद्यते, कर्मणि वा । पूर्वोक्तेषु तावत् कल्पेषु विरोधः, अकर्मकप्रत्ययासम्भवात् । नहि प्रतीतिरस्ति प्रत्येतव्यं नास्तीति सम्भवति । तदनवष्टब्धस्य (कृ? तृ)द्रूपस्याप्रकाशात् । एवमेव कर्तृकरणयोरपि वाच्यम् । यदि ज्ञानमेवार्थप्रकाशे तज्जन्मनि वा कर्तृत्वेनोपचर्यते करणत्वेन वा विवक्षाधीनत्वात् कारकाणां, तथापि तयोः प्रत्याख्येन कर्मकारकेण विनानुपपत्तिः । सोऽयं स्ववाग्विरोधः । प्रत्यय इत्युक्तमात्र एव तत्स्वभावपरामर्शात् प्रत्येतव्याभावः प्रतिषिध्यते माता मे वन्ध्येतिवन्मातृत्वेन वन्ध्यात्वम् । अतो न प्रत्यय पक्षीकृते निरालम्बनत्वं साधयितुं शक्यम् । कर्मव्युत्पत्तौ सिद्धसाधनमेव । तदेतत् सर्वमाह — तथेति ॥

सिद्धसाधनं विवृणोति — प्रत्याख्यस्येति । न खलु जडो रूपादिः किञ्चिन्नालम्बत इति ॥ ४२ ॥

कर्तृत्वे करणत्वे वा पक्षत्वं शब्दयोरपि ।
तन्निरालम्बनत्वेन पक्षाभावः प्रसज्यते ॥ ४३ ॥
प्रत्याय्येन च भिन्नेन विना कर्त्राद्यसम्भवः ।
प्रत्यये तन्निमित्ते वा बाधः स्ववचनेन ते ॥ ४४ ॥
अथापि रूढिरूपेण प्रत्ययः स्यात् तथापि तु ।
ग्राहकं वस्तु सिद्धं नः प्रत्ययोऽन्यस्य वस्तुनः ॥ ४५ ॥
तमभ्युपेत्य पक्षश्चेदभ्युपेतं विरुध्यते ।
विशेष्यस्याप्रसिद्धिश्च तवास्माकमतादृशे ॥ ४६ ॥

कर्तृकरणपक्षे त्वयमपरो दोषः यद्धर्मधर्मिवचनयोः शब्दयोरपि **निरालम्बनत्वं** प्रतिज्ञायेत । प्रतीते हि कर्ता करणं वा प्रत्ययः । यथाच **कर्तृकरणत्वे** विवक्षावशाद् ज्ञाने भवतः, तथा शब्द इति । अत एव वक्ष्यति—

"शब्दानां करणत्वं वा कर्तृत्वं वा निरूपितम् ।"

इति । किञ्चेदं शब्दयोरनालम्बनत्वम् अन्यदतोऽभिधेयाभावात् । तदभावे च पक्षाभावः प्रसज्यत इत्याह — **कर्तृत्व** इति ॥ ४३ ॥

'भावादिषु विरोधः स्यादि'ति यदुक्तं तद् विवृणोति — **प्रत्याय्येन** चेति । कर्त्रादिभावो हि न प्रत्याय्यभेदमन्तरेण सम्भवति । **अतस्तत्प्रवृत्तिनिमित्ते** प्रत्ययशब्दे स्ववचनविरोधः । स चायमस्माभिः **प्रागेव** विवृतः । वाशब्दोऽनन्तरविवृतकर्मव्युत्पत्त्यपेक्षयेति ॥ ४४ ॥

यदि त्वविभक्तावयवो रूढिरूपेण प्रत्ययशब्द उपादीयते, तदर्थश्च पक्षीक्रियते, तथापि वस्त्वन्तरग्राहकस्यैव वस्तुतोऽस्माकं प्रत्ययत्वेन **प्रसिद्धेः** स्ववचनविरोध एव भवेत्, तदेतदाह—**अथापी**ति । तथापीति । **तथापि** स्ववचनविरोध इति पूर्वेण सम्बन्ध इति । कथं स्ववचनविरोधः । **अत** आह — ग्राहकमिति ॥ ४५ ॥

वस्त्वन्तरस्यैव हि ग्राह्यस्य ग्राहकमात्मधर्माख्यं वस्त्वेव प्रत्यय **इति** नः प्रसिद्धम् । अतः कथं तस्यासति ग्राह्ये सिद्धिरिति दूषणान्तरमाह — **तमभ्युपेत्ये**ति । एवमयमसाधनवादी वक्तव्यः किं यादृशोऽस्माभिः **प्रत्यय**

आत्मधर्मस्वतन्त्रत्वकल्पनेऽपि तथा भवेत् ।
नच प्रत्ययमात्रत्वं किञ्चिदस्त्यनिरूपणात् ॥ ४७ ॥

शब्दार्थमात्ररूपेण यथान्येषां निरूपणम् ।
तथाच भवतो न स्याद् वाच्यभेदमनिच्छतः ॥

निरालम्बनता चापि सर्वथा यदि साध्यते ।
विशेषणप्रसिद्धिश्च दृष्टान्तश्च न विद्यते ॥ ४९ ॥

इष्यते स तथाविध एवाभ्युपेत्य भवता पक्षीक्रियते, न वा । तत्राभ्युपगमे तावदभ्युपेतविरोध इति । अपि चैवं सति चाप्रसिद्धविशेष्यः पक्षो भवति, त्वन्मते बाह्यार्थग्राहिप्रत्ययानभ्युपगमादित्याह — विशेष्यस्येति । अतादृशे तु स्वाभिमते पक्षेऽस्माकमप्रसिद्धविशेष्यः पक्ष इत्याह — अस्माकमिति ॥ ४६ ॥

किञ्च यादृगात्मधर्मः प्रत्ययोऽस्माकमभिमतः, स पक्षो भवदभिमतोऽथवा स्वतन्त्रः । पूर्वस्मिन् कल्पे भवतोऽप्रसिद्धविशेष्यता । उत्तरस्मिन्नस्माकमिति पूर्ववदेव दर्शयितव्यमित्याह — आत्मधर्मेति । यदि त्वनिर्धारितविशेषं प्रत्ययमात्रं पक्षीक्रियत इत्युच्यते, तन्न । तथाविधस्यानिरूपणादित्याह — नचेति ॥ ४७ ॥

ननु शक्यमिदमन्येष्वपि पक्षीकृतेषु वक्तुं यथा — किमाकाशगुणः शब्दः स्वतन्त्रं वा द्रव्यं पौद्गलाख्यं वा नित्यतया पक्षीक्रियत इति । अथ तत्राविवक्षितविशेषं शब्दार्थसामान्योपलक्षितं रूपं पक्ष इत्युच्यते, तदिहापि समानमित्यत आह — शब्देति । यथा शब्दार्थसामान्यरूपेणान्येषां पक्षाणां निरूपणं भवति, नैवमिह भवतः सम्भवति । असाधारणरूपातिरेकिणः सामान्यात्मनो वाच्यस्य भवतामनिष्टत्वादिति ॥ ४८ ॥

एवं तावद् धर्मी विकल्प्य दूषितः । धर्ममिदानीं निरालम्बनत्वं विकल्प्य दूषयति — निरालम्बनतेति । सर्वथा निरालम्बनत्वे साध्येऽप्रसिद्धविशेषणः पक्षो भवति । नहि सर्वथा निरालम्बनत्वं नाम किञ्चि-

केनचिच्चेत् प्रकारेण निरालम्बनतोच्यते ।
रसज्ञानस्य रूपादिशून्यत्वात् सिद्धसाधनम् ॥ ५० ॥

अथ बुद्धिर्यदाकारा तदालम्बनवारणम् ।
स्वाकारस्याभ्युपेतत्वात् तदभावो विरुध्यते ॥ ५१ ॥

बाह्यानालम्बनत्वेऽपि बाह्य इत्याग्रहो यदि ।
स्तम्भादौ नैव तद्बुद्धिरित्येवं सिद्धसाधनम् ॥ ५२ ॥

दस्ति । सर्वत्र देशकालान्तरावस्थितबाह्यालम्बनाभ्युपगमात् । यश्च स्वभ-प्रत्ययो दृष्टान्ततयोक्तः, सोऽपि न सर्वथा निरालम्बनः । सर्वत्र यथा-कथञ्चिदालम्बनसिद्धेर्वक्ष्यमाणत्वात् । अतो दृष्टान्ताभावोऽप्येवं सत्यापद्येतेति ॥ ४९ ॥

यदितु न सर्वथा निरालम्बनत्वं साध्यते । किन्तु सालम्बनस्यैव केनापि प्रकारेण निरालम्बनत्वमपीत्युच्यते, तदा रसादिज्ञानानां रूपाद्या-लम्बनशून्यतया सिद्धसाधनमित्याह — केनचिदिति ॥ ५० ॥

ननु यदाकारा बुद्धिस्तन्नालम्बते इति साधयिष्यामः न सिद्ध-साधनं भविष्यतीति, तदेतदाशङ्कते — अथेति । एतदपि निराकरोति — स्वाकारस्येति । अभ्युपगतो हि भवद्भिः स्वाकारो बुद्धेरालम्बनं यदाभासं प्रमेयं तदिति वदद्भिः । अतस्तदालम्बनाभावोऽभ्युपेतैनैव विरुध्यत इति ॥ ५१ ॥

ननु किमापाद्य दूषणोद्भावनम् । बाह्यानालम्बनत्वं हि नः पक्षः । तथाच भाष्योपस्कारे वर्णितमेव । अतो नाभ्युपेतबाध इत्यत आह — बाह्येति । अयमभिप्रायः — विकल्पनीयमिदं बाह्यानालम्बनत्वम् । किं बाह्यमित्यनेन रूपेण नालम्बत इत्येवं साध्यते, वस्तुतो वा बाह्यं नालम्बत इति । पूर्वस्मिन् पक्षे सिद्धसाधनम् । परस्मिन् दोषो वक्ष्यते । स्तम्भादि-धियो हि स्तम्भाद्याकारतयैव स्वविषयमालम्बन्ते न बाह्यतयेति ॥ ५२ ॥

---

१. 'कारं प्र' ख. पाठः ।

तथा स्तम्भादिरूपेण निरालम्बनतोच्यते ।
संवेदनस्य दृष्टत्वात् तद्विरोधः प्रसज्यते ॥ ५३ ॥
द्विचन्द्रादिषु तुल्यश्चेन्नेन्द्रियाप्राप्तितो हि नः ।
तत्रानालम्बनोक्तिः स्यान्नार्थसंवित्त्यभावतः ॥ ५४ ॥
सर्वत्रार्थेन्द्रियाणां नः संयोगसदसत्तया ।
संवित्तौ विद्यमानायां सदसद्ग्राह्यतास्थितिः ॥ ५५ ॥

यदि तु स्तम्भानालम्बनत्वमेव साध्यते, ततस्तद्रूपसंवेदनस्य दृष्टत्वात् संविद्विरोध एवेत्याह — तथेति ॥ ५३ ॥

अत्र चोदयति — द्विचन्द्रादिष्विति । एवं हि मन्यन्ते — समानोऽयमनालम्बनत्वाभिमतेषु द्विचन्द्रादिबोधेषु संविद्विरोधः । तत्रापि द्वावेव चन्द्रौ भासेते । तदपह्नवे स्फुट एव संविद्विरोधः । अतः केन प्रकारेण तेषामनालम्बनत्वं भविष्यतीति । परिहरति — नेन्द्रियेति । अयमभिप्रायः — यदि वयं प्रतिभासविपर्यासादन्यथात्वं ब्रूमः, तत एवमुपालभ्येमहि । न त्वेवम् । यदेव विज्ञानमिन्द्रियाप्राप्तमर्थं प्रकाशयति तदनालम्बनमिति नः सिद्धान्तः । तथाच द्विचन्द्रादिज्ञानम् । ततोऽनालम्बनमित्युच्यते । न पुनर्द्विचन्द्रादिप्रतिभासापह्नवेन, अतो न नः संविद्विरोधः, नचानालम्बनत्वस्याप्रसिद्धिरिति ॥ ५४ ॥

नन्वेवं संवेदनानपह्नवे यथावभासमर्थस्य सत्त्वात् सदसद्विवेको न स्यादत आह — सर्वत्रेति । अस्यार्थः — इदं सद् ग्राह्यमिदमसद् ग्राह्यमिति नायमर्थ इदमर्थं प्रकाशयति इदं नेति । किन्तर्हि । जायमानायामेवार्थगोचरायां संवित्तावित्थमिन्द्रियार्थसंयोगसदसत्त्वतोऽयं विभागः । यदिन्द्रियसम्प्रयुक्तमर्थं प्रकाशयति तत् सद् ग्राह्यम् । विपरीतमन्यत् । नच यथावभासमर्थस्य सत्त्वम् । बाधकदर्शनात् । अतो यद् देशान्तरस्थमिन्द्रियाप्राप्तमर्थं गृह्णाति तद् असद् ग्राह्यम् । तस्यार्थो नास्तीत्युच्यते । क्वचिद्धि किञ्चित् प्रतिषिध्यते । न स्वरूपेणैव किञ्चित् । नेदं रजतमिति नायमर्थः

भवतस्त्विन्द्रियादीनामभावाद् ग्रहणादृते ।
नालम्बनत्वहेतुः स्यान्निषेधोऽतो न युज्यते ॥ ५६ ॥
बहिर्भावाप्रसिद्धत्वात् तेनानालम्बना मतिः ।
कथञ्चित् साध्यते नैष पक्षो हि ज्ञायते तदा ॥ ५७ ॥
यथान्यबोधनाशक्तेर्नाप्रसिद्धे विशेषणे ।
पक्षसिद्धिस्तथैव स्याद् विशेषणविशेषणे ॥ ५८ ॥
नाप्रसिद्धे पदार्थे हि वाक्यार्थः सम्प्रतीयते ।

रजतं नास्तीति । अस्ति हि तद् देशान्तरादिषु । किन्तु इह नास्तीति **यत्रेन्द्रियेण** न प्राप्यते, इदमस्तीत्यपि यदेव यत्रेन्द्रियेण प्राप्यते तदुच्यते । इह घटोऽस्तीति प्रतीतिः न पुनर्घटोऽस्तीति ॥ ५५ ॥

नचैष विभागो बौद्धस्य सम्भवतीत्याह — **भवत** इति । **नच** बौद्धस्येन्द्रियादीनि सन्ति यत्प्राप्त्यप्राप्तिनिबन्धनं भावालम्बनालम्बनप्रतिषेधौ युज्येते इति ॥ ५६ ॥

दूषणान्तरमाह — **बहिर्भावेति साध्यतेन्तेन** । न **ह्यनालम्बनज्ञानवादिनां** बहिर्भावो नाम कश्चित् सिद्धः, येन विशिष्टमनालम्बनत्वं बुद्धेः साध्यत इति । किमिति न साध्यते, अत आह — **नैष इति** । पक्षप्रज्ञापनार्थं हि साधनवचनं, नचाप्रसिद्धपदार्थविशिष्टः पक्षो **ज्ञापयितुं** शक्यत इति ॥ ५७ ॥

किं पुनः पक्षो न ज्ञायते । अज्ञाते विशेषणविशेष्ये च **विशिष्टो** न ज्ञायते । तच्चोभयमपि प्रसिद्धमेवेति किं विशेषणविशेषणाप्रसिद्ध्या, **अत** आह — **यथेति** । विशेषणाप्रसिद्धावेव किम् । न तावत् पक्षसिद्धिः, **तथा**विधमन्यो बोधयितुं न शक्यत इति चेत्, समानमिदं तद्विशेषणाप्रसिद्धावपीति तद्विशेषणाप्रसिद्धौ पक्षो न ज्ञायत इति सूक्तमिति ॥ ५८ ॥

एतदेव प्रपञ्चयति — **नाप्रसिद्ध** इति । प्रतिज्ञावाक्यार्थो **हि**

तत्पूर्वकत्वात् पक्षश्च वाक्यार्थः स्थापयिष्यते ॥ ५९ ॥

पर्युदासे निषेधे वा व्यतिरिक्तस्य वस्तुनः ।
प्रमेयत्वाद्यभेदेन जगतः सिद्धसाधनम् ॥ ६० ॥

यदि चात्यन्तभेदेन निरालम्बनतोच्यते ।
कथञ्चिच्चेद् विरुध्येत प्राक्पक्षः कल्पितेन ते ॥

वस्त्वाद्याकारतश्चापि धीर्निरालम्बनेष्यते ।
ग्राहकाच्चेदभिन्नत्वं शक्तिभेदो विरुध्यते ॥ ६२ ॥

पक्षः, स च पदार्थपूर्वकः । अतो बाह्यादिपदार्थासिद्धौ पक्षो न सिध्यतीति ॥ ५९ ॥

दूषणान्तरमाह — पर्युदास इति । (न ? ना)व्यतिरिक्तालम्बनः प्रत्ययः, (व्यतिरिक्तं नालम्बते) इति हि द्वावर्थौ सम्भवतः पर्युदासप्रतिषेधाभ्याम् । पर्युदासे हि नामयोगान्नञोऽव्यतिरिक्तालम्बनः प्रत्यय इत्यर्थो भवति । निषेधे तु आख्यातयो(गाद्) व्यतिरिक्तं नालम्बत इति । उभयथा हि सिद्धसाधनम् । प्रमेयत्वादिना हि जगतो न भेदमातिष्ठामहे । अतः स्तम्भादिज्ञानात् प्रमेयत्वादिनाव्यतिरिक्तं भवति । अतएवाभेदाद् व्यतिरिक्तं च न भवतीति सिद्धसाधनमिति ॥ ६० ॥

किञ्च, इदमपि चात्र विकल्पनीयं किमत्यन्तभिन्नेन स्तम्भादिना निरालम्बनत्वं साध्यते, कथञ्चिद् भिन्नेन वा । पूर्वस्मिन् कल्पे तावत् सिद्धसाधनमेवेत्याह — यदीति । सिद्धसाधनमित्यतीतेन सम्बन्ध इति । कथञ्चिद् भिन्नेन तु निरालम्बनत्वे साध्यमाने प्राक् कल्पितेन पक्षविरोधः । इष्यते हि कथञ्चित् कल्पनामात्रकल्पितं भवद्भिरपि बाह्यालम्बनम् । अतस्तन्निषेधे भवति प्राक्कल्पितेन पक्षबाधः । तदेतदाह — कथञ्चिदिति ॥ ६१ ॥

अन्यथा सिद्धसाधनं दर्शयति — वास्त्विति । बुद्धिर्हि वस्त्वाद्याकारेण जडरूपा न किञ्चिदालम्बत इति सिद्धमेव । असाधारणेन तु प्रका-

निरालम्बनबुद्धेश्च यद्युत्पत्तिः प्रसाध्यते ।
दृष्टत्वात् सेष्यतेऽस्माभिर्बाह्यग्राह्यविवर्जिता ॥ ६३ ॥
सम्यक्त्वं पुनरेतस्यास्त्वं नेच्छसि कथञ्चन ।
आत्मांशेऽवसिता ह्येषा मृगतृष्णादिबुद्धिवत् ॥
चैत्रादिप्रत्ययानां च निरालम्बनता यदि ।
धर्मभूता न गृह्येत साधनोत्थितया धिया ॥ ६५ ॥

शात्मना बाह्यमालम्बते । तत्राविशेषितोपादाने शक्यं सिद्धसाधनं दर्शयितुमिति । ननु ग्राहकाद् ग्राह्यमभिन्नमितीदमत्र नः साध्यं, तत्र किं नानाविकल्पैः । अत आह — ग्राहकादिति । न तावन्निरालम्बनाः प्रत्यया इत्ययमर्थः ग्राहकाद् ग्राह्यमभिन्नमिति । एवं सत्यपि यद् द्विशक्तिकत्वं ज्ञानस्येष्टं ग्राह्यग्राहकशक्तिकं ज्ञानमिति तद् विरुध्यते, ग्राह्यापलापात् । यद्यपि न बौद्धैराश्रयातिरेकिणी शक्तिरिष्यते, तथापि शक्तिभेदद्वारेण द्व्यात्मकत्वमेव दर्शयतीति द्रष्टव्यमिति ॥ ६२ ॥

यदि तु सर्वप्रकारासम्भवान्निरालम्बनबुद्ध्युत्पत्तिमात्रमेव प्रसाध्यते, तत्रापि च सिद्धसाधनमेव । उत्पद्यते हि निरालम्बनाः प्रत्यया इत्युक्ते निरालम्बनत्वबुद्धिः । न त्वियमर्थक्रियायै समर्था, अनर्थकत्वादित्यभिप्रायेणाह — **निरालम्बनेति** ॥ ६३ ॥

नचानर्थकत्वमेवास्या न सिद्धमिति वाच्यम् । तत्सत्यत्वे हेतोरनैकान्तिकत्वप्रसङ्गात् । अतो मृगतृष्णादिज्ञानवदेवात्मांशपर्यवसायिनी बुद्धिरियमभ्युपगन्तव्या । अस्माकमपि सर्वमिथ्यात्वग्राहिप्रत्ययमिथ्यात्वं सिद्धमेवेत्यावयोरविवादात् सिद्धमनालम्बनबुद्धेरनर्थकत्वमित्याह — **सम्यक्त्वमिति** ॥ ६४ ॥

एवं चोत्पन्नायामप्यर्थशून्यायामात्मांशपर्यवसायिन्यामनालम्बनबुद्धौ चैत्रादिप्रत्ययानां पक्षीकृतानां धर्मतया निरालम्बनता न गृहीता साधनोत्थितया धियेति, नानाविषयत्वात् प्रतियोगिना निरालम्बनत्वेनानिराकृता

ततो विषयनानात्वात् प्रतियोग्यनिराकृता ।
रूपात् सालम्बनप्राप्तिः सती केन निवार्यते ॥ ६६ ॥

यदि प्रत्ययशब्दोऽपि प्रत्ययत्वेन गृह्यते ।
संवित्त्यालम्बनत्वेन वार्यते सिद्धसाधनम् ॥ ६७ ॥

बुद्ध्युत्पादनशक्तिश्चेद् वार्या साध्यं न सिध्यति ।
साधनस्य प्रयोगोऽत्र बोधकत्वाद् विना न ते ॥ ६८ ॥

सती चैत्रादिस्वरूपपर्यालोचनयालम्बनप्राप्तिः केन वारयितुं शक्या । समानविषयोपनिपातिनोर्हि विरुद्धार्थगोचरयोः प्रत्ययय्योर्बाध्यबाधकभावो भवति, यथेदं रजतं नेदं रजतमिति चानयोः । नचेह तथा । चैत्रादिप्रत्यया हि स्वविषयं स्थापयन्ति । नच तन्निरालम्बनबुद्धिः प्रतिक्षिपति, अर्थाभावात् । स्वांशगोचरा हि सा । अतोऽस्याः स्वांशो विषयः । चैत्रादिप्रत्ययानां च चैत्रादय इति स्पष्टो विषयभेद इति किं केन बाध्यत इत्युच्यते । तदेतदाह — चैत्रादीति द्वयेन ॥ ६५,६६ ॥

किञ्च यत् तत् पूर्वमुक्तं कर्तृत्वे करणत्वे वा प्रत्ययत्वे शब्दोऽपि प्रत्ययशब्दवाच्य इति, तद् यदि तथैव प्रत्ययशब्दोऽप्यत्र प्रतीतिकर्तृकरणत्वात्मना प्रत्ययत्वेनोपादीयते, तत्संवित्त्यालम्बनत्वं चैत्रादीनां वार्यते, चैत्रादयः प्रत्ययशब्दसंवित्त्यालम्बना न भवन्तीति । ततस्तस्याचेतनत्वेन तत्संवित्त्यालम्बनत्वं चैत्रादीनां नास्ति अंशे सिद्धसाधनमेवेत्याह — यदीति ॥ ६७ ॥

अथ तु बुद्ध्युत्पादनशक्तिविरहस्तस्यानालम्बनत्वमित्युच्यते प्रत्ययशब्दो निरालम्बन इति, किमुक्तं भवति । न किञ्चिद्विषयां बुद्धिमुत्पादयितुं शक्यत इति । ततस्तेनाशक्तेन पक्षो न बोधित इति साध्यं न सिध्यतीत्याह — बुद्ध्युत्पादनेति । साध्यासिद्धौ कारणमाह — साधनस्येति ॥

नचाभिधार्थसम्बन्धादृते भेदाच्च नास्त्यसौ ।
नचासौ तद्गतं भेदं बोधयन्त्या धिया विना ॥ ६९ ॥
प्राश्निकैर्नागृहीते च वाक्ये सावयवे पृथक् ।
पक्षे हेतौ च दृष्टान्ते वादिनि प्रतिवादिनि ॥ ७० ॥
साधनस्याप्रयोगः स्यादभ्युपेत्योच्यते यदि ।
पूर्वाभ्युपगमेनैव प्रतिज्ञा साध्यते ततः ॥ ७१ ॥
धर्माधर्मादिभेदे च नासिद्धे परमार्थतः ।
शिष्यात्मनोश्च धर्मादेरुपदेशोऽवकल्पते ॥ ७२ ॥
तदनुष्ठानतो बुद्धेरिष्टो भेदः स्फुटं च तैः ।
सूत्रान्तरेऽभ्युपेतत्वाद् भवेदागमबाधनम् ॥ ७३ ॥

पूर्वाभ्युपगमविरुद्धोऽप्ययं पक्ष इत्याह — **नचेति** त्रयेण । न तावदनभिधायकेषु पदेषु साधनवाक्यं प्रयोगमर्हति । नचाभिधानमर्थसम्बन्धादृते पदानां सम्भवति । नच सम्बन्धो भेदमन्तरेण । नच भेदः शब्दार्थगतभेदं बोधयन्त्या धिया विना (न?) सम्भवति । तदत्र साधनं प्रयुञ्जानेन भिन्नौ शब्दार्थावभ्युपगन्तव्यौ । तथा सति प्राश्निकाः सभ्या गृह्णन्ति च सावयवं साधनवाक्यं पृथक् च पक्षहेतुदृष्टान्तान् वादिप्रतिवादिनौ चेति । यावदिदं नावस्थाप्यते न तावद् व्युत्थित प्रतिपादनाय साधनस्य प्रयोगो भवति । एतच्च सर्वमभ्युपेत्य निरालम्बनत्वे साध्यमाने भवति पूर्वाभ्युपगतविरोध इति ॥ ६९—७१ ॥

आप्ततमत्वाभिमतबुद्धाभिप्रायविरुद्धोऽप्ययं पक्ष इत्याह — **धर्मेति भेदोन्तेन** । यावद्धि धर्माधर्मौ भिन्नौ परमार्थौ न सिध्यतः शिष्यश्चोपदेश्यः आत्मा चोपदेष्टा, तावन्न धर्माधर्मोपदेशो घटत इति । उपदिष्टाश्च चैत्यवन्दनादयः शिष्येभ्यो धर्मत्वेन बुद्धेः । अतश्चेष्टादर्शनेन सर्वमनुमतं नामिति तेषामाशय उन्नीयते । अतस्तद्विपरीतवचने भवति तदभिप्राय-

सर्वलोकप्रसिद्ध्या च पक्षबाधोऽत्र ते ध्रुवम् ।
कृत्स्नसाधनबुद्धिश्च यदि मिथ्येष्यते ततः ॥ ७४ ॥
सर्वाभावो यथेष्टं वा न्यूनता वाभिधीयते ।
तेषां सालम्बनत्वे वा तैरनैकान्तिको भवेत् ॥ ७५ ॥
तदन्यस्य प्रतिज्ञा चेत् तदन्यप्रत्ययो मृषा ।
तन्मिथ्यात्वप्रसङ्गे च सर्वं पूर्वं न सिध्यति ॥ ७६ ॥
स्तम्भादिसाधनज्ञानभेदो नहि यथा भवेत् ।
यावद् यावत् प्रतिज्ञेयं तदन्यस्य प्रतीयते ॥ ७७ ॥

विरोध इति । अपिच क्वचित् सूत्रविशेषे स्फुटमेव तैर्बाह्यार्थोऽभिमतः यदाश्रित्य सौत्रान्तिकेन बाह्यार्थसद्भावोऽङ्गीकृतः, अतस्तदीयागमविरुद्धोऽप्ययं पक्ष इत्याह — स्फुटमिति ॥ ७२, ७३ ॥

तथा सर्वलोकप्रसिद्धमहीमहीधरोदधिनिषेधाल्लोकविरुद्धोऽपीत्याह — **सर्वेति** । अपिच सर्वज्ञानानामनालम्बनत्वे कृत्स्नसाधनज्ञानमिथ्यात्वात् सर्वसाधनाभावो वा यथेष्टं पक्षादिन्यूनत्वं वा शक्यमापादयितुमित्याह — कृत्स्नेति । यदि तु न साधनज्ञानं मिथ्येत्युच्यते, ततः पक्षादिप्रत्ययैरेव हेतोरनैकान्तिकत्वमित्याह — तेषामिति ॥ ७४, ७५ ॥

यदि पक्षादिग्राहिव्यतिरिक्ता एव प्रत्यया निरालम्बनत्वेन प्रतिज्ञायन्ते, ततस्तद्व्यतिरेकग्राहिणः[1] प्रत्ययस्य पक्षाद्यविषयत्वान्मृषात्वमापद्यत इत्याह — **तदन्यस्येति** । अभ्युपगमे दोषमाह — तन्मिथ्येति । तदन्यप्रत्ययमिथ्यात्वे हि यत् तेन पक्षादिप्रत्यय-व्यतिरेकग्राहिणा गृहीतं तन्मिथ्येति सर्वमिथ्यात्वमापद्यत इति ॥ ७६ ॥

कथं न सिध्यत्यत आह — **स्तम्भेति** । व्यतिरेकग्राहिप्रत्ययमिथ्यात्वे हि न स्तम्भादिज्ञानेभ्यः साधनज्ञानस्य कश्चिद् विशेषः । तद्वदेव तु साधनज्ञानमपि मिथ्या भवेदिति । एतद्दोषपरिहारार्थं तु व्यतिरेकग्राहि-

---

१. 'कि' क. पाठः.

तावत् तावत् परेषां स्यान्मिथ्यात्वादन्यबाधनम् ।
विरुद्धाव्यभिचारित्वं बाधो वाप्यनुमानतः ॥ ७८ ॥
इत्थं सर्वेषु पक्षेषु वक्तव्यं प्रतिसाधनम् ।
बाह्यार्थालम्बना बुद्धिरिति सम्यक् च धीरियम् ॥
बाधकापेतबुद्धित्वाद् यथा स्वप्नादिबाधधीः ।
सापि मिथ्येति चेद् ब्रूयात् स्वप्नादीनामबाधनात् ॥
तस्मात् साधर्म्यदृष्टान्तो भवतः साधनेऽधुना ।
विज्ञानास्तित्वभिन्नत्वक्षणिकत्वादिधीस्तथा ॥ ८१ ॥

प्रत्ययव्यतिरिक्ता एव प्रत्यया यदि पक्षीक्रियन्ते, ततो व्यतिरेकग्राहिप्रत्ययव्यतिरेकग्राहिणस्तद्व्यतिरेकान्मिथ्यात्वप्रसक्तौ सर्वपूर्वासिद्धिः, पुनरपि तदन्यविशेषणेऽनवस्था । यत्रैव तु परः क्वचिदवतिष्ठते तन्मिथ्यात्वात् पूर्वपूर्वाभावो दर्शयितव्य इत्याह — यावदिति । किञ्चाद्यपक्षात् प्रभृति य एते तदन्यप्रतिज्ञादिभिः पक्षा दर्शिताः, तेषु सर्वेषु विरुद्धाव्यभिचारित्वमनुमानविरोधो वेत्याह — विरुद्धेति ॥ ७७,७८ ॥

कथमेतदुभयमित्याह — इत्थमिति । इत्थं वक्ष्यमाणप्रकारेण । अत्र प्रतिसाधनं वक्तव्यमिति । तदेव प्रतिसाधनं दर्शयति — बाह्येति । बाह्यार्थालम्बना बुद्धिरिति धीर्धर्मिणी । सम्यगिति साध्यो धर्मः, बाधकापेतबुद्धित्वात्, स्वप्नज्ञानादिबाधबुद्धिवत् । इदं च प्रसिद्धावयवत्वेन निरालम्बनानुमानाद् बलवदिति तस्यानुमानबाधो भवति । यदि तुल्यबलत्वमेव मन्यते, ततो विरुद्धाव्यभिचारित्वमिति विवेको दर्शयितव्यः । (स्वार्थिकस्त्विति ?) यदि तु स्वप्नादिबाधबुद्धिरपि मिथ्येति ब्रूयात्, ततस्तेषामबाधितत्वादसत्यत्वे दृष्टान्ताभाव इत्याह — सापीति ॥ ७९-८०½ ॥

किञ्च भिन्नं ज्ञानमात्रं क्षणिकमिति या बुद्धयः ताः सम्यङ् मिथ्या वा, सत्यत्वे तावदनैकान्तिकत्वमित्याह — विज्ञानेति । तन्मिथ्यात्वाभ्युपगमे

सम्यक् चेदभ्युपेयेत तथा नैकान्तिको भवेत् ।
तन्मिथ्याभ्युपपत्तौ च पक्षबाधः प्रसज्यते ॥ ८२ ॥
तथाच बद्धमुक्तादिव्यवस्था न प्रकल्पते ।
ततश्च मोक्षयत्नस्य वैफल्यं वः प्रसज्यते ॥ ८३ ॥
विकल्पोत्पद्यमाना च ज्ञानास्तित्वादिधीर्यदि ।
मृषेष्टा नच दृष्टात्र प्रमाणान्तरतो गतिः ॥ ८४ ॥
प्रमाणाभावतस्तेन ज्ञानास्तित्वादि दुर्लभम् ।
सर्वं चाप्यस्मदादीनां मिथ्याज्ञानं विकल्पनात् ॥८५॥
सान्निध्यविप्रकृष्टत्वे सत्त्वासत्त्वे च दुर्लभे ।
मिथ्याज्ञानाविशेषेऽपि साङ्ख्यादिपरिवर्जनात् ॥

तु सविशेषणपक्षीकृतज्ञानाभावात् पक्षबाध इत्याह— तन्मिथ्येति ॥ ८२ ॥

एवंचासति ज्ञाने शून्यताप्रमाणार्थ इति को बद्धः को वा मुक्तो भवेत् । तदेतदाह — तथेति । मोक्षयत्नोऽपि प्रव्रज्यादिरेवं सति विफलस्तपस्विनामित्याह — तत इति ॥ ८३ ॥

यदितूच्यते — सविकल्पकेन ज्ञानमात्रपक्षो व्यवस्थाप्यते सर्वविकल्पानां मिथ्यात्वाद्, निर्विकल्पकेन त्वात्मानं लभत इति । तदयुक्तम् । नहि ज्ञानमात्रं विश्वं क्षणिका भावा इत्यादि निर्विकल्पकेन कस्यचित् प्रतिभाति । अनुमानेन त्वेवजातीयका अर्थाः साध्यन्ते । तच्च सविकल्पकत्वान्मिथ्यैवेति ज्ञानास्तित्वादिपक्षो दुर्लभः । अतो युक्तं मोक्षयत्नस्य वैफल्यमित्याह — विकल्पेति सार्धेन । अत्र च निर्विकल्पकसत्यत्वे स्तम्भादिधियामपि तथाविधानां सत्यत्वापत्तेर्न बाह्यार्थाभावः सिध्यतीति वक्तव्यम् । तदुपेक्ष्यैवोत्तरविभवात् परिहारान्तरमुक्तमिति ॥ ८४½ ॥

अपिच योगिभ्योऽर्वाचामस्मदादीनां सर्वमेव ज्ञानं कल्पनास्पदमिति मिथ्याज्ञानमेव । नहि प्रधानं जगत्कारणं पञ्चविंशतितत्त्वमित्यादिज्ञानेभ्यो ज्ञानमात्रं जगत् क्षणिकाः सर्वे भावा इत्यादिप्रत्ययानां कश्चिद्विशेषो दृश्यते ।

बौद्धदर्शन एकस्मिन् पक्षपातो न युज्यते ।
मृषात्वं यदि बुद्धेः स्याद् बाधः किं नोपलभ्यते ॥ ८७ ॥
बाधाद् विनापि तच्चेत् स्याद् व्यवस्था न प्रकल्पते ।
प्रतियोगिनि दृष्टे च जाग्रज्ज्ञाने मृषा भवेत् ॥ ८८ ॥
स्वप्नादिबुद्धिरस्माकं तव भेदोऽपि किङ्कृतः ।
नचान्यत् प्रतियोग्यस्ति जाग्रज्ज्ञानस्य शोभनम् ॥
यद्दर्शनेन मिथ्यात्वं स्तम्भादिप्रत्ययो व्रजेत् ।

सर्वस्य सविकल्पकत्वेन मिथ्याभ्युपगमात् । अतो गृह्यमाणविशेषेषु तीर्थकरप्रवादेषु योऽयं साङ्ख्यादिसिद्धान्तपरिवर्जनेन बौद्धसिद्धान्त एकस्मिन् **पक्षपातः**, तत्र न कश्चिद्धेतुरुपलभ्यते । नच कल्पनास्पदत्वाविशेषेऽपि **अर्थसदसद्भावकृतमिन्द्रियसान्निध्यविप्रकृष्टकृतं** वा सम्यङ्मिथ्यात्वं सम्भवति । सर्वकल्पनानामसदर्थत्वात् । सर्वबाह्यापलापे चास्य विभागस्य दुर्लभत्वात् । तदेतदाह — **सर्वं** चेति द्वयेन ॥ ८६½ ॥

अपिच बुद्धीनां मिथ्यात्वं मृगतृष्णादिज्ञानेषु बाधकेन व्याप्तमुपलब्धम् । नच जाग्रद्बुद्धयो बाध्यन्ते । अतो व्यापकनिवृत्त्या व्याप्यनिवृत्तिरित्यभिप्रायेणाह — **मृषात्वमिति** ॥ ८७ ॥

विनापि बाधकं मृषात्वाभ्युपगमे क्षणभङ्गादिप्रत्ययामिथ्यात्वादव्यवस्थेत्याह — **बाधादिति** । अपिच सम्यङ् मिथ्येति च प्रतियोगिसापेक्षम् । किञ्चिद्धि सम्यगपेक्ष्येतरन्मिथ्या भवति, मिथ्या च किञ्चिदपेक्ष्य परं सत्यम् । तव तु सर्वमिथ्यात्वाभ्युपगमे किंकृतः सम्यङ्मिथ्यात्वविभागः । अस्माकं तु जाग्रज्ज्ञानमेव सत्यं प्रतियोग्यपेक्ष्य स्वप्नादिज्ञानं मिथ्या भवतीति युक्तं, तदेतदाह — **प्रतीति** ॥ ८८½ ॥

न केवलं स्वप्नादिज्ञानानां प्रतियोग्यभावान्मिथ्यात्वं न सिध्यति, जाग्रज्ज्ञानानामपि शोभनाभिधानसत्यप्रतियोग्यभावान्मिथ्यात्वं न सिध्यतीत्याह — **नचेति** ॥ ८९½ ॥

---

१. 'स्व' ख. पाठः.

स्वप्नादिप्रतियोगित्वं सर्वलोकप्रसिद्धितः ॥ ९० ॥
तदीयधर्मवैधर्म्याद् बाधकप्रत्ययो यथा ।
योगिनां जायते बुद्धिर्बाधिका प्रतियोगिनी ॥
जाग्रत्स्तम्भादिबुद्धीनां ततः स्वप्नादितुल्यता ।
प्राप्तानां तामवस्थां च सर्वप्राणभृतामपि ॥ ९२ ॥
बाधोऽयं भविता तेन सिद्धा सप्रतियोगिता ।
इह जन्मनि केषांचिन्न तावदुपलभ्यते ॥ ९३ ॥
योग्यवस्थागतानां तु न विद्मः किं भविष्यति ।

जाग्रज्ज्ञानप्रतियोग्यपेक्षया स्वमते स्वप्नादिधियां मिथ्यात्वमुक्तम् । तत्रैवोपपत्तिमाह — स्वप्नेति । स्वप्नादिप्रत्ययविधर्माणो हि जाग्रत्प्रत्ययाः । सर्वलोकप्रसिद्धा हि ते । स्वप्नस्तु कस्यचिदेव निद्राक्रान्तान्तःकरणस्य भवति । अतो यथा तद्बाधके प्रत्यये सार्वलौकिके स्वप्नादिप्रतियोगित्वमेवमन्येषामपि जाग्रत्स्तम्भादिज्ञानानां तत्प्रतियोगित्वं, तदपेक्षया च स्वप्नादिधियां मिथ्यात्वमिति ॥ ९०½ ॥

अत्र चोदयति — योगिनामिति । सत्यं प्रतियोगिसापेक्षं मिथ्यात्वं, जाग्रद्बुद्धीनामपि भावनाबलनिष्पन्नप्रतियोगिज्ञानापेक्षया मिथ्यात्वं भविष्यति । सत्या हि सा विगलितनिखिलकल्मषस्य स्फुटाविकल्पप्रकाशा जायते । अतो युक्तं तदपेक्षया सांसारिकज्ञानानां मिथ्यात्वमिति ॥ ९१½ ॥

ननु कस्यचिदेव भावनाप्रकर्षकाष्ठाप्राप्तस्य योगिनो जाग्रद्बुद्धिपरिपन्थिनी बुद्धिराविर्भवति । तास्तु सर्वलोकप्रसिद्धा एवेत्युक्तम् । अतः कथमेकदेशभुवा ज्ञानेन सार्वलौकिकाः प्रत्यया बाध्यन्ते, अत आह — **प्राप्तानामिति** । अयमभिप्रायः — तावदेव हि संसारिणो न बाधं मन्यन्ते, यावन्न बुद्धभूमिमधिरोहन्ति । प्राप्ततद्भूमयस्तु सर्व एव प्राणभृतो बाधं मन्यन्ते । अतो न बहल्पविषयतया कश्चिद् विशेष इति सिद्धं योगिज्ञानेन प्रतियोगिना जाग्रद्बुद्धीनां मिथ्यात्वमिति ॥ ९२½ ॥

अत्र दूषणमाह — इहेति ॥ ९३½ ॥

योगिनां चास्मदीयानां त्वदुक्तप्रतियोगिनी ॥९४॥
त्वदुक्तविपरीता वा बाधबुद्धिर्भविष्यति ।
ईदृक्त्वे योगिबुद्धीनां दृष्टान्तो न तवास्ति च ॥९५॥
दृष्टान्तस्त्वस्मदादीनां यो गृहीतः स विद्यते ।
अथ स्तम्भादिबुद्धीनां वदेत् सप्रतियोगिताम् ॥९६॥
बाध्यत्वं चापि बुद्धित्वान्मृगतृष्णादिबुद्धिवत् ।
इष्टं सप्रतियोगित्वं मृगतृष्णादिबुद्धिभिः ॥ ९७ ॥

न तावद् वयमद्यत्वे कस्यचिज्जाग्रद्बुद्धिपरिपन्थिनं प्रत्ययमुपलभामहे । योगिनस्तु किं भविष्यति न वेति न नः प्रमाणं क्रमत इति । विनैव तु प्रमाणेन योगिज्ञाने प्रतियोगिनीष्यमाणे शक्यमस्माकमपि वक्तुम् । अस्मदीयानां योगिनां त्वदुक्तप्रतियोगिनी विपरीता वा बाधबुद्धिर्भविष्यति स्वाच्छन्द्ये हि नियामकाभावादित्याह—**योगिनामिति** ॥ ९४½ ॥

बौद्धोक्तज्ञानमात्रपक्षविधर्मविविधविषयोपदर्शनेन प्रतियोगिनी साक्षादेव वा नैतदेवमिति प्रतिक्षेपात् तद्विषयविपरीतेति । नचैवमावयोरविशेष इति वक्तव्यम् । अनुमानेन हि वयं योगिबुद्धीनामीदृशत्वमुपपादयामः । य एव हि कश्चित् प्रमाता गृहीतस्तेनैव दृष्टान्तेन योगिनामपि बहिर्विषयबोधोऽनुमीयते । सर्वस्याद्यतनस्य ग्रहीतुर्बहिर्विषयबोधात् । ज्ञानमात्रं तु निर्मुक्ताखिलनीलादिविभागमवयन्ति योगिन इत्यदृष्टान्तः, तदेतदाह—**ईदृक्त्वेति** । भवति चात्र (प्रयोगः ।) योगिनस्त्वदुक्तविपरीतबुद्धिमन्तः, बोद्धृत्वाद् अद्यतनबोद्धृवादिति ॥ ९५½ ॥

ननु योगिनां जाग्रद्बुद्धिप्रतियोगिनी बुद्धिरुत्पद्यत इति न प्रमाणं क्रमत इति यदुक्तं तदयुक्तम्, कथमनुमाने जीवति तदप्रमाणकमिति शक्यमभिधातुम् । एवंह्यत्रानुमीयते—जाग्रद्बुद्धयः सप्रतियोगिन्यो बाध्या वा, बुद्धित्वान्मृगतृष्णादिबुद्धिवदिति, तदेतदाह—**अथेति** । प्रतियोगिताबाध्यत्वे प्रागेव व्याख्याते इति ॥ ९६½ ॥

एतदपि दूषयति—**इष्टमिति** (बाध्य)त्वमन्तेन । **सत्यं** जाग्रद्बुद्धीनां हि मृगतृष्णादिबुद्धयः प्रतियोगिन्यः, एतदपेक्षयासां **सत्य-**

---

१. 'नु' क. पाठः. २. 'क्तं क' ख. पाठः.

तदात्मना च बाध्यत्वं ग्राह्यान्तरतयापि च ।
बाधकैश्चाप्यनेकान्तस्तदन्यत्वे च पूर्ववत् ॥ ९८ ॥

मिथ्याधीप्रतियोगित्वं स्वप्नादाविव ते भवेत् ।
रागादिक्षययोगित्वनिमित्ताधिगतिस्तथा ॥ ९९ ॥

यावान् विशेष इष्टश्चेत् सर्वबाधाद् विरुद्धता ।
महाजनस्य वाबाधादिदानीं बाधबुद्धिवत् ॥ १०० ॥

त्वावगतेः । अतः सिद्धसाधनं, बाध्यत्वमपि सिद्धम् । बुद्धिरूपेण हि सत्यबुद्धयोऽपि न मिथ्याबुद्धिभ्यो भिद्यन्ते । अतः तासु बाध्यासु ता अपि बाध्या भवन्तीति वाक्प्रवृत्तिरिति । अन्यथा सिद्धसाधनं दर्शयति — ग्राह्येति । सत्यबुद्धीनां ग्राह्यादन्यद् ग्राह्यान्तरं मिथ्याबुद्धीनां, तस्मिन् बाध्यमाने सर्वेषां ग्राह्यत्वेनाभेदात् सत्यधीग्राह्यमपि बाधितमेव भवति । अपिच यान्येव योगिज्ञानानि जाग्रद्धियां बाधकानीष्यन्ते, तैरेव हेतोरनैकान्तिकत्वमित्याह — बाधकैरिति । तदन्यविशेषणोपादाने च पूर्ववदनवस्था वाच्येत्याह — तदन्यत्व इति ॥ ९८ ॥

विशेषविरुद्धश्चायं हेतुरित्याह — मिथ्येति साधने । स्वप्नादिबुद्धीनां हि मिथ्याभूताः संसारिबुद्धयः प्रतियोगिन्यो दृष्टा इति प्रतिबन्धबलेन बुद्धित्वेन हेतुना जाग्रद्बुद्धीनां मिथ्याधीप्रतियोगित्वमेव साध्यते । तत्र यः प्रतियोगिनीनां धियां सत्यत्वं विशेष इष्टः, स बाध्यते । तथा रागादिक्षयनिमित्तासौ योगिनामधिगतिरिति यः प्रतियोगिन्या योगिबुद्धेर्विशेष इष्टः, तस्य सर्वस्य बाधाद् भवति विशेषविरुद्धो हेतुरिति । अयं च धर्मविशेषबाधाद् विरोधोऽनुसन्धातव्य इति ॥ ९९½ ॥

दूषणान्तरमाह — महाजनस्येति । अयमभिप्रायः — शक्यते हि प्रतिसाधनं वक्तुं, जाग्रद्बुद्धयः सत्याः इदानीं महाजनस्याबाधात् पराभिमतयोगिबाधबुद्धिवदिति । इदं च यदि बाध्यत्वानुमानेन तुल्यबलं ततः सप्रतिसाधनम् । अथ तु प्रसिद्धावयवत्वेन बलवत् ततोऽनुमानबाध

वाच्योऽनुमानबाधो वा यदिवा प्रतिसाधनम् ।
पूर्वसाधनदोषाश्च सन्धेयास्तस्य चाधुना ॥ १०१ ।

साध्याभेदादवाच्यत्वाद्धेतोर्नोभयसिद्धता ।
प्रत्ययत्वं च सामान्यं भिन्नाभिन्नं न विद्यते ॥१०२॥

भवतोऽत्यन्तभिन्नं च मत्पक्षेऽपि कथञ्चन ।
सारूप्यान्यनिवृत्ती च नेत्येतत् साधयिष्यते ॥१०३॥

तस्माद्धेतुर्न सामान्यमस्ति सिद्धं द्वयोरपि ।
विशेषयोश्च हेतुत्वं पक्षतत्तुल्यसंस्थयोः ॥ १०४ ॥

इति आगप्युक्तमेव । सर्वथा तावत् परसाधनं प्रतिबध्नातीत्यत्र तात्पर्यम् । योगिज्ञानेन बाधाद्धेतोरसिद्धिर्मा भूदिति इदानीमित्याह । योगिनां बाधबुद्धेरप्यनागताया महाजनेनाबाधाद् व्याप्तिसिद्धिरिति ॥ १००½ ॥

मूलसाधने च ये धर्मादिविकल्पैर्दोषा उक्ताः, तेऽप्यत्रानुमानेऽनुसन्धातव्या इत्याह—पूर्वेति । एवं पुनस्तत्पातनिकां कृत्वा तत्रैव दूषणान्तरमाह—तस्य चेति । तस्य च पूर्वसाधनस्याधुना दोषान्तरमभिदधमहे । धर्मधर्मिणौ विकल्प्य दूषितौ । हेतुरपि तस्योभयसिद्धो नास्ति, साध्याभेदात् । नहि प्रत्यय एष साध्ये स एव हेतुर्वाच्यो भवति, प्रतिज्ञार्थैकदेशत्वात् । अतो हेतुशून्यं साधनमिति । ननु सामान्यस्य हेतुतया पक्षैकदेशत्वं प्रतिक्षिप्तमत आह — सामान्यमिति । उक्तमिदमस्माभिरुभयसिद्धो हेतुर्नास्तीति । भिन्नाभिन्नं हि प्रत्ययत्वं तवासिद्धम्, अत्यन्ताभिन्नं च नः किञ्चिदस्तीति सिद्धं नोभयसिद्धो हेतुरस्तीति ॥ १०२½ ॥

सारूप्यान्यनिवृत्तिरूपं तु सामान्यमुपरिष्टान्निषेत्स्यत इत्याह — सारूप्येति ॥ १०३ ॥

उपसंहरति — तस्मादिति । यदि तु मा भूत् सामान्यं, विशेष एव

न स्यादन्वयहीनत्वादतद्धर्मतयापि च ।
नचार्थहीना तद्बुद्धिर्हेतुत्वेन भविष्यति ॥ १०५ ॥

आश्रयासिद्धिता चोक्ता विशेष्यस्याप्रसिद्धितः ।
तथा हेतोर्विरुद्धत्वं दृष्टान्ते साध्यहीनता ॥ १०६ ॥

विशेषणाप्रसिद्ध्यर्थविकल्पेनैव बोधिते ।
स्वप्नादिप्रत्यये बाह्यं सर्वथा नहि नेष्यते ॥ १०७ ॥

हेतुरुच्यते, तदयुक्तम् । अपक्षधर्मत्वादन्वयाभावाच्चेत्याह— विशेषयोरिति । द्वावत्र विशेषौ परिप्लवेते पक्षस्तत्तुल्यापरनामा सपक्षश्च । पूर्वत्र हेतोरन्वयाभावः । परत्रापक्षधर्मत्वम् । पूर्वं तु विशेषस्यैव हेतुत्वे साध्याभेदादवाच्यत्वमुक्तम् । इदानीं विकल्प्य दूषणान्तराभिधानमिति । ननु माभूत् सामान्यविशेषात्मको हेतुः, बुद्धिरेव त्वर्थशून्या हेतुर्भविष्यति । उत्पद्यते हि नः प्रत्ययत्वादित्युक्तेऽनर्थिका काचिद् बुद्धिः । सर्व एवायं हेत्वादिव्यवहारो बुद्धिमात्रप्रभावित एवेति सौगता मन्यन्ते । अत आह — नचेति ॥ १०५ ॥

अतएव दोषद्वयान्नार्थशून्या बुद्धिर्हेतुर्भवति । नहि सा बुद्ध्यन्तरं धर्मः । नहि क्षणिका साध्यान्वयभाजनमित्यप्रसिद्धाश्रयश्चायं हेतुर्विशेष्यग्राहिप्रत्ययनिरालम्बनत्वेन तदप्रसिद्धेरित्याह — आश्रयेति । अप्रसिद्धविशेष्यं पक्षमाचक्षाणैरेवास्माभिर्हेतोराश्रयासिद्धताप्युक्तप्रायैवेत्यर्थः । तथा 'निरालम्बनता चेह सर्वथा यदि साध्यते' विशेषणाप्रसिद्ध्यर्थं यो विकल्पः कृतः, तेनैव हेतोर्विरुद्धत्वं दृष्टान्ते च साध्यहीनता द्वे एते बोधिते । सर्वथा निरालम्बनत्वे हि साध्ये तथाविधस्य कस्यचिदसिद्धेर्व्यापिबलेन यथाकथञ्चिन्निरालम्बनत्वं सिसाधयिषतः सर्वथा निरालम्बनत्वविरुद्धं प्रत्ययत्वहेतुः साधयतीति विरुद्धत्वं, स्वप्नादिज्ञानानामपि सर्वथा निरालम्बनत्वाभावात् साध्यहीनो दृष्टान्तः । तदेतदाह — तथेति । साध्यहीनतां प्रपञ्चयति — स्वप्नेति ॥ १०७ ॥

सर्वत्रालम्बनं बाह्यं देशकालान्यथात्मकम् ।
जन्मन्येकत्र भिन्ने वा तथा कालान्तरेऽपिवा ॥
तद्देशो वान्यदेशो वा स्वप्नज्ञानस्य गोचरः ।
अलातचक्रेऽलातं स्याच्छीघ्रभ्रमणसंस्कृतम् ॥ १०९ ॥
गन्धर्वनगरेऽभ्राणि पूर्वज्ञातं गृहादि च ।
पूर्वानुभूततोयं च रश्मितप्तोषरं तथा ॥ ११० ॥

किमिति नेष्यते, अत आह — सर्वत्रेति । अस्ति हि सर्वज्ञानेष्वेव देशान्तरादिस्थमालम्बनम् । यदेव हि क्वचिद् देशे काले वा दृष्टं तदेव देशान्तरादौ प्रतीयत इत्येतदेवानालम्बनत्वम् । ननु सर्वथा ग्राह्याभाव इति । ननु यदेव क्वचिद् देशे काले वाननुभूतपूर्वं, तदपि स्वप्नज्ञाने प्रकाशते । अतः कथं तस्य देशान्तरादिस्थबाह्यालम्बनत्वमत आह — जन्मनीति । अयमभिप्रायः — पूर्वानुभूतगोचरा हि मनोमात्रसहाया स्वप्नस्मृतिः । दोषवशाच्च प्रत्युत्पन्नबोधः । नचेह प्रतिनियमः यदेकत्र जन्मन्यनुभूतमेव स्वप्नेऽवसीयत इति, जन्मान्तरानुभूतमपि कुतश्चिददृष्टाद् मनसि विपरिवर्तमानमलमेव भवितुं गोचरः स्वप्नादिधियाम् । अतोऽस्ति तावद् विभ्रमाणामपि कथञ्चिदवस्थितं बाह्यालम्बनम् । एकत्रापि जन्मनि कालान्तर इत्यर्थः ॥ १०८½ ॥

एवमन्तःकरणजन्मनः स्वप्नविभ्रमस्यालम्बनमुक्तम् । बाह्येन्द्रियजन्मनां विभ्रमाणामिदानीं बाह्यमालम्बनं दर्शयति — अलातेति धियोऽन्तेन । अलातचक्रज्ञाने शीघ्रभ्रमणदूषितमलातमेवालम्बनम् । गन्धर्वनगरविभ्रमे तु सन्निवेशविशेषावस्थितान्यभ्राण्येव दूरत्वात् पूर्वावगतगृहाकारेणालम्ब्यन्ते । तदिह पूर्वदृष्टगृहाण्यभ्राणि च तत्सन्निवेशविशेषभाञ्ज्यालम्बनम् । तदिह द्विप्रकारो विषयदोषो विभ्रमे कारणम् । मृगतोयज्ञाने पूर्वानुभूततोयमूषरं च सूर्यरश्मितप्तमेवालम्बनम् । उभयं हि विगाह्य भ्रान्तिरात्मानं लभते, तदन्यतरापाये ह्यभावात् । इह चान्तःकरणविषयदोषाभ्यां विभ्रमः । पिपासादूषितान्तःकरणस्य हि सूर्यरश्मितप्तमूषरं तोयसदृशं तद्वदाभाति । शशविषाणबुद्धेस्तु मानसादेव कुतश्चिद् भ्रमनिमित्ताज्जाय-

मृगतोयस्य विज्ञाने कारणत्वेन कल्प्यते ।
द्रव्यान्तरे विषाणं च शशस्यात्मा च कारणम् ॥
शशशृङ्गधियो मौण्ड्यं निषेध शिरसोऽस्य च ।
वस्त्वन्तरैरसंसृष्टः पदार्थः शून्यबुद्धयः ॥ ११२ ॥
कारणत्वं पदार्थानामसद्भावार्थकल्पने ।
अत्यन्ताननुभूतोऽपि बुद्ध्या योऽर्थः प्रकल्प्यते ॥

मानाया गवादिद्रव्यान्तरगतं विषाणकल्पनया च शशस्य कारणम् । उभयभावभावित्वादेकतरापाये[sपि] व्यापकाभावेति । वस्तु शशविषाणं नास्तीति बुद्धेर्न किञ्चिदालम्बनं, न तावत् शशो विषाणं वा तत्तथैवो वास्यालम्बनम् । प्रतिषेधरूपत्वाद्भावः । स्वतन्त्रावभासात् । तथाहि — न वयं शशविषाणं नास्तीत्युक्ते स्वतन्त्रमभावमवगच्छामः । अतोऽवश्यमात्मालम्बनमेवेदं नास्तीति ज्ञानं वक्तव्यम्, अत आह — मौण्ड्यमिति । अस्य शृङ्गस्य निषेध शशशिरोमौण्ड्यं कारणम् । एतदुक्तं भवति — यद्यपि स्वतन्त्रोऽभावो न प्रतीयते, भावाश्रयस्तु प्रतीयत एव । अतः शशमूर्ध्ववर्तिनोऽवयवा उपर्युपरि हीयमाना दीर्घदर्भाग्रवच्छून्यो(णा ? ण)परिणता मौण्ड्यापरनामानः शृङ्गाभावात्मना ज्ञायन्ते । यद्धि यथा निर्भासते तत्तथैवालम्बनम् । अभावोऽपि पराधीन एवानुभूयमानस्तथैवालम्बनं भविष्यति । ज्ञानं तु सदृपं नास्या नास्तीतिबुद्धेरालम्बनं भवितुमर्हति । आहच —

"भावरूपं च विज्ञानं नास्तीति कथमुच्यते ।"

इति । यत्तर्ह्यनाश्रितविषयं शून्यशब्दाज्ज्ञानमुत्पद्यते तदनालम्बनं भवेत्, सर्वाभावस्य प्रत्येतुमशक्यत्वाद्, विशेषाप्रकाशाच्च । अत आह — वस्त्विति । अयमभिप्रायः — न स्वतन्त्रं शून्यज्ञानमुत्पद्यते किञ्चिद्धि केनचित् शून्यमवसीयते । गृहं चैत्रेण जगद् वन्ध्यासुतेन । अतः केवलगृहाद्यालम्बनमेव शून्यज्ञानं नानालम्बनं स्वांशालम्बनं वेति ॥ ११२ ॥

एवमङ्गुल्यादिवाक्यजनितशाब्दविभ्रमाणामपि सन्निधिदोषदूषिता एव पदार्थाः कारणमित्याह — कारणत्वमिति । यस्तर्ह्यत्यन्तानुभूत-

तस्योत्पत्तौ कथञ्चित् स्युः पृथिव्यादीनि कारणम् ।
एष प्रत्यक्षधर्मश्च वर्तमानार्थतैव या ॥ ११४ ॥
सन्निकृष्टार्थवृत्तिश्च न तु ज्ञानान्तरेष्वियम् ।
कथमुत्पादयेज् ज्ञानं तत्रासंश्चेत् कुतोऽन्वियम् ॥

पूर्वः प्रधानादिरर्थो बुद्ध्या साङ्ख्यादिभिः कल्प्यते, तत्र न किञ्चिज्ज्ञानस्यालम्बनमुपलभ्यते । विषाणादिर्हि क्वचिददृष्टः क्वचित्तूपलभ्यत इति युक्तम् स्वरूपासतस्तु कथं कुत्र वा कल्पनमत आह — अत्यन्तेति । पृथिव्यादि सूक्ष्ममेव हि तैः प्रधानमिति कल्प्यते । स्थूलस्य हि जगतो नाकस्मान्निष्पत्तिरुपपद्यत इति प्रधानं कल्प्यते । नच तदन्यत् परमाणुभ्यो घटः इति कथञ्चित् सूक्ष्मरूपावस्थिताः पृथिव्यादय एव प्रधानबुद्ध्या गृह्यन्ते सोऽयं सूक्ष्मरूपतया तेषामग्रहणात् तद्व्यतिरिक्तः प्रधानभ्रमः । परमार्थतस्तु तत्स्थाने प्रधानपरिकल्पनादेव तदालम्बनं प्रकल्प्यत इति । अतः प्रकृतं विपरिणतं प्रकल्पनं तस्येति परामृश्यत इति ॥ ११३- ॥

नन्वत्र प्रकरणे वर्तमान एवार्थो बुद्ध्या विषयीक्रियत इत्युक्तम् तदयुक्तं, कथं हि वर्तमानाया बुद्धेरवर्तमानमालम्बनं भविष्यति । नह्यवर्तमानघटविषयं वर्तमानघटज्ञानमुपलब्धम् अत आह — एष इति । यदेव तद् वर्तमानार्थत्वमिन्द्रियसन्निकृष्टार्थविषयत्वं च । अयं प्रत्यक्षप्रमाणधर्मो न ज्ञानान्तराणाम् । न तु विभ्रमाः प्रत्यक्षं, तदाभासत्वादिति ॥ ११४$\frac{1}{2}$ ॥

ननु किमिदं प्रत्यक्षधर्म इति । नह्यत्र वैदिको विधिरस्त्येवन्धर्मिणा प्रत्यक्षेण भवितव्यमिति । यथा त्ववर्तमानं न ज्ञानं जनयितुं क्षममिति प्रत्यक्षं वर्तमानविषयम्, एवमाभासमपि तथा भवितुमर्हति । कथं हि तच्चावर्तमानेन ज्ञानमुत्पादयितुं शक्यमसतः करणत्वायोगात् । तदेतदाशङ्क्य तावत् — कथञ्चिति । परिहरति — कुत इति । अवर्तमानं ह्यर्थक्रियान्तरेष्वसमर्थं दृष्टं, ज्ञानं तु जनयत्येव । भूतभविष्यन्त्योरपि वृष्ट्योरनुमानोदये कारणभावात् । प्रत्यक्षं त्विन्द्रियसन्निकर्षानुविधायि । नचात्रावर्तमानेनेन्द्रियं सन्निकृष्यत इति भवति वर्तमानविषयम् । दोषसहायेभ्यस्त्विन्द्रियेभ्यः प्राचीनानुभवजनितसंस्कारवशेनावर्तमानमेव वर्तमानमिव भासत इति न नोपपन्नम् । ननूक्तमसतः कारणत्वानुपपत्तिरिति । शक्तिमद्धि

१. 'णा' ख. पाठः.

अर्थस्याविद्यमानस्य विज्ञानोत्पत्त्यशक्तता ।
बाह्यालम्बनतायां नौ विवादोऽर्थस्य सन्निधिः ॥११६॥
यदि नास्ति किमेवं स्यादस्मत्पक्षनिवर्तनम् ।

कारणम् । नचासतः शक्तिसमवायः सम्भवति । न । सत्त्वात् । यदि तदकान्तमसद् भवेद्, न ज्ञानं जनयेत् । अस्ति तद् देशान्तरादिषु रजतादीति न तस्य शक्तिसमवायोऽनुपपन्नः । सन्निधानं तु तस्य नास्तीति क्वचिदेवावर्तमानमाख्यायते । यत् तर्हि नास्त्येव स्वरूपतः यथा वृष्ट्यादि, तत् कथं ज्ञानस्य कारकमतीतमनागतं वा । तत्रापि सामान्यानुमानात् । तेनात्मना सत एव कारकत्वम् । अथवा यदा तावत् तदासीत् यदा तावच्छक्तिमता कारकीभूतेनात्मनि ज्ञानं जनितं, तेनापि संस्कारः, तदेवं परम्परया विषयशक्तिरात्मनि सङ्क्रान्ता । स चात्मा नित्य इति सदाश्रया शक्तिः कार्याण्यारभते । तयैव चात्मसमवायिन्या शक्त्या स्मृत्यादिज्ञानेषु जायमानेष्वतीतानागतार्थाः कारणमित्युच्यते याग इव विनष्टोऽपि शक्तिद्वारेण । भवतु तावदतीतस्मरणे, अनागता(व)बोधे तु कथम् । तत्राप्यगृहीतपूर्वस्य सम्बन्धाग्रहणेनानुमातुमशक्यत्वादवश्यं पूर्वानुभवोऽभ्युपगन्तव्यः । अतस्तत्रापि परम्परया कार्यशक्तिसङ्क्रान्तेरुपपन्नं कारकत्वम् । नन्वन्य एव पूर्वानुभूतो विशेषोऽन्यश्चायं यः सम्प्रति भविष्यत्तया ज्ञायते । अतः कथमन्याहितशक्त्यान्यस्य कारकत्वम् । न । सामान्यात्मनैकत्वात् । तस्यैव च रूपस्यानुमेयत्वादिति ॥ ११५½ ॥

नन्वेवमपि न तावद् यथाप्रतिभासं भवद्भिरर्थोऽभ्युपगतः । सन्निहितो हि प्रतिभासविषयः । नचासौ तथेष्यते । प्रतिभासविसंवादिवस्त्वभ्युपगमे न किञ्चित् प्रमाणं पश्यामः । तथा सति हि स्वांशालम्बनत्वं कल्पितं बाह्यालम्बनत्वं वा न कश्चिद् विशेषः, अत आह — बाह्येति । अयमभिप्रायः— ज्ञानस्य बाह्यविषयसदसद्भावगोचरोऽयमावयोर्विवादः । न च बाह्यसद्भावे प्रतिभासविसंवादः । भ्रान्तिज्ञानेष्वपि बहिरेव विषया भासन्ते । इदं तोयमिति मृगजलज्ञानं नाहं तोयमिति । अस्ति च तद्देशान्तरे ।

---

१. 'स्थ' ख. पाठः.

तस्माद् यदन्यथासन्तमन्यथा प्रतिपद्यते ॥ ११७
तन्निरालम्बनं ज्ञानमभावालम्बनं च तत् ।
भावान्तरमभावोऽन्यो न कश्चिदनिरूपणात् ॥ ११८
भवतां ह्ययमप्येतद् दुर्निरूपं सहेतुकम् ।

नहि बाधकेनापि बहिर्विदितस्तोयसद्भावो बाध्यते । नहि तत् तोयं स्तीति भवति मतिः । किन्तु इदं न तोयमिति । किमुक्तं भवति । इह न नास्तीति । तदिह क्वचिदेव तोयसंयोगो वार्यते न तोयम् । अतः सन्नि बाधे कः प्रतिभासविरोधः । नन्वेवमपि सन्निधिज्ञानमेवासत्सन्निध्या लम्ब त्वेन निरालम्बनं भवेत् । न । सन्निधिरित्यूषरसंयोगस्तोयस्यापादि सोऽपि क्वचित् प्रसिद्ध एवेह प्रतिषिध्यत इति न किञ्चिदनालम्बन अतो यथाप्रतिभासमेव सर्वमिदमुपदर्शितमिति न क्वचित् प्रतिभासवि वाद इति ॥ ११६½ ॥

किमिदानीमनालम्बनं नाम, न किञ्चित् तत्रभवतां, यद्येवमपह्नु सत्यमिथ्यात्वविभागः । अत आह — तस्मादिति ज्ञानमन्तेन । न ह्येमेवान्यथासन्तमन्यथाप्रतिपद्यमानमनालम्बनं ज्ञानमाचक्ष्महे । नार ग्राह्यम् । तदेवं मिथ्योच्यते इति । अभावालम्बनस्य तर्हि ज्ञानस्य किं लम्बनं, न तावद् भावः, विरोधात् । नाभावः, तस्य भावाद् विविक्तस्व स्वतन्त्रस्यानिर्भासात् । अतो बलादनालम्बनमेवापतितमत आह — अ वेति ॥ ११७½ ॥

अत्र कारणमाह — भावेति । सत्यं न स्वतन्त्रोऽभावोऽवसीय भावधर्मो ह्यसौ कथं स्वतन्त्रोऽपनीयेत । अतस्त्वदुक्तादेव स्वतन्त्रानिरू णात् कारणात् सदात्मनावस्थिते गवादौ वस्त्वन्तराभावात्मना यज् ज्ञा मुत्पद्यते तदभावालम्बनमुच्यत इति, इदं च प्रागप्युक्तमधुनोपपादितमि विवेकः । बौद्धानां तु सर्वसंविदामात्मपर्यवसायित्वादर्थसन्निध्यसन्निधिकृ विशेषाभावाच्च द्वयमपि निरालम्बनत्वमभावालम्बनत्वं च दुर्निरूपं, ह हेतोरभावात् । सति हि हेतौ सहेतुकं सदेतन्निरूपयितुं शक्यते, न स्वे दस्तीत्याह — भवतामिति । भवन्मत इत्यर्थः ॥ ११८½ ॥

ेज्ञादोषवच्चापि योज्या हेतोर्विरुद्धता ॥ ११९ ॥
ास्तव्यस्तधर्मादिस्वरूपादिविपर्ययात् ।
ान्तदोषाः सर्वे च योज्या न ह्येकवस्तुनि ॥
साध्यांशहेत्वंशव्याप्तधर्मादिसम्भवः ।
चेद् वैधर्म्यदृष्टान्तो नास्तीत्यप्यनुयुञ्जते ॥ १२१ ॥
ःभावाद्वृत्तेश्च नास्त्यत्रावसरस्तव ।

देवं तावद् दृष्टान्ते साध्यहीनता विवृता । इदानीं विरुद्धो हेतु-
ाणान्तरमाह — प्रतिज्ञेति । यथा धर्मधर्मिबोधकप्रत्ययनिराल-
। धर्मो धर्मी नोभयमिति प्रतिज्ञादिदोषोऽभिहितः, तथा समस्त-
र्मिधर्मिणोर्व्याप्तिविधेन स्वरूपस्वविशेषौ विघ्नन् विरुद्धोऽपि प्रत्य-
रिति ॥ ११९½ ॥

ष्टान्तोऽपि न केवलं साध्यहीनः सर्व एव तु दृष्टान्तदोषास्तद्वचना-
ा योजयितव्याः । नह्येकस्मिन् ज्ञानमात्रे वस्तुनि दृष्टान्तवच(सः)
निरालम्बनत्वं, हेत्वंशः प्रत्ययत्वं, तस्य चासाध्यांशेन व्याप्तिः
मितद्धर्मता च साध्यसाधनयोरिति सर्वमिदमुपपद्यते । अतो यथे-
ान्तस्य तेन तेन वचनादिना न्यूनत्वं शक्यं वक्तुमित्यभिप्राये-
दृष्टान्तेति ॥ १२०½ ॥

धर्म्यदृष्टान्तन्यूनश्चायं प्रयोग इति कैश्चिदनुयुञ्जत इत्याह —
ति । द्वेधा हि दृष्टान्तवचनसभयः । केचिद् व्याप्त्या साधर्म्य उक्ते-
र्म्यवचनं कार्यमिति मन्यन्ते । तदिदमेकेषां मतेन परिचोदित-
चेदित्युक्तमिति । ननु च विपक्षाद् हेतुं व्यावर्तयितुं वैधर्म्यवचनं,
पक्षानुवृत्तिः सम्भवति । साधनभाष्यस्य तदन्तरेण हेतोर्विपक्षाद्
सेद्धेः । अ(न्ये तु ? न्यैस्तु) हेतोः साध्येन व्याप्तिं दर्शयितुं दृष्टान्तव-
ाद् यदि सम्यक् साधर्म्यवचनादेव व्याप्तिरवगता, न सहभावमात्रं,
ीतान्वयः, तदा किं वैधर्म्यवचनेनेति साधनभाष्यव्याख्यानावसरे
। उक्तं च परैरपि 'न वा तदभावात् तत्रावृत्तेरि'ति । अतो वैध-

विधिरूपप्रतिज्ञायामेतद् वक्तुं हि शक्यते ॥ १२२ ॥
तत्रावस्तुविपक्षेऽपि प्रयोगस्य हि सम्भवः ।
यस्मिन्नानित्यता नास्ति कार्यतापि न विद्यते ॥१२३॥
[1]स्मिन् यथा खपुष्पादाविति शक्यं हि भाषितुम् ।

र्म्यस्यावचनमित्यदोषः । अत आह — तदभावेति । तदभावादवृत्तिरिति यदेतत् तवाभिधानं तस्यात्र प्रकृतसाधनेऽवसरो नास्तीति ॥ १२१½ ॥

कथमनवसरोऽत आह—विधिरूपेति । तदभावादवृत्तेरिति यदुक्तं तस्यायमर्थः — भावे प्रतिज्ञाते विधिरूपेणाभावो विपक्षो भवति । तदभावे च विपक्षेऽभावस्य निस्स्वभावत्वान्न तत्र हेतोर्वृत्तिः सम्भवतीति न वैधर्म्यं वचनीयमिति । एतदपि बौद्धा वक्तुमशक्ता एव । नहि तेषां क्वचिदपि प्रत्यक्षवद् विधिरूपेण हेतुः प्रकाशकः । व्यतिरेकप्रधानवादिनो हि ते । सर्वत्र साध्यान्वितहेतुसंविदो दुर्लभत्वात् । अतो विपक्षव्यावृत्तिमुखेनैव सर्वत्र हेतोर्गमकत्वमाश्रितम् । नचासति वैधर्म्यवचने विपक्षव्यावृत्तिः शक्यते दर्शयितुम् । अतः सर्वत्रैव त्वन्मते वैधर्म्यदृष्टान्त एव वाच्यः । तदेतदुपेत्यापि तावदुच्यते । भवतु विधिरूपप्रतिज्ञास्वभावस्य विपक्षत्वात् तदभावादवृत्तिः । आलम्बनाभावात्मकत्वे तु निरालम्बनत्वे वस्तुनि साध्ये प्रतिज्ञाते वस्त्वात्मकं सालम्बनमेव विपक्षः । तत्र च हेतोर्वृत्तिसम्भावनायां व्यतिरेको वक्तुमुचित एव । अतो वैधर्म्यन्यूनता सूक्तेति ॥ १२२ ॥

विधिरूपप्रतिज्ञायामपि वैधर्म्यस्य प्रयोजनाभावमात्रम् । अवस्त्वात्मके तु विपक्षे वैधर्म्यस्य प्रयोगः सम्भवत्येव । क्रियते चानुमानकुशलैः । अतोऽवश्यं वाच्यं वैधर्म्यं, यन्नोच्यते तन्नोचितमित्याह—तत्रेति । तद्वृत्तेन विधिरूपप्रतिज्ञा परामृश्यते । हिशब्दो हेतौ । यस्मादवस्तुविपक्षे प्रयोगः सम्भवति, तस्मात् सर्वत्रैव वैधर्म्यं वाच्यम् । तदिहानवसरं प्रतिज्ञायोत्तरश्लोके पूर्वोत्तरार्धाभ्यां हिशब्दद्वयेन हेतुद्वयमुक्तमिति प्रयोगसम्भवमेव दर्शयति — यस्मिन्निति । शब्दोऽनित्यः कृतकत्वादित्युक्ते यदनित्यं न भवति तत्कार्यमपि न भवति यथा खपुष्पमिति शक्यमेव वैधर्म्यवचनम् । सर्व-

1. 'के' ख. पाठः.

अत्र त्ववस्तुसाध्यत्वं वस्तुनश्च विपक्षता ॥ १२४ ॥
तेन स्याद् व्यतिरेकोऽस्य वाच्यो यश्चापि दर्शयेत् ।
प्रतिषेधद्वयात् तेन विधिरेव प्रदर्शितः ॥ १२५ ॥
नच शक्यो विधिर्वक्तुं वस्तुन्यसति केनचित् ।
एवं स्थिते च सर्वज्ञनिषेधादावियं गतिः ॥ १२६ ॥
प्रत्यक्षादेरसामर्थ्यं तदीयस्यास्मदादिवत् ।

भावस्यावस्तुनि शक्यनिदर्शनत्वात् । भावो हि तत्र निदर्शयितुमशक्यः । विनाशाख्यक्रियासामान्यं चानित्यत्वमिति विधिरूपप्रतिज्ञा दर्शयितव्येति ॥ १२३½ ॥

तदेवं तावदवस्तुविपक्षेऽपि प्रयोगसम्भवो दर्शितः । अत्र तु प्रकृतसाधने वस्तुन आलम्बनाभावस्य साध्यत्वं वस्तुनश्च सालम्बनस्य विपक्षता । वस्तुनि च हेतुवृत्तेः सम्भवाद् विपक्षाद् व्यतिरेकः प्रयोजनवत्त्वाद् वाच्य एवेत्याह— **अत्र त्विति वाच्योऽन्तेन** । यस्त्वत्रापि व्यतिरेकं दर्शयति तेनावश्यं यन्निरालम्बनं न भवतीति नञात्मनः प्रतिषेधद्वयात् सालम्बनविधिरेव प्रदर्शितो भवति । नच सर्वस्मिन्नेवासति वस्तुन्यालम्बनविधिः शक्यो वक्तुम् । सेयमुभयतःपाशा रज्जुः । वैधर्म्यवचने वस्तुत्वापातः । अवचने वाच्यावचनमिति । तदेतदाह— **यश्चेति चिदन्तेन** ॥ १२५½ ॥

यदि तर्हि सर्वथैव वैधर्म्यं वाच्यं सर्वज्ञनिषेधे का वार्ता । तत्रापि ह्यवस्तुनि साध्ये वस्त्वात्मनः सर्वज्ञविपक्षाद्धेतुर्व्यावर्त्यः । तथाच तदभ्युपगमप्रसक्तिरत आह— **एवमिति** । एवंहि तत्र साध्यते बुद्धप्रत्यक्षमसर्वविषयं, प्रत्यक्षत्वादस्मदादिप्रत्यक्षवत् । सर्वविषयं तु न प्रत्यक्षं शब्दवदिति । एवंतावद् व्यापकं वैधर्म्यं मन्वानानामनुयोगो दर्शितः । न त्वेवं मन्यामहे । वक्ष्यति हि—

"व्याप्त्या साधर्म्य उक्ते च न वैधर्म्यमपेक्ष्यते ।"

इति ॥ १२६½ ॥

---

१. 'श्यं निरा' ख. पाठः.

वैधर्म्यासम्भवेऽप्येतदन्ये स्वाहुरदूषणम् ॥ १२७ ॥
विनैव तत्प्रयोगेण हेतुरैकान्तिको यतः ।
सर्वथा सदुपायानां वादमार्गः प्रवर्तते ॥ १२८ ॥
अधिकारोऽनुपायत्वान्न वादे शून्यवादिनः ।
ननु सर्वं भवत्सिद्धं मयेदं साधनं कृतम् ॥ १२९ ॥
किमर्थं तदसिद्ध्या त्वं विकल्प्यात्रास्य दूषणम् ।
विप्रलिप्सुरिवाहैवं किमर्थं न्यायविद् भवान् ॥१३०॥
नाश्रौषीः साधनत्वं किं प्रसिद्धस्य द्वयोरपि ।

अनैकान्तिकाशङ्कानिराकरणं तु तदुक्तेः प्रयोजनमिह विपक्षाभावादेव तत्र सम्भवतीति किं तद्वचनेनेत्याह — वैधर्म्येति । एतदिति । प्रकृतसाधनम् । अदूषणम् । अविद्यमानदूषणमित्यर्थः ॥ १२७½ ॥

साधु तर्हि साधनमापन्नं सम्प्रतिपत्तिरेवोत्तरमत आह — सर्वेषेति । येषां हि साध्यसिद्धावुपायान्तराणि प्रतिज्ञाहेतुदृष्टा(न्तानि ? न्ताः) सन्ति, ते वादमार्गेष्वधिकृताः । सौगतास्तु न कथाश्रये । अतो न नाम वैधर्म्यवचनन्यूनता दूषणम् । अनुपायस्य हि कथं साध्यसिद्धिर्भविष्यति । वयं हि साधर्म्यात् साध्यासिद्धिं मन्वाना वैधर्म्यं नाद्रियामहे । सर्वापलापवादी तु वादे नाधिकृत एव । प्रदर्शनमात्रं हि वादग्रहणम् । तिस्रो हि कथा भवन्ति । वादो जल्पो वितण्डा चेति । शिष्यविषयो हि वादः । व्युत्थितं तु शिष्यमाणमर्थं प्रतिपादयितुं जल्पवितण्डे । तयोः स्वपक्षस्थापनाहीनं वचनं वितण्डा । तदत्र त्रयेऽपि शून्यवादिनोऽनधिकृता इति ॥ १२८½ ॥

सर्वपूर्वोक्तदोषपरिहारेणेदानीं बौद्धः प्रत्यवतिष्ठते — नन्विति । सालम्बनवादिनं हि भवन्तं प्रतिबोधयितुमिदं साधनम् । ततस्त्वं प्रसिद्धेरेव हेत्वादिभिः साध्यं बुध्यमानः किं मां प्रति बहुप्रकारं प्रतिज्ञादि विकल्प्य दूषणमात्थ ब्रवीषीति ॥ १२९½ ॥

मीमांसकः प्रक्षीणनिखिलकुहेतुजालमेवंवादिनमुपहसति — विप्रलिप्सुरिति । न्यायवित् किलासि । किमस्मान् विप्रलब्धुमेवंविधं भाषसे । न खलु कथास्वप्युभयसिद्धस्य साधनत्वमिति नाश्रौषीरिति ॥१३०½ ॥

योऽपि तावत् परासिद्धः स्वयंसिद्धोऽभिधीयते ॥
भवेत् तत्र प्रतीकारः स्वतोसिद्धे तु का क्रिया ।
तं साधयन् विरुन्ध्याद्धि पूर्वाभ्युपगतं नरः॥ १३२ ॥
असाधिते तु साध्यार्थो न तेन प्रतिपद्यते ।
परासिद्धो न पर्याप्तः परेषां प्रतिपत्तये ॥ १३३ ॥
तेनासाधनता युक्ता स्वतोसिद्धे तु किंकृता ।
द्वयोः सिद्धस्य हेतुत्वं नादृष्टायोपदिश्यते॥ १३४॥
प्रत्येष्यन्ति स्वसिद्धेन साधनेन स्वयं यतः ।
वदेत् कथमसिद्धं चेदित्यनेनापि किं तव ॥ १३५ ॥

ननु परासिद्धस्तावद् हेतुः प्रयुज्यमानो दृष्टः । शब्दोऽनित्यः कार्यत्वादिति । नहि मीमांसकस्य शब्दकार्यत्वं सिद्धम् । अथासिद्धमपि व्यापारानन्तरदर्शनादिभिः साध्यत इत्युच्यते, स्वासिद्धेऽपि तथाकरणे को दोषः, अत आह — योऽपीतिद्वयेन । परासिद्धे हि स्वयंसिद्धे प्रसाधनं प्रतीकारो भवति । स्वतोसिद्धे तु प्रतिक्रियैव नास्ति । तस्मिन् साध्यमाने पूर्वाभ्युपगमविरोधो भवति । असाधितेन त्वसता न साध्यं साध्यत इति॥ १३२½॥

अत्र चोदयति — परेति । परप्रतिपादनार्थं हि साधनवचनम् । नचासौ[1] परोऽसिद्धेन प्रतिपादयितुं शक्यते । अतः परासिद्धो न साधनमिति युक्तम् । स्वासिद्धस्य तु किंकृतमसाधनत्वमिति न विद्म इति ॥ १३३½ ॥

ननूभयसिद्धो हेतुरिति भवद्वृद्धैरपि भाषितं तत् परित्यक्तम्, अत आह — द्वयोरिति । नायमदृष्टाय वृद्धोपदेशो दृष्टानुसारेण परासिद्धप्रतिषेधपरत्वमेवास्य निश्चीयते इत्याह — प्रत्येष्य(न्ती)ति । स्वसिद्धैर्हेत्वादिभिः परः साध्यं वक्ता तु स्वयमसिद्धं कथं वक्तुं शक्नोत्यत आह — वदेदिति ॥ १३५ ॥

---

१. 'चासिद्धौ प' क. पाठः.

गृहीतमगृहीतं वा साध्यं वा साधनापि वा ।
मयोच्यते चेत् त्वसिद्धं किं त्वं न प्रतिपद्यसे ॥

यत्र स्यात् पुरुषाधीना बुद्धिस्तत्रेदमुच्यते ।
कुतोऽस्य पूर्वविज्ञानमित्यत्रैतन्न युज्यते ॥ १३७ ॥

यदि चैवं भवेदत्र प्रतिज्ञामात्र एव हि ।
मद्दोषाज्ञानमात्रेण प्रतिपत्तिर्भवेत् तव ॥ १३८ ॥

यतस्तु साधनापेक्षा तेनास्यैव प्रमाणता ।
तत्स्मृत्युत्पत्तिमात्रे तु वाक्यव्यापार इष्यते ॥१३९॥

तस्माद् यथैव साध्यांशव्याप्तहेतुनिदर्शनात् ।
साध्यं गृह्णन् न वक्तारमपेक्षेत तथा भवान् ॥१४०॥

प्रत्यक्षपरिदृष्टं हि साधनवाक्यं वक्तृप्रयुक्तं तद्दर्शनेन भवति काचित् प्रयुक्तिशक्तिकल्पना । किं तद्विशेषावधारणेन । तव तु साध्यप्रतिज्ञानार्थिनः साधनशक्तिपरीक्षैव युक्ता किमनेन कथं वक्त्रा साधनं प्रयुक्तमिति । एतदेव प्रपञ्चयति — गृहीतमिति ॥ १३६ ॥

पुरुषाधीने हि निर्णये तत्प्रत्ययानुसारित्वान्निर्णयस्य तज्ज्ञानकारणानुसरणमुचितं, नात्रानुमान इत्याह — यत्रेति ॥ १३७ ॥

अत्रापि तु पुरुषाधीने निर्णये प्रतिज्ञामात्रादेव तदनुसारी निर्णयो भवेत्, न साधनापेक्षा स्यादित्याह — यदि चैवमिति ॥ १३८ ॥

न त्वेतदस्तीति व्यतिरेकेण दर्शयति — यतस्त्विति । अस्यैव साधनस्यैवेत्यर्थः । किमिदानीं वाक्यमनपेक्षितार्थमेव, नेत्याह — त(त्स्मृतीति) । साधनस्मरणार्थमेव वाक्यम्, अतस्तच्छक्तिरेव चिन्तनीया । किं पुरुषनिरूपणेन । नह्ययमप्राप्तप्रत्ययानुसारी निश्चय इति ॥ १३९ ॥

अतो यथा स्वार्थानुमाने न वक्तारमपेक्षते, एवमिहापि भवान् नापेक्षतेत्याह — तस्मादिति । यतः स्मारकं वाक्यमित्यर्थः ॥ १४० ॥

---

१. 'प्रज्ञा' ख. पाठः.

यच्चापि भवतो ज्ञानं प्रत्यक्षादिः किमत्र ते ।
मत्प्रसिद्धास्ति युक्तिर्वा साध्यं वात्र यथेच्छसि ॥
तस्मान्न विदुषामेतदुत्तरं युज्यते यतः ।
तव हेतुरसिद्धोऽयं मम तेन न साधनम् ॥ १४२ ॥
सत्यं यदि ममैवात्र प्रतिपत्तिः फलं भवेत् ।
तदा त्वदप्रसिद्धेऽपि हेतौ मां प्रति हेतुता ॥ १४३ ॥
यदा तु ज्ञानमात्रत्वप्रतिपत्तौ भवान् मया ।
पृष्टः को हेतुरत्रेति तदैवं नोपपद्यते ॥ १४४ ॥
स्वयं नह्यगृहीतेन मत्प्रसिद्धेन वा भवान् ।
हेतुना साध्यमेतत् तु प्रतिपन्नः कथञ्चन ॥ १४५ ॥

यदि तु सर्वप्रमाणेष्वेव पुरुषापेक्षेष्यते सा तर्हि प्रत्यक्षेणार्थमुपल-(भ्य ? भ)मानस्य प्राप्नोति । नच मत्प्रसिद्धा युक्तिः साध्यं वा यत् प्रत्यक्षेण परिच्छिद्यते । तत्रास्ति यथात्र साध्यस्य निरालम्बनत्वस्य प्रत्ययत्वस्य हेतोः सिद्धिमिच्छसीत्याह — **यच्चेति** ॥ १४१ ॥

तस्मात् स्वयंसिद्धेनापि परासिद्धेन साध्यार्थप्रतिपत्तिर्न साहसास्पद-मित्याह — **तस्मादिति** ॥ १४२ ॥

परिहरति — **सत्यमिति**द्वयेन । अयमभिप्रायः — स्यादेतदेवं यदि मत्प्रतिपत्तिमात्रफलमेव साधनवचनं भवेत् । तथाहि — किं साधन-वचनेनापि अवधायकत्वं बुध्यध्वमित्येतावदुपदिश्येत, सिद्धश्चायं भवतां ज्ञानमात्रं जगदिति, तदा कुतः पुनरिदमवगतमिति पर्यनुयुक्ते त्वमेव जाना-सीति नैवंविधमुत्तरमुपपद्यत इति ॥ १४४ ॥

कथं नोपपद्यते अत आह — **स्वयमिति** । ज्ञानकारणमनुयुक्ते तदेव वक्तव्यं न मत्प्रसिद्धिः । एवं हि मत्प्रसिद्धिवचनमुपपद्यते यद्यगृही-तेन मत्प्रसिद्धेन वा हेतुना साध्यमेतद् भवान् स्वयं प्रतिपन्नः । प्रतिपन्न इति कर्तरि रूपम् । नत्वेतदुभयमप्यस्तीति ॥ १४५½ ॥

नच व्याप्रियतेऽन्यत्र वचनं प्राश्निकान् प्रति ।
स्वनिश्चयाय यो हेतुस्तस्यैव प्रतिपादनात् ॥ १४६ ॥
मत्प्रसिद्धत्वमेतस्य कुतश्चावगतं त्वया ।
कथं चेत्थं विवक्षा ते स्वयमर्थमजानतः ॥ १४७ ॥
मयि जिज्ञासमानेऽपि बुद्धिपूर्वाभिधायिनः ।
इति ज्ञात्वा च वो वृद्धैर्भाषितोभयसिद्धता ॥ १४८ ॥
तेन यद्वन्ममैतेन त्वमाधित्ससि हेतुना ।
साध्यज्ञानं तथैवाहमज्ञानं तव दूषणैः ॥ १४९ ॥

किञ्च भवदीयपरार्थानुमानलक्षणानुसारेणापि स्वप्रतिपत्तिप्रकाशनफलमेव साधनवचनं येनैवमुक्तम् । परानुमानं तु स्वदृष्टार्थप्रकाशनमिति, अतोऽवश्यं स्वज्ञानकारणमवस्थापनीयमित्यभिप्रायेणाह — नचेति । स्वनिश्चयहेतोः प्रतिपादनादन्यत्र साधनवचनं न प्राश्निकान् सभ्यान् प्रति व्याप्रियते । ते हि प्रतिपाद्याः । व्युत्थितस्तु यदि वैयात्यादुपपादितमपि न बुध्यते, किमत्र विधेयम् । प्राश्निकप्रश्ननिश्चयात् तु तत्त्वमित्यनादृत्य प्रतिवादिनं प्राश्निकपदं प्रयुक्तवानिति ॥ १४६ ॥

अपिच परबुद्धेरप्रत्यक्षत्वान्मत्प्रसिद्धत्वमपि भवतां दुरधिगममेवेत्याह — मत्प्रसिद्धत्वमिति । किञ्च विदितपूर्वमर्थं विवक्षित्वा साधनवाक्यं प्रयुज्यते । तव त्वजानतः किंकृता विवक्षा । नचातत्पूर्वा वाक्यनिष्पत्तिः सम्भवतीत्याह — कथमिति । जिज्ञासमानेऽपीति । न तावदहं जिज्ञासमानः व्युत्थितत्वात् । अतस्त्वन्निग्रह एव मम सर्वथा विधेयः । यद्यपि जिज्ञासुरहं, तथापि भवतो विवक्षाकारणं नोपलभ्यते पूर्वविज्ञानाभावादिति । यत एव स्वासिद्धं वक्तुमशक्यम्, अत एव वृद्धैरपि भवदीयैरुभयसिद्धहेतुत्वं भाषितं न परसिद्धिपरमित्याह — इतीति ॥ १४८ ॥

यदि तु मत्प्रसिद्धिमात्रेण हेतुत्वं भवेत्, तेन तर्हि यथा त्वं मत्प्रसिद्धेन हेतुना मम साध्यज्ञानमाधातुमिच्छसि । एवमहं मत्प्रसिद्धैरप्यसिद्धैर्भवदसिद्धैर्हेत्वादिभिस्तत्तन्न्यूनतोद्भावनेन नानाविधैर्दूषणैस्तवाज्ञानमाधातुमिच्छामि । मत्प्रसिद्धा अपि हेत्वादयः तवासिद्धा इति ते भवति दूषणम् ।

यथैव च भवानीदृक् साध्यमुक्त्वास्य साधनम्।
साध्यानुरूपमज्ञात्वा विहतः प्रतिपादनात् ॥ १५० ॥
तथैव प्रतिपाद्योऽपि तादृक् साध्यबुभुत्सया ।
मन्वानः साधनं दुष्टं ततः साध्यं न बुध्यते ॥ १५१ ॥
संवित्त्या साधनं मत्वा तत्सद्भावे दृढे स्थिते ।
साध्यस्यासम्भवादेव त्वदुक्तं नावबुध्यते ॥ १५२ ॥
तेनाशेषं न कर्तव्या मोहादपि मयेरिते ।
साधने साधनं ज्ञात्वा पर एवावभोत्स्यते ॥ १५३ ॥
विस्पष्टश्चाक्षपादोक्तो विरोधो हेतुसाध्ययोः ।
यमदृष्ट्वा परैरुक्तमदूषणमिदं किल ॥ १५४ ॥

को विशेषः यत् स्वयमसिद्धं साधनमुच्यते न दूषणम् । अतोऽनभिज्ञस्य परार्थानुमानप्रयोगानुपपत्तिरित्यभिप्रायेणाह — तेनेति ॥ १४९ ॥

या चेयं भवतो मृष्टाशा स्वासिद्धैर्हेत्वादिभिः किल मया साध्यं बोद्धव्यमिति, साप्ययुक्ता । तवैव ह्यतत्साधनात् । साध्यं बुध्यमानस्य ममापि प्रतिघातो भवेत् । साध्यसाधनयोरितरेतरप्रतिघातावगमादित्याह — यथेति चतुर्भिः । निगदव्याख्यानाः श्लोका इति ॥ १५३ ॥

हेतुप्रतिज्ञाविरोधाख्यमपि निग्रहस्थानमापद्यत इत्याह — विस्पष्टश्चेति । अक्षपादेन हेतुप्रतिज्ञाविरोधो निग्रहस्थानमित्युक्तम् । उदाहृतं च, शब्दो नित्यः सर्वस्यानित्यत्वादिति । नित्ये हि शब्दे न सर्वानित्यत्वं सर्वानित्यत्वे वा न तदन्तर्गतस्य नित्यत्वमिति हेतुप्रतिज्ञयोरितरेतरविरोधो निग्रहाधिकरणमिति, तदिदं भिक्षुणा दूषितम् । उक्तं च 'नायं हेतुः वैधर्म्यवचनत्वात्' । यदाह —

"दृष्टान्तोऽभिहितो ह्येष वैधर्म्येणासुशिक्षितैः ।"

इति । हेतुर्हि पक्षधर्मो भवति । नच सर्वस्यानित्यता शब्दधर्मः, कथमसौ हेतुः वैधर्म्यदृष्टान्तस्त्वसौ नित्यत्वस्य । नहि ततोऽन्यः साध्यविपक्षभाग्

१. 'षे' ग. पाठः.

ननु लोकप्रसिद्धेन पूर्वमेतेन हेतुना ।
साध्यसिद्धिर्ममाप्यासीत् परमार्थोऽस्य नास्तिता ॥

योऽधुना परमार्थेन नास्तीत्येवं प्रकाशते ।
कथं पूर्वमसावासीदसंश्चेत् साधनं कथम् ॥ १५६ ॥

भवति । इह च नित्यता साध्या, तद्विपक्षोऽनित्यता । तद् युक्तं सर्वं वैधर्म्यदृष्टान्त एवेति । तदत्रेदमाकूतं — यन्नित्यं न भवति तत् सर्वं, नायं सर्वमतोऽसर्वत्वान्नित्यः शब्द इति । असर्वत्वं हेतुः, अतः सर्वस्यानित्यत्वमहेतुरिति न हेतुसाध्ययोर्विरोध इति । पुनश्चोक्तं— वैधर्म्यवचनमपि नेदं समञ्जसमभावनियमस्य विपरीतत्वात् हेत्वभावे ह्यत्र सर्वत्वे साध्याभावस्यानित्यत्वस्य प्रदर्शनं कृतम् । साध्याभावे तु वैधर्म्यदृष्टान्ते हेत्वभावो दर्शयितव्यः । व्याप्तिविपर्ययस्यानुमाने वक्ष्यमाणत्वात् । तदिहानित्यत्वस्य सर्वत्वादिति वक्तव्ये सर्वस्यानित्यत्वादिति वचनं सुशिक्षितत्वाद् वैधर्म्यवचनस्येति । तदेतदयुक्तं, हेतावस्मिन् विवक्षितेऽक्षपादेन हेतुसाध्ययोर्विरोधोऽभिहितः । यत्त्वपक्षधर्मत्वान्न हेतुरिति, तद् दूषणान्तरं भविष्यति । असर्वत्वं वा कथं हेतुः, तदपीह सर्वान्तर्गतेरसिद्धमेव । अतः कृत्वाचिन्तामात्रेणेदं नैयायिकैरुक्तं हेतावस्मिन् विवक्षिते हेतुप्रतिज्ञयोर्विरोध इति । मा भूद् वा तदुदाहरणम् । इह तु विस्पष्टो विरोधः, यमेतमदृष्ट्वा परैर्बौद्धैरुक्तं न प्रतिज्ञाहेतुर्विरोधो दूषणमिति । किलशब्दोऽरुचौ । अत्रोदाहरणं विस्पष्टत्वाद् विरोधस्येति ॥ १५४ ॥

अत्र चोदयति — नन्विति । संसारावस्थायामनुमानानुमेयव्यवहारः । अत्र च हेत्वादयो लोकप्रसिद्धा एव । लोक इति लौकिकसंवृतिसत्यमपदिशति । अतः संवृतिसत्यसिद्धेन हेत्वादिना साध्यसिद्धिरासीदेव प्राक्, परमार्थावस्थायां तु सर्वाभावमाचक्ष्महे इत्यवस्थाभेददोष इति ॥

परिहरति — योऽधुनेति । यदि हि तद्बाधकबलेन नास्तीत्युच्यते, प्रागपि नासीदेव । बाधकेन तत्प्रागपि प्रतिक्षिप्तं रजतमिव शुक्तावावगतिक्षणादारभ्य । अतः प्रागप्यसतः कथं साधनत्वमिति ॥ १५६ ॥

साधनं चेदवश्यं च परमार्थास्तिता भवेत् ।
सिद्धिर्नापरमार्थेन परमार्थस्य युज्यते ॥ १५७ ॥
न दृष्टा शशशृङ्गादेः सम्यग्ज्ञानादिहेतुता ।
बाष्पादिनाप्यधूमेन मिथ्या वह्न्यादिबोधनम् ॥
तस्मादसत्यहेतोर्या परमार्थे मतिस्तव ।
साप्यसत्या न सत्यं हि सत्याभासेन गम्यते ॥
येऽपि रेखादयो दृष्टा वर्णानां प्रतिपादकाः ।
न ते स्वेनापि रूपेण परमार्थत्ववर्जिताः ॥ १६० ॥
वर्णात्मना न सत्याश्चेत् सर्वभावेष्वयं विधिः ।
पदार्थान्तररूपेण न सत्यं किञ्चिदिष्यते ॥ १६१ ॥

प्राक् साधनत्वाभ्युपगमे वा परमार्थास्तित्वमापद्यत इत्याह — **साधनेति** । कारणमाह — सिद्धिरिति ॥ १५७ ॥

किमिति न युज्यते, अत आह — **न दृष्टेति** । नात्यन्तमसतः साधनत्वं दृष्टं शशविषाणवदित्यनुमानमन्तर्णीतं, क्वचिद् दृष्टस्यापि रूपस्यान्यत्रोपचरितस्य परमार्थोपायता नास्ति । किमुतात्यन्ताभतो हेत्वादेरित्याह — **बाष्पादिनेति** ॥ १५८ ॥

उपसंहरति — **तस्मादिति** ॥ १५९ ॥

ननु वर्णात्मना असत्यानामपि रेखादीनां परमार्थवर्णोपायता दृष्टा, अतो नैकान्तिकोऽसत्यत्वं हेतुरत आह — **येऽपीति** । विपक्षवृत्तिर्हि हेतुरनैकान्तिको भवति । नच परमार्थोपायेषु रेखादिष्वसत्यत्वमस्ति, स्वरूपसत्यत्वात् । तेन च रूपेण वर्णबोधोपायत्वात् । तद्दर्शिनो हि स्मृतसङ्केतस्य **वर्णा बुद्धौ भवन्तीति** ॥ १६० ॥

ननु भवन्तु स्वरूपसन्तः । वर्णात्मना तावदसत्या एव, अत आह — **वर्णेति** । सर्वे हि भावाः स्वरूपेण सन्तः पररूपेणासन्तः । केनचिद् विशेषेण **रेखोदाहरणमिति** ॥ १६१ ॥

स्वरूपे विद्यमाने तु यदप्येवं प्रकाशते ।
स्वरूपाभावकल्पौ तु न सत्यं नाप्यसत्यता ॥ १६२ ॥

हेत्वादीनां तु भवतः स्वरूपेणाप्यसत्यता ।
तेन बाष्पादिवत् तेषामुपायत्वं न लेख्यवत् ॥ १६३ ॥

उपायानां स्वरूपं हि संवृत्यात्मकमेव नः ।
तथाच सत्यतेष्टैव स्वरूपासत्यता कथम् ॥ १६४ ॥

संवृत्या यत् स्वरूपं हि तद्वाञ्मात्रनिबन्धनम् ।
हेतुत्वं परमार्थस्य प्रतिपत्तुं न शक्नुयात् ॥ १६५ ॥

परमार्थाच्च लोकस्य न भेदे हेतुरस्ति ते ।
लौकिकोपायगम्यस्य केन स्यात् परमार्थता ॥ १६६ ॥

नचैष प्रकारोऽत्यन्तासतां हेत्वादीनां सम्भवतीत्याह स्वरूप इति । असत्यमपि केनचिद्रूपेण सदेव रूपान्तरेण भवति । नहि निस्स्वभावमिति नाप्यसत्येतेत्युक्तमिति ॥ १६२ ॥

एतदेव स्फुटयति — हेत्वादीनामिति । अत्र च बाष्पादीनामिवाग्न्यादावुपायत्वं हेत्वादीनां, न परमार्थेन तु लेख्यवदित्याह—तेनेति । हेतुत्वाभावप्रतिपादनपरमिदमिति ॥ १६३ ॥

अत्र चोदयति — उपायानामिति । किमिदं निस्स्वभावत्वमुपायानामापद्यते । संवृत्यात्मका हि ते । तेन च रूपेण सन्त एवेति ॥ १६४ ॥

परिहरति — संवृत्येति । सांवृतं हि रूपं वाञ्मात्रनिर्मितं, न परमार्थोपायो भवतीति ॥ १६५ ॥

अपिच, परमार्थालोकस्य संवृतिसत्यस्य भेदे न हेतुरस्ति, तद्भेदग्राहिणोऽपि ज्ञानस्य मिथ्यात्वादित्याह परमार्थेति । अपिच यदि परमार्थोऽपि लौकिकोपायगम्यः, न तर्हि परमार्थः, लौकिकोपायगम्यत्वाद् बाष्पादिवाग्निरवगम्यमान इत्याह — लौकिकेति । पूर्वं च सत्यभेदो निराकृतः । इदानीं सांवृतस्य परमार्थोपायतेति विवेकः । नन्वसत एव श्रुत्यादिप्रपञ्चात् प्रपञ्चविलयात्मनो ब्रह्मणो निरूपणं वेदान्तविद्विरिष्यते । यथाहुः——

नन्वसत्यपि बाह्येऽर्थे बुद्ध्यारूढे न सिध्यति ।
वासनाशब्दभेदोत्थविकल्पप्रविभागतः ॥ १६७ ॥

"भेदप्रपञ्चविलयद्वारेण च निरूपणम् ।"

इति ।

"विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ॥"

इति । किमुक्तम् । विद्यारूपं च ब्रह्म, अविद्यारूपं च श्रुत्यादि । तदुभयमपि यः सह वेद सोऽविद्योपलक्षितं मृत्युं तीर्त्वा विद्यारूपेणोपलक्षितं ब्रह्मानन्दं प्रतिपद्यत इति । तदेवमविद्यात एव विद्याप्राप्तिरिष्यते इति । किमपराद्धमेवं ब्रुवाणैरस्माभिः । नैष नः सिद्धान्तः यदसन्नेव श्रुत्यादिप्रपञ्चो ब्रह्मणि प्रमाणमिति । तेषामपि प्रत्यक्षादिप्रमाणसिद्धानामशक्यापह्नवत्वात् । यथा हि 'सोऽहमिति प्रत्यक्षसिद्धः प्रत्यगात्मा, एवं तेष्विति तद्वदेव सम्यञ्चो भवितुमर्हन्ति । तस्य च पूर्वोत्तरकर्मनिरोधानुत्पादाभ्यां विगलितभोगभोगायतनस्य कैवल्यं मोक्षमाचक्ष्महे, न प्रपञ्चविलयम् । 'एकमेवाद्वितीयमि'त्यादिवेदान्तास्त्वर्थवादान्तरवद् विषयवैराग्यप्रतिपादनपरतया कथञ्चिद् गमयितव्याः । 'स एष नेति नेती'तिकरणेन स्पष्टमेव बहिर्विषयसद्भावमुपदर्शयति । एष इत्यपरोक्षनिर्दिष्टस्य ब्रह्मणो विषयविवेकमात्रं कथयति न तदभावम् । श्रुत्यादिषु चाविद्यावादो ब्रह्मणः प्रशंसार्थः । 'अपशवोऽन्ये गोश्वेभ्यः' इतिवत् पश्वन्तरेष्वपशुवादः । अतो न क्वचिदपरमार्थस्य परमार्थोपायता । अस्तु वा नित्यनिर्दोषवेदान्तसिद्धमप्रपञ्चं ब्रह्म । नतु क्षणिकसंवेदनप्रवाहात्मकं द्वैतं कुतश्चित् प्रमाणादवगच्छाम इत्यलमनेनापि ॥ १६६ ॥

प्रत्यवस्थानान्तरमिदानीं बौद्धस्योपन्यस्यति — **नन्विति** । एवं हि मन्यन्ते — यद्यपि बाह्यो हेत्वादिरर्थो नास्ति, तथापि बुद्ध्यारूढेनैव हेत्वादिनानुमानानुमेयव्यवहारः सेत्स्यति । अनादिवासनोपप्लाविता हि हेत्वादिविकल्पविभागा भवन्ति हेतुरयं दृष्टान्तोऽयमित्यादयः । विकल्प इति सविकल्पिकां बुद्धिमाचक्ष्महे । अतो वासनाभेदाद् बुद्धिभेदः, तद्भेदाद्धेत्वादिभेद इत्युक्तं भवति । अवश्याभ्युपगम(नियम? नीय)श्चायं भवद्भिरपि । बुद्धिनिबन्धनो धर्म्यादिभेदः । न ह्यनित्यः शब्दः कृतकत्वादिति

न्यायविद्भिरिदं चोक्तं धर्मादौ बुद्धिमाश्रिते ।
व्यवहारोऽनुमानादेः कल्प्यते न बहिः स्थिते ॥१६८॥
अस्तीदं वचनं तेषामिदं तत्र परीक्ष्यताम् ।
भेदोऽसतः कथं हि स्याद् बुद्धिशब्दप्रकल्पनात् ॥
निर्वस्तुके कथञ्चित् स्यात् प्रसवो बुद्धिशब्दयोः ।
शब्दभेदोऽपि भवतस्तदभावान्न सिध्यति ॥ १७०॥

परस्परं धर्मिणो वा भिन्नयोर्हेतुसाध्ययोरवगतिरस्ति । अतो ज्ञानभेदनिबन्धन एवात्र भिन्नत्वव्यवहारः । सर्वत्रैव च ज्ञानमेव भेदनिबन्धनम् । सुदूरमपि गत्वा युक्तिभिरनुसंहितो भेदो ज्ञान एव पर्यवस्यति । अतोऽस्तु तन्निबन्धन एव सर्वत्र भेदः । देशादिभेदादपि हि भेदं ब्रुवाणस्तद्भेदं पर्यनुयुक्तो ज्ञानभेदमेवालम्बते । तावतापि व्यवहारसिद्धौ किं प्रकारान्तरेण भेदोऽनुस्रियत इति । अत्राप्यग्निधूमादौ कृतकानित्यत्वविलक्षणः स्फुटो भेदावग्रहो भवति । तत्रापि न जातिभेदो निबन्धनमिति वाच्यम् । सोऽपि चाग्निधूमशब्दनिर्मित एव । नहि संवृतिकल्पनादन्येन प्रकारेण जातिभेदमुपलभामहे । अतः शब्दभेदेऽर्थविकल्पविलासिता एवाग्नित्वादय इति । इदं च बाह्यनिराकरणपरतयानास्थयोक्तम् । न शब्दभेदोऽपि विज्ञानभेदाद् विना सम्भवति । सोऽपि ज्ञानमात्रप्रभावित एवाभ्युपेत्य बाह्यहेत्वादिविकल्पविभागार्थमुक्त इति ॥ १६७ ॥

अयमेवास्मदीयतन्त्रकाराणां सिद्धान्त इत्याह — **न्यायविद्भिरिति** । न्यायविद्भिर्हि दिङ्नागाचार्यैरिदमुक्तं 'सर्व एवायमनुमानानुमेयव्यवहारो बुद्ध्यारूढेन धर्मधर्मिन्यायेन बहिः सदसत्त्वमपेक्षत इति ॥१६८॥

एतदपि दूषयति — **अस्तीति** । नासतः शशविषाणादेः शब्दनिबन्धनः तज्जनितबुद्धिनिबन्धनो वा भेदो दृष्ट इति दुरुक्तमिदमपरेषां बुद्ध्यारूढेनानुमानानुमेयव्यवहार इति ॥ १६९ ॥

अपिच अस्तु बुद्धिशब्दभेदनिबन्धनो हेत्वादिभेदः, तयोरेव तु कथमकस्मादुद्भवः । न ह्यकारणिका कार्योत्पत्तिः सम्भवति । नच शून्ये जगति

यदि वाविद्यमानोऽपि भेदो बुद्धिप्रकल्पितः ।
साध्यसाधनधर्मादेर्व्यवहाराय कल्प्यते ॥ १७१ ॥
ततो भवत्प्रयुक्तेऽस्मिन् साधने यावदुच्यते ।
सर्वत्रोत्पद्यते बुद्धिरिति दूषणता भवेत् ॥ १७२ ॥
यश्च मन्त्रस्त्वयोक्तोऽयं धर्म्यादौ बुद्धिमाश्रिते ।
न बाह्यापेक्षया स स्यादसिद्ध्यादौ मयेरिते॥१७३॥
बुद्धिप्रकल्पितसिद्धिश्च भवतां व्यवहारिणाम् ।
मदुक्तं दूषणं सिद्धं त्वदुक्तं तु न साधनम् ॥ १७४ ॥
बाह्यार्थव्यवहारित्वज्ञानोत्पादे स्थितेऽपि नः ।
कथञ्चिन्नहि कल्प्येत व्यवहारोऽर्थवर्जितः ॥ १७५ ॥

तयोः कारणमुत्प्रेक्षितुमपि शक्यत इत्याह — निर्वस्तुक इति । यश्चायं शब्दभेदो हेत्वादिभेदहेतुतयोपवर्णितः, सोऽपि तदभावादनुपपन्न इत्याह — शब्देति ॥ १७० ॥

किञ्च यद्यविद्यमान एव बुद्धिमात्रकल्पितः साध्यादिभेदोऽनुमानव्यवहाराय कल्प्यते, ततो दूषणव्यवहारोऽपि तद्वदेव स्यात् । उत्पद्यते खल्वस्मिन् साधने हेत्वादिन्यूनतोक्तिमात्रादेव दूषणबुद्धिरित्याह— यदिवेति द्वयेन ॥ १७२ ॥

शक्यते च वदितुम् एवमपि सर्व एवायं दूष्यदूषणव्यवहारो बुद्ध्यारूढेन दूष्यदूषणन्यायेन, न बहिः सदसत्त्वमपेक्षत इत्याह— यश्चेति ॥ १७३ ॥

नन्वेवमप्यावयोरविशेष एव, यथा हि नो दूषणज्ञानमुत्पन्नम् एवं भवतोऽपि साधनज्ञानम् । अतः कथं विजयसे अत आह — बुद्धीति । अयमावयोर्विशेषः बुद्धिमात्रव्यवहारिणो भवतो मदुक्तदूषणं सिद्धमिति न ते पक्षः सिध्यति । त्वदुक्तं तु साधनमस्माकमसिद्धमिति न साध्यं प्रतिपद्यामह इति ॥ १७४ ॥

कथं साधनमसिद्धमत आह — बाह्येति । बाह्यार्थव्यवहारिणो हि वयं, न त्वमिव ज्ञानैकशरणाः । तत्र कथमसति बाह्ये बुध्यामह इति ॥१७५॥

ननु यद्वन्मया हेतुर्नेष्यते दूषणं तथा ।
तेन मे दूषणाभावाददुष्टं साधनं भवेत् ॥ १७६ ॥
नेदानीं दूषणैः कार्यं साधनाभावतो यदि ।
त्वयैवास्मदभिप्रेता स्वपक्षासिद्धिराश्रिता ॥ १७७ ॥
नचास्ति वासनाभेदो निमित्तासम्भवात् तव ।
ज्ञानभेदो निमित्तं चेत् तस्य भेदः कथं पुनः ॥१७८॥
वासनाभेदतश्चेत् स्यात् प्रासमन्योन्यसंश्रयम् ।
स्वच्छस्य ज्ञानरूपस्य नहि भेदः स्वतोऽस्ति ते ॥
प्रमाणं वासनास्तित्वे भेदे वापि न विद्यते ।
कुर्याद् ग्राहकभेदं सा ग्राह्यभेदस्तु किंकृतः ॥ १८० ॥

पुनरपि परश्चोदयति — नन्विति । यथा हि मे साधनमसिद्धम्, एवं दूषणमपीति न दुष्टं साधनमिति ॥ १७६ ॥

मीमांसकस्तु पाशुपतोऽयमेवंवादी यद् विहाय साधनमभावाद् दूषणस्याप्यदुष्टत्वमातिष्ठत इति सापहासमाह — नेदानीमिति ॥ १७७ ॥

यश्च वासनाभेदानिबन्धनो विकल्पप्रविभागो वर्णितः, सोऽपि तद्भेदनिमित्ताभावादनुपपन्न इत्याह — नचेति । ननु ज्ञानभेदादेव वासनाभेदो भविष्यति, कथं निमित्ताभावः । न, तद्भेदस्यैव निर्निमित्तत्वाद्, वासनानिबन्धने तु तद्भेदेऽन्योन्याश्रयत्वमित्याशङ्क्या सहाह — ज्ञानेति । ननु स्वभावभिन्नमेव ज्ञानं वासनाभेदनिबन्धनं भविष्यति, कथमन्योन्याश्रयत्वमत आह — स्वच्छस्येति । स्वच्छस्य हि ज्ञानात्मनः स्वयमनुपलभ्यमानभेदस्यानादिवासनोपप्लावितनीलाद्याकारकलुषितत्वमेव भेदकारणमिति बौद्धैराश्रितम्, अतो दुरुत्तरमितरेतराश्रयमिति ॥ १७९ ॥

नन्वनादित्वादेव बीजाङ्कुरवदितरेतराश्रयपरिहारो भविष्यत्यत आह — प्रमाणमिति । प्रसिद्धात्मनोर्हि बीजाङ्कुरयोरनादित्वाद् भवति दोषपरिहारः । वासना त्वस्ति भिन्ना चेति न किञ्चित् प्रमाणं क्रमते । यो हि

संवित्त्या जायमाना हि स्मृतिमात्रं करोत्यसौ।
क्षणिकेषु च चित्तेषु विनाशे च निरन्वये ॥ १८१ ॥
वास्यवासकयोश्चैवमसाहित्यान्न वासना।
पूर्वक्षणैरनुत्पन्नो वास्यते नोत्तरः क्षणः ॥ १८२ ॥
उत्तरेण विनष्टत्वान्न च पूर्वस्य वासना।
साहित्येऽपि तयोर्नैव सम्बन्धोऽस्तीत्यवासना ॥१८३॥
क्षणिकत्वाद् द्वयस्यापि व्यापारो न परस्परम्।
विनश्यच्च कथं वस्तु वास्यतेऽन्येन नश्यता ॥ १८४ ॥

बहिर्देशसम्बद्धं प्रत्यक्षमर्थमवजानीते, स कथं वासनामनुजानाति। तदनुज्ञाने वा किमपराद्धं भावान्तैरिति। अपिच पूर्वानुभवप्रभावितं स्मरणहेतुसंस्कारमेव वासनामाचक्ष्महे। तदसौ सत्यपि ग्राहकं ज्ञानमेव विविधमुपकल्पयति। यत्तु विचित्रा बहिर्भावा भासन्ते तत् करय हेतोरिति न ज्ञायत इत्याह — कुर्यादिति ॥ १८० ॥

न ग्राह्यभेदे वासना कारणमित्यत्रोपपत्तिमाह — संवित्त्येति। स्मृतिहेतुर्हि वासना। नचानुभूतात् स्मृतिरधिकं मात्रयापि गोचरयति। नच बहिरत्यन्तासन्तो भावाः क्वचिदपि गृहीतपूर्वा इति न तान् वासना स्मारयितुं प्रभवतीति। किञ्च, अतश्च वासना नोपपद्यते यत् कारणं क्षणिकानि ज्ञानानि निरन्वयविनाशीनि परस्परमसहितानि चेत्याह — क्षणिकेष्विति। यथा तावत् क्षणिकानां निरन्वयविनाशिनां च न वासना, तथोपरिष्टाद् वक्ष्यतीति ॥ १८१½ ॥

असाहित्यान्न वासनेत्युक्तार्थमेव प्रपञ्चयति — पूर्वेति। साहित्याभ्युपगमेऽपि समवायाद्यन्यतमलक्षणसम्बन्धाभावाद् वासना नोपपद्यते। न ह्यसम्बन्धः कालागरुधूमोऽगारं वासयतीत्याह — साहित्येति ॥ १८३ ॥

क्षणिकत्वान्न वासनेत्युक्तम्, अत्र कारणमाह — क्षणिकत्वादिति। व्यापारनिबन्धनो हि वास्यवासकभावः कारकविशेषत्वात् तस्य। नच क्षणिकं पूर्वमुत्तरं वा तयोरेव व्याप्रियत इति सम्भवति। ननु जन्मैव बुद्धेरर्थ-

अवस्थिता हि वास्यन्ते भावा भावैरवस्थितैः ।
अवस्थितो हि पूर्वस्माद् भिद्यते नोत्तरो यदि ॥१८५॥

पूर्ववद् वासना तत्र न स्यादेवाविशेषतः ।
भङ्गुरे पूर्वसादृश्याद् भिन्नत्वाच्चास्ति वासना ॥१८६॥

परिच्छेदे व्यापार इत्युक्तम्, तद्वद् वासनायामपि भविष्यति । न, दुष्टत्वादुपपत्तेः । दृश्यते खलूत्पद्यमानै(रे?)व बुद्धिरर्थं परिच्छिन्दन्ती । नह्यसौ क्षणमप्युदास्ते । न चार्थपरिच्छेदादन्यत्र व्याप्रियत इति युक्तम् । जन्मनैव व्यापारेण कारकत्वं, न ज्ञानान्तरं वासयन्ती जायमाना बुद्धिर्दृश्यत इति कथं वासनायां जन्मना कारणत्वम् । नच जन्मापि किञ्चिद् बौद्धा मन्यन्ते यन्निबन्धनः कारणभावो भवेत् । अस्माकं तु समवायिकारणदशाविशेषः कोऽपि कार्यस्य जन्मेति मतम् । स च जायमानान्नात्यन्तभिन्न इति युक्तं क्रियाकार(का? क)भाव इति । निरन्वयविनाशित्वान्न वासनेत्युक्तम् । तत्र कारणमाह — विनश्यदिति । यद्धि स्वलक्षण एव निरुद्धं न केनचिद्रूपेणान्वेति न तत्तदीयं वा रूपं वास्यत इति सम्भवति । तथा वासकमपि यन्निरन्वयविनष्टं तत् केनात्मना परं वासयति । अवस्थिता एव हि भावा गृहादयोऽवस्थितैरेवागरुधूमादिभिर्वास्यन्त इति दृष्टम् । अयं चावीतहेतुरुन्नेतव्य इति ॥ १८४३॥

अत्र चोदयति— अवस्थित इति । अवस्थान्तरोपजननापाययोस्तदभिन्नस्यावस्थावतो नाशोत्पादाभ्यामवस्थितत्वानुपपत्तिः । अवस्थितत्वे वा पूर्वावस्थायामिवोत्तरत्रापि अवासनाप्रसङ्ग इति । अस्मन्मते तु भङ्गुरमुत्तरं पूर्वं च ज्ञानं, नावस्थितः कश्चिदेको ज्ञाताप्रच्युताग्राह्यरूपः । तदिह भङ्गुरपक्षे पूर्वसादृश्यात् ततो भिन्नस्योत्तरस्य युक्तैव वासना । एषैव तु वासना यत् पूर्वसारूप्यमुत्तरस्य । यथा लाक्षारसोपसिक्ते बीजपूरकुसुमे फलं तद्रूपं जायमानं तत्त्वान्वितमित्युच्यते । यत्तु व्यापारविरहादकारकत्वमुक्तं, तदयुक्तम् । न व्यापारतः कारकत्वम्, अपितर्हि पूर्वभावात् । भावातिरेकिणो व्यापारस्यानुपपत्तेः । यच्चेदं पूर्वस्योत्तरकारणत्वमिदमेव वासकत्वं पूर्वेणो-

नैतदस्त्यनुरूपं तु क्षणिकत्वे धियां तव ।
पूर्वज्ञानं त्वनुत्पन्नं कार्यं नारभते क्वचित् ॥ १८७ ॥
न विनष्टं न तस्यास्ति निष्पन्नस्य क्षणं स्थितिः ।
तेनोत्पन्नविनष्टत्वान्नास्त्यारम्भक्षणोऽपि हि ॥ १८८ ॥
निरन्वयविनष्टत्वादानुरूप्यं कुतः पुनः ।
न तदीयोऽस्ति कश्चिच्च धर्म उत्तरबुद्धिषु ॥ १८९ ॥
समानधर्मतां मुक्त्वा नानुरूप्यं च विद्यते ।

त्तरं वास्यत इति । कोऽर्थः । स्वरूपं जन्यत इति । अतो भङ्गुरवादिनामेव वासनोपपत्तिमती न स्थिरवादिनामित्याह — भङ्गुर इति ॥ १८६ ॥

तदिह स्वमतसाधनमुपेक्ष्यैव तावत् परमतदूषणमभिधीयते । दूषिते हि तस्मिन् सुखेन सिद्धान्तोऽभिधीयते । तत्र यत्तावदुक्तं सदूपज्ञानजनकत्वमेव वासनेति । तदयुक्तम् । यदि हि पूर्वज्ञानमुत्तरस्य जनकं भवति, ततोऽनुरूपं विरूपं वा जनयति । न तदुत्तरस्य जनकम् । अनुत्पन्नस्यासतो जनकत्वायोगात् । एवं विनष्टस्यापि, अजातातिवृत्तयोरनतिभेदात् । नच निष्पन्नस्य क्षणमप्यवस्थानमस्तीति कदा जनयिष्यतीति जनकत्वानुपपत्तौ दूरोत्सारितमनुरूपजननम् । नहि निरन्वयविनष्टस्य किञ्चिदनुरूपं सम्भवति, धर्मान्वयो हि आनुरूप्यम् । न पूर्वधर्मान्वय उत्तरज्ञानेऽस्ति, तदुपगमे निरन्वयविनाशायोगात् । नच समानधर्मतामन्तरेणास्ति स प्रकारो येनानुरूप्यं भवतीति । तदेतत् सर्वमाह — नैतदस्तीति सार्धतृतीयेन । ननु पूर्वभावितैव कारकत्वमित्युक्तं किं क्षणान्तरावस्थानेन । नच व्यापारकारणभावः येन तत्सम्बन्धार्थं क्षणान्तरावस्थानमिष्यते तदभावादित्युक्तमेव । मैवम् । नहि पूर्वभाविताभात्रं कारणत्वमिष्यते । मा भूद् गवाश्वस्यापि पौर्वापर्यमात्रात् कार्यकारणभाव इति पौर्वापर्यनियमे तु कार्यकारणत्वम्[1] । नचासौ क्षणिकेषु सम्भवति । व्यापारस्तु प्रत्यक्षादिप्रमाणको नापह्नोतुं शक्यत इति ॥ १८९½ ॥

---

१. 'णकत्वम्' क. पाठः.

यदि स्यादानुरूप्याच्च वासना गोधियो यदा ॥१९०॥
हस्तिबुद्धिर्भवेत् तत्र वैलक्षण्यान्न वासना ।
ततः परं च गोज्ञानं निर्मूलत्वान्न सम्भवेत् ॥ १९१ ॥
सर्वं विलक्षणं ज्ञानं न स्यादेव विलक्षणात् ।
बाह्यार्थानुग्रहाभावात् पारार्थ्येनावशीकृताः ॥ १९२ ॥
निरन्वयविनाशिन्यः कुर्युः कार्यं कथं क्रमात् ।
विनाशे कारणस्येष्टः कार्यारम्भश्च नान्यथा ॥ १९३ ॥
तत्रैव ज्ञाननाशेन विनष्टाः सर्ववासनाः ।

दूषणान्तरमाह — यदीति सार्धेन । यद्यपि ह्यानुरूप्याद् वासनेत्युच्यते यदा तर्हि गोबुद्धेरनन्तरं हस्तिबुद्धिरुत्पद्यते तत्रैव वैलक्षण्याद् वासना न स्यात् । ततोऽपि परस्ताद् गोज्ञानं निर्बीजं न सम्भवेदिति । प्रदर्शनार्थं च गोहस्तिज्ञान उक्ते सर्वमेव विलक्षणाद् विलक्षणज्ञानं न स्यादित्याह — सर्वमिति ॥ १९१ ॥

एवं तावदानुरूप्यवासनापक्षो निराकृतः । इदानीं पुनरपि ज्ञानातिरिक्तवासनापक्षमेवोपसङ्क्रम्य दूषणान्तरमाह — बाह्येति । बाह्यार्थवादिनां हि पूर्वज्ञानजनिता आत्मस्था वासनाः किञ्चिदेव सदृशदर्शनाद्यपेक्ष्य लब्धोद्बोधाः कार्यं जनयन्ति क्रमेणेति युक्तम् । ज्ञानमात्रवादिनस्तु न किञ्चिद् वासनानां कार्यजननेऽनुग्राहकमस्ति यदपेक्षया विलम्बन्ते । अतो युगपदेव सर्वाः सर्वं कार्यमारभेरन्निति न क्रमेण ज्ञानानि दृश्येरन् । एकदैव विश्वज्ञानमुत्पन्नमिति क्षणान्तरे न किञ्चित् स्यात् । नचासां किञ्चिद्रूपमन्वेति यत् पुनः कार्यं जनयेत् । निरन्वयविनाशित्वान्न क्वचिदन्यत्र वासनानां पारार्थ्यं यथास्माकमात्मनि, संस्कार्यान्तराभावात् । अतः पारार्थ्येन वशीकाराभावादपि न क्रमो युक्तः । पारार्थ्येन ह्यस्माकमिव बोद्धुरवधानाद्यपेक्षया स्मृतिक्रम इव ज्ञानक्रमो भवेदपि । न त्वेतत् सर्वमस्तीति कार्यक्रमानुपपत्तिरिति ॥ १९२$\frac{1}{2}$ ॥

किञ्चैता वासनाः क्वचिदाश्रिता न वा । यद्याश्रिताः, ज्ञानातिरिक्तस्य

तेन सर्वाभ्य एताभ्यः सर्वाकारं यदुत्थितम् ॥ १९४ ॥

ज्ञानमेकक्षणेनैव विनाशं गन्तुमर्हति ।
यद्याश्रयविनाशेऽपि शक्त्यनाशोऽभ्युपेयते ॥ १९५ ॥

क्षणिकत्वं च हीयेत नचारम्भोऽन्यथा भवेत् ।
वासनानां प्रवाहोऽपि यदि ज्ञानप्रवाहवत् ॥ १९६ ॥

वासनातस्ततो ज्ञानं न स्यात् तस्माच्च वासना ।
कुर्यातां तुल्यमेवैते नान्योन्यं तु कदाचन ॥ १९७ ॥

नान्यो विलक्षणो हेतुर्येनान्यादृक् फलं भवेत् ।
तस्मात् संवृतिसत्यैषा कल्पिता नास्ति तत्त्वतः ॥

नचेदृशेन भावेन कार्यमुत्पद्यते क्वचित् ।

कस्यचिदभावात् तदाश्रिता वाच्याः । तत्रैकज्ञाननाशे सकलतदाधारवासनाविनाशः । कारणविनाशादेव कार्यारम्भ इति वः सिद्धान्तः, प्रकारान्तरकारणत्वायोगात् । विनश्यदेव हि कारणं कार्यं जनयतीति युगपन्नश्यन्तीभिर्वासनाभिः सकृदेव सर्वाकारज्ञानमुत्थापितं तथावस्थितं च एकदैवैकक्षणे विनष्टमिति क्षणान्तरे न किञ्चिद् भवेदित्याह — **विनाश** इति द्वयेन ॥ १९४$\frac{1}{2}$ ॥

यदि त्वाश्रयभूतज्ञानविनाशेऽपि शक्तिर्वासना न नश्यन्तीत्युच्यते, ततः क्षणिकत्वसिद्धान्तहानिः । स्थिरस्य च क्रमयौगपद्याभ्यामर्थक्रियानुपपत्तेः कार्यानारम्भप्रसङ्ग इत्याह — **यदीति** ॥ १९५$\frac{1}{2}$ ॥

यदि तु स्वतन्त्रा एव ज्ञानवद् वासनाः प्रवृत्ता इत्युच्यते, ततो ज्ञानवासनयोरितरेतरकार्यकारणभावानुपपत्तिरित्याह — **वासने**ति ॥ १९६$\frac{1}{2}$ ॥

किमिति न स्यादत आह — **कुर्याताम्**इति । सदृशमेव हि तदा ज्ञानवासने कार्यमारभेयातां ज्ञानं ज्ञानं वासना वासनां न पुनरन्योन्यमिति । ननु विजातीयकारणोपनिपाताद् विसदृशकार्योत्पादो भविष्यत्यत आह — **नान्य** इति । द्वयातिरिक्तवस्त्वभावादिति भावः ॥ १९७$\frac{1}{2}$ ॥

अतः संवृतिसत्यरूप इव वासना कल्पिता न परमार्थतः काचिद्-

यस्य त्ववस्थितो ज्ञाता ज्ञानाभ्यासेन युज्यते ॥१९९॥
स तस्य वासनाधारो वासनापि स एव वा ।
कुसुमे बीजपूरादेर्यल्लाक्षाद्युपसिच्यते ॥ २०० ॥
तद्रूपस्यैव सङ्क्रान्तिः फले तस्येत्यवासना ॥ २००½ ॥

युक्त्यानुपेतामसतीं प्रकल्प्य
यद्वासनामर्थनिराक्रियेयम् ।
आस्थानिवृत्त्यर्थमवादि बौद्धै-
र्ग्राहं गतास्तत्र कथञ्चिदन्ये ॥ २०१½ ॥

इति निरालम्बनवादः ॥

स्तीत्याह — तस्मादिति । नचैवञ्जातीयकं कस्मैचित् कार्याय घटत इति प्रागेव वर्णितमित्याह — नचेति ॥ १९८½ ॥

स्वमत इदानीं वासनामुपपादयति — यस्य त्विति । अवस्थितो हि ज्ञाता यज्ज्ञानाभ्यासेन वासनाधारो भवति तद् युज्यते । क्षणिकं तु न वासयितुं शक्यम् । नच तद्वासना प्रयोजनवती, क्वचिदुपयोगाभावात् । न च वासितः पूर्वावस्थातोऽत्यन्तं भिद्यते, येनान्यत्वं प्रतिपद्यते । नच प्राग्वदविशिष्टः, येन वासना न स्यात् । नचावस्थान्तरोत्पादेऽवस्थितत्वानुपपत्तिः, पूर्वापरयोरवस्थयोरनुगतस्य बोद्धुः प्रत्यभिज्ञानात् । तदिहावस्थातद्वतोरभेदविवक्षायां पूर्वज्ञानाहितसंस्कारः पुमानेव वासना भवेत् । भेदविवक्षायां तु तदाधार इति ॥ १९९½ ॥

यत्त्वानुरूप्यवासनापक्षे लाक्षोपसिक्तं बीजपूरकुसुममुपवर्णितं, तत् तद्रूपसङ्क्रान्तेरुपपन्नम्, नतु ज्ञानस्य किञ्चिद्रूपं ज्ञानान्तरं सङ्क्रामति निरन्वयविनाशित्वादित्युक्तमेवेत्याह — कुसुमेति तस्यान्तेन । प्रकरणार्थमुपसंहरति — इत्यवासनेति ॥ २००½ ॥

किञ्चेयं वासना तत्त्वदर्शिभिर्बौद्धैर्वस्तुतो वर्णितेति नेदं सम्भावयामः । असतीमेव तु युक्त्यानुपेतां युक्तिशून्यां वासनां विकल्प्य विषयेष्वास्थां

अथ शून्यवादः ।

एवमुक्तेऽनुमानस्य ज्ञानमाश्रित्य दूषणे ।
ज्ञानप्रवृत्त्यशक्त्या तु परः प्रत्यवतिष्ठते ॥ १ ॥

निवर्तयितुमर्थनिराकरणमुक्तम् 'एकमेवाद्वितीयम्' इत्याद्युपनिषद्भिरिव । तत्रैव त्वर्वाचीनानां भ्रान्त्या सिद्धान्तावग्रह इति निराकृतं वादिनमाश्वासयतीति — **युक्त्येति** ॥ २०१$\frac{1}{2}$ ॥

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां
निरालम्बनवादः समाप्तः ॥

अथ शून्यवादः ।

अत्र भाष्यं — 'शून्यस्तु। कथम् । अर्थज्ञानयोराकारभेदं नोपलभामहे । प्रत्यक्षा च नो बुद्धिः । अतस्तद्भिन्नमर्थरूपं नाम न किञ्चिदस्तीति पश्यामः' इति । तत्र यः शून्यो येन च शून्यः तदुभयानुपादानात् शून्यस्त्विति प्रतिज्ञावचनमसङ्गतार्थम् । यदि तु पूर्वसाधनवाक्यगतप्रत्ययशब्दानुषङ्गेण शून्यः प्रत्ययः तद्भिन्नमर्थरूपं नाम न किञ्चिदस्तीति चोत्तरग्रन्थानुसारेणार्थेन शून्य इति व्याख्यायते, ततस्तेनैव गतार्थत्वमत आह — **एवमिति** । अयमेवात्र प्रतिज्ञार्थः प्रत्ययोऽर्थेन शून्य इति । न च गतार्थत्वं, प्रत्यवस्थानहेतुभेदात् । स एव निरालम्बनवादी नास्तिकः प्रत्यक्षादिविरोधदूषितस्वसाधनो दूषणपरिहारेणेदानीं प्रत्यवतिष्ठते । बाह्यार्थग्राहिज्ञानाश्रयणेन हि प्रत्यक्षादिविरोधोऽभिहितः । तत्रेदमुच्यते । न ज्ञानं बहिरर्थे प्रवर्तितुं शक्तमसम्बन्धात् । असम्बन्धप्रकाशने चातिप्रसङ्गात् । एकरूपोपलब्धेश्च ज्ञानप्रवृत्तिविषयासिद्धेः । एकं हीदं नीलमिति नीलं प्रकाशते । तदेकमेव युक्तम्, विभागानवगमे तदभ्युपगमायोगात् । तदिदमुक्तम् 'अर्थज्ञानयोराकारभेदं नोपलभामहे' इति । अत एवायमनादिकालीनवासनोपप्लावितनिखिलनीलाद्याकारप्रकाशः । नात्र केनचिद् बाह्यमवस्थाप्येत, येन तदपलापे प्रत्यक्षादिविरोधो भवेत् । अतः स एवायं पक्षो दूषणपरिहारेण पुनरनुप्राणितः । तदेतत् प्रागप्युक्तं —

"प्रत्यक्षबाधने चोक्ते पश्चात् तच्छक्त्यवेक्षणात् !"

इति ॥ १ ॥

यत् तावन्मन्यमानेन प्रत्यक्षं भवतोच्यते ।
दूषणं तद्विरोधादि तदिदानीं परीक्ष्यताम् ॥ २ ॥
प्रवर्तितुं हि किं शक्तं स्तम्भाद्यर्थे बहिः स्थिते ।
अथवात्मांश एवैतद् ग्राह्ये क्षीणं न वस्तुनि ॥ ३ ॥
तद्यद्येतेन बाह्योऽर्थो गृह्यते दूषणं ततः ।
त्वदुक्तं सर्वमात्मांशे ग्राह्ये तन्नोपपद्यते ॥ ४ ॥
तत्र तावदिदं सिद्धं सर्वप्राणभृतामपि ।
ग्राह्यत्वं नीलपीतादिदीर्घाद्याकारवस्तुनः ॥ ५ ॥

अत्र पूर्वपक्षं विवक्षन् संवित्परीक्षां तावदवतारयति—**यत् तावदिति** । यद् यादृशं बाह्यार्थग्राहि प्रत्यक्षं मन्यमानेन भवता मीमांसकेन प्रत्यक्षविरोधादिदूषणं निरालम्बनसाधनस्योच्यते, तदिदानीं परीक्ष्यताम् । प्रत्यक्षपरीक्षामुखेन चात्र संविन्मात्रपरीक्षैवोपक्षिप्ता । सर्वसंविदामेव बहिर्विषयत्वानभ्युपगमात् । मुख्यतया तु प्रत्यक्षपरीक्षोपन्यास इति ॥ २ ॥

कीदृशी पुनरियं परीक्षेति तत्स्वरूपं दर्शयति — **प्रवर्तितुमिति** । किमिदं प्रत्यक्षं बाह्ये प्रवर्तितुं शक्तम् आहोस्वित् स्वांशपर्यवसायीतीदृशी परीक्षा । परीक्षा च संशय्य पूर्वोत्तरपक्षबलनिरूपणमभिधीयते । तदनेन प्रथमस्य परीक्षापर्वणः स्वरूपमुपन्यस्तमिति वेदितव्यमिति ॥ ३ ॥

आह — वक्ष्यति भवान् संवित्परीक्षाम् । किमस्याः प्रयोजनमिति वक्तव्यम् । अप्रयोजनस्य हि सन्दिग्धस्य काकदन्तवदपरीक्षणीयत्वादत आह — **तद् यदीति** । अयमभिप्रायः—सर्वपूर्वाक्षेपेणायं वाद उद्भवति । सर्वाक्षेपेषु च पूर्वाधिकरणस्यैव प्रयोजनम् । यथा वक्ष्यति — 'आक्षेपे पूर्वाधिकरणस्ये'ति । तद् यदि बाह्यार्थग्राहि प्रत्यक्षमुपपादयितुं शक्ष्यामः, ततो दूषणसिद्ध्या बाह्यार्थपरं वक्ष्यामः । यदि त्वात्मांश एव सर्वसंविदां ग्राह्यो भविष्यति, ततो दूषणबाधनात् साधनसिद्धौ नास्तिकस्य बाह्यापलापः सेत्स्यति । तदियं बाह्यार्थसिद्धावेव परीक्षोपयुज्यत इत्यवतार्यत इति ॥ ४ ॥

सा पुनरियमनाश्रया संविच्छक्तिपरीक्षेति नास्तिकैकदेशिनः प्रत्यव-

न चाप्याकारभेदेन ज्ञानज्ञेयावधारणा ।
नचान्यतरधर्मत्वं विस्पष्टं तत्र गृह्यते ॥ ६ ॥

तिष्ठन्ते । ते हि ग्राह्यवैधुर्यदुःस्थिताः संविदोऽपि न सन्तीति वर्णयाम्बभूवुः । अतः शून्ये संसारे किं कुत्र प्रवर्तितुं शक्तमशक्तं वेति परीक्ष्यते । अत आह — नचेति । अयमभिप्रायः — नायमुभयापलापः शक्यो वक्तुम् । सर्वप्राणिनामविगानसिद्धत्वान्नीलाद्याकारप्रतिभासस्य । इदं तु चिन्तनीयं सर्वसंविदामेवौपाधिको नीलिमा स्वाभाविको बाह्यस्येति । तुच्छे तु संसारे निर्बीजप्रतिभासो नावकल्पते । अतः परीक्षणीयमिदं किं ज्ञानमेवानादिवासनोपप्लावितनीलाद्याकारमात्मगोचरमेवेदं प्रकाशते, परमार्थसन्तं वा बाह्यमर्थं प्रतिपादयितुं समर्थमिति । यदि तत्तावदुपस्थापयति, अतस्तद्बलभुवा प्रमाणान्तरेण तदपि सिध्यतीति । नीलपीतादिदीर्घादीति विविधाकारोपन्यासेन पूर्वपक्षबीजं दर्शयति । नायं व्यवस्थितैकस्वभावो नीलादिराकारो दृश्यते, अव्यवस्थितस्यापि दीर्घादेरौपाधिकस्य दर्शनात् । तात्त्विके वाव्यवस्थानुपपत्तिरिति । एतच्चोपरिष्टाद् व्यक्तीकरिष्यतीति ॥ ५ ॥

नन्वेवमस्तु यथाप्रतिभासमुभयं, तथापि कः परीक्षावसरः । नहि प्रत्यक्षसिद्ध एवोभयस्मिन् परीक्षा युक्ता । अत आह — नचेति । अयमभिप्रायः — सिध्यत्युभयं यदि ज्ञानज्ञेययोराकारभेदो दृश्यते । तदा हि विविक्ताकारमुभयं भासमानं न नेति शक्यमपलपितुम् । एक एव तु नीलादिराकारो भासते । अतः कथमुभयमविवादसिद्धं भवति यन्न परीक्ष्येत । सूक्ष्मः खल्वयं पण्डितैरुपवेदनीयोऽर्थो न्यायः येनैकत्राकारे भासमानेऽन्यदवस्थाप्यते । नायमपरीक्षकाणां सिध्यति । तदिदमुक्तम् 'अर्थज्ञानयोराकारभेदं नोपलभामहे' इति भाष्ये । अतो न प्रत्यक्षैकप्रमाणिका द्वैतसिद्धिरिति परीक्षावतरणीया । यथाच नोभयं प्रत्यक्षं तथोपरिष्टाद् वक्ष्याम इति । नन्वेवमाकारभेदानवसाये ज्ञानार्थयोरन्यतरस्य यस्यैवायमाकारो दृश्यते तस्यैवायमभ्युपगन्तुमुचितः, किमत्र परीक्षणीयम् अत आह — नचेति । भवेदेवं यदि ज्ञानार्थयोरन्यतरस्यायमाकार इति विशदतरमवगम्येत । न त्वन्यतरस्य धर्मता तस्य विस्पष्टा । अतो ज्ञानं वा नीलमर्थो वेति युक्तैव परीक्षेति ॥ ६ ॥

गृह्यमाणस्य चास्तित्वं नाग्राह्यस्याप्रमाणकम् ।
तस्मादाकारवद् वस्तु ग्राह्यत्वाद् विद्यते ध्रुवम् ॥

अतः परीक्षमाणानां ज्ञानमाकारवद् यदि ।
तन्मात्रे च प्रमा क्षीणा ततो नास्त्यर्थकल्पना ॥ ८ ॥

यदि वाकारवत्ता स्याद् बाह्यस्यैवेह वस्तुनः ।
तदस्ति गृह्यमाणत्वाद् तत्सिद्ध्यैवास्ति धीरपि ॥

नन्वसत्यप्याकारभेदावगमे द्वयोरन्यतरसिद्ध्यैवार्थादितरत् सिध्यति । तथाहि — न तावज्जडस्यासति प्रकाशान्तरे प्रकाशः सिध्यतीति तत्सिद्धिः । अकर्मकज्ञानानुत्पत्तेश्च 'ज्ञानाद् ज्ञेयसिद्धिरि'ति द्वैतवाद एव साधीयान् किं परीक्षयात आह — **गृह्यमाणस्ये**ति । अयमभिप्रायः — यदेतन्नीलमित्यत्र ग्रहणे साक्षात्कारिणि प्रकाशते, तस्यैवास्तित्वं नेतरस्येति सौगता भ्राम्यन्ति । अप्रत्यक्षसिद्धेरप्रमाणकत्वात् । तथाहि — न तावदान्तरज्ञानाद् बहिर्ज्ञेयसिद्धिः, असम्बन्धात् । असम्बन्धप्रकाशने चातिप्रसङ्गात् । ज्ञेयाच्च ज्ञानसिद्धेरप्रमाणकत्वमनन्तरमेव वक्ष्यामः 'ग्राहकं निष्प्रमाणकमि'ति । अतः प्रत्यक्षावभासिनोरेवोभयोरात्मलाभः सम्भवतीति । न चाकारभेदोपलम्भोऽस्तीत्युक्तम् , अतो न स्फुटा द्वैतसिद्धिरि'ति परीक्षा प्रतिपादयितव्येति भावः । यतश्च गृह्यमाणस्यास्तित्वं, तस्मादेकमेवेदमाकारवद् वस्त्विदं नीलमिति गृह्यते तदेकमेवापद्यते, न तु तत्त्वान्तरमाकर्षतीत्यभिप्रायेणाह — तस्मादिति ॥ ७ ॥

एवञ्च परेषु भ्राम्यत्सु नापरीक्ष्यनिरूपणं कर्तुं शक्यम् । तद् यदि नः परीक्षमाणानां परोक्ताभिर्युक्तिभिर्ज्ञानमेवाकारवदिति समर्थनमभविष्यत् ततस्तन्मात्र एव प्रत्यक्षप्रमा क्षीणेति नार्थोऽवकल्पिष्यते । अथ तु बाह्यमेव वस्त्विदमिति प्रतिभासानुसारेणाकारवदिति समर्थ्यते, ततस्तत्तावत् प्रत्यक्षगृह्यमाणमस्तीति स्थिते तत्सिद्ध्यन्यथानुपपत्त्यैव वक्ष्यमाणप्रकारे(ण) बुद्धिसिद्धौ मम द्वैतं सिध्यतीत्यभिप्रायेणाह — **अत** इति द्वयेन ॥ ९ ॥

किं तावदत्र युक्तं स्याज्ज्ञानमाकारवत् कुतः ।
एकमाकारवद्वस्तु ग्राह्यमित्यध्यगीष्महि ॥ १० ॥

तद् यद्याकारवानर्थो बाह्यः कल्प्येत तस्य च ।
ग्राह्यत्वमन्यथा न स्यादिति ग्राहककल्पना ॥ ११ ॥

तेनाकारवतः कल्पाद् ग्राह्यादाकारवर्जितम् ।
वस्त्वन्तरं प्रकल्प्यं स्याद् ग्राहकं निष्प्रमाणकम् ॥

एवं तावत प्रत्यक्षपरीक्षां प्रस्तुत्य तत्स्वरूपप्रयोजनारम्भाक्षेपसमाधानाद्यक्त्वा पूर्वपक्षं ग्रहीतुकामो मीमांसकः स्वगोत्रानुसारेण स्वयमालोचयति — किमिति स्यादन्तेन । इदानीं पूर्वपक्षं गृह्णाति —ज्ञानमाकारवदिति । कथं पुनरिदमिति विस्पष्टे परप्रकाशे प्रत्यगात्मन्याकारवत्त्वमभिधीयत इति सिद्धान्ताभिप्रायेण पृच्छति — कुत इति । अयं च 'कथमि'ति भाष्यप्रश्नानुसारेण प्रश्नो व्याख्यातव्य इति । पुनरपि 'अर्थज्ञानयोराकारभेदं नोपलभामहे' इति भाष्याभिप्रायेणैव ज्ञानस्याकारवत्तायामुपपत्तिमाह — एकमिति । अयमभिप्रायः — एकमेव हि नीलाद्याकारं तत्त्वमधिगतवन्तो वयम् । अतस्तन्मात्रमेवाश्रयामः, न पुनरुभयमाश्रयितुमुत्सहामह इति ॥ १० ॥

नन्वस्त्वेकमाकारवत्, तथापि कुतोऽयं निश्चयः ज्ञानमाकारवन्नार्थ इत्यत आह — तद्यदीति । यदि बाह्यमेव वस्त्वाकारवदिष्यते, ततस्तस्य जडस्य प्रकाशायोगाद् ग्राहकान्तरं कल्पनीयमापद्येत । ज्ञानं तु प्रकाशस्वभावमनपेक्षितप्रकाशान्तरमेव साक्षात्कारि प्रकाशत इति नानुपपन्नम् । अतो ज्ञानमेवाकारवदित्यभिप्रायः ॥ ११ ॥

ननु प्रमाणबलादापतन्ती ग्राहकान्तरकल्पना युक्तैवात आह — तेनेति । अयमभिप्रायः—भवेदेवं यदि प्रमाणवती कल्पना भवेत् । निष्प्रमाणं तु निराकारं वस्तु ज्ञानाभिधानमाकारवतो बाह्यात् कल्पनीयं भवेत् । बाह्यं हि तेनाविदितप्रति(ष?सम्ब)न्धं न तत्तावदनुमापयति, अतिप्रसङ्गात् । नच नित्यपरोक्षज्ञानवादिनः क्वचिदपि बुद्ध्या व्याप्तिसिद्धिः । अपिच अर्थो

ज्ञानानुमाने लिङ्गमर्थधर्मो वा । पूर्वस्मिन् कल्पे व्यभिचारी हेतुः, असत्यपि ज्ञानेऽर्थभावात् । अज्ञातस्य च लिङ्गतानुपपत्तिः एकदेशदर्शनादित्यभ्युपगमात् । ज्ञातस्तु नासति ज्ञानज्ञाने लिङ्गं भवति, अगृहीतविशेषणस्य ज्ञातत्वायोगात् । ज्ञातो हि लिङ्गं न स्वरूपेण, व्यभिचारादित्युक्तम् । किञ्चेदं ज्ञातत्वम् अन्यदतो ज्ञानसम्बन्धात् । तदवश्यं ज्ञानं जिज्ञासमानस्यापन्नमग्रे ज्ञानसंवेदनं ज्ञानमज्ञानं वा ज्ञातस्य । ननु न ब्रूमः स्वरूपेणार्थो लिङ्गं ज्ञानविशिष्टो वा । व्यक्तस्तु विषयो लिङ्गम् । ननु सा व्यक्तिर्बुद्धिरेव विषयस्य, तदसिद्धौ तदुपाधिको व्यक्तो विषयः कथं हि सेत्स्यति । न व्यक्तिर्बुद्धिरर्थात्मेति चेत्, स बुद्धिजन्मा न वा । न तावत् तज्जन्मा, असम्बद्धया बुद्ध्यार्थे धर्मान्तराधानायोगात् । अतज्जन्मनश्चातल्लिङ्गत्वात्, हेतुतद्वतोरसति तादात्म्येऽप्रतिबन्धात् । यथाहुः — 'स किं वा बुद्धिजन्मापि न बुद्धिं गमयेत् प्रतिबन्धाभावात्' इति । अर्थधर्मश्चाज्ञातुरपि साधारणः अविशेषात् परबुद्धिमप्यनुमापयेत् । उक्तं च—'अर्थात्मनश्च साधारणत्वादन्यबुद्धेरप्यनुमानप्रसङ्गः' इति । स्यादेतत् । नेदमनुमानम्, अर्थापत्तिस्तु । साचागृहीतसम्बन्धस्यापि जायत एवेति । तन्न तावत् प्रमाणान्तरम् । यथाहुः — 'तद् द्विविधं सम्यग्ज्ञानं प्रत्यक्षमनुमानं चे'ति । प्रमाणस्य सतोऽत्रैव शब्दादेरन्तर्भावात् प्रमाणे एवेति च । अस्तु वा प्रमाणान्तरम् । कयानुपपत्त्यार्थो ज्ञानं गमयति । स हि स्वकारणसामग्रीतो लब्धात्मा । किं तस्यासति ज्ञाने नोपपद्यते । अस्ति खल्वसावज्ञातोऽपि । सत्यं, ज्ञातता तु तस्यानुपपन्ना । नासावन्या ज्ञानसम्बन्धादित्युक्तमेव । अर्थधर्मत्वे चातिप्रसङ्गो वर्णितः । स प्रमाणान्तरेऽपि समानः । परस्परस्याप्यर्थगतानुपलभ्यमानधर्मदर्शिनः परबुद्ध्यर्थापत्त्युपपत्तेः । अपिच प्रमाणान्तरप्रतीघातोऽनुपपत्तिः । तत्र केन प्रमाणेन ज्ञातो विषयः प्रतिहन्यते, यज्ज्ञानकल्पनयोपपद्येत । अतो नाप्रत्यक्षा बुद्धिः सिध्यतीति । यस्तु वदति सत्यमप्रत्यक्षा धीर्न सिध्यति । तद्वदेव त्वर्थोऽपि प्रत्यक्षसिद्ध एव । एकस्मिन्नेव हि प्रतिभासे मेयमातृप्रमाप्रकाशः नीलमहं जानामीति । अतः प्रत्यक्षबलसिद्धमेव द्वैतमिति । तदुपरिष्टान्निराकारिष्यामः 'नचोपलब्धिरस्तीहे'ति । अतोऽर्थाकाराभ्युपगमे निष्प्रमाणकं वस्त्वन्तरं कल्पनीयमिति सूक्तमिति ॥ १२ ॥

तस्याकल्पकमिच्छंश्चेद्‌र्थे ग्राहकतां वदेः ।
संज्ञामात्रे विसंवादः सिद्धा त्वेकार्थकल्पना ॥ १३ ॥

ग्राह्यग्राहकयोरैक्यं सर्वथा प्रतिपद्यते ।
बाह्याभ्यन्तररूपश्च परिकल्पो मृषेष्यते ॥ १४ ॥

मत्पक्षे यद्यपि स्वच्छो ज्ञानात्मा परमार्थतः ।
तथाप्यनादौ संसारे पूर्वज्ञानप्रसूतिभिः ॥ १५ ॥

स्यादेतत् । अप्रकाशात्मन्यर्थेऽप्रमाणिका वस्त्वन्तरकल्पना भवेत्, अन्यथार्थप्रकाशासम्भवात् । अर्थमेव तु प्रकाशस्वभावमेपिष्यामः, न वस्त्वन्तरं कल्पयिष्याम इत्यत आह — तस्येति । अयमभिप्रायः — एकमेव वस्तु ग्राह्यग्राहकाकारमिति नः प्रतिज्ञा । तद् यद्यर्थ एव तादृशो भवताश्रीयते, सिद्धो नः पक्षः, अद्वैतसिद्धान्तसिद्धेः । संज्ञामात्रे त्वावयोर्विसंवादो भवेद् न वस्तुनि । उभयोरप्येकत्वाभ्युपगमात् । कथं पुनरत्र संज्ञामात्रे विसंवादः । अर्थवादी हि स्थिरमर्थमनुजानाति । ज्ञानवादी तु क्षणिकम् । सत्यम् । अन्याऽय विशेषः तत्त्वं तावदेकमेवापद्यते । एतदेवात्र निरूपणीयम् । अन्यत्त्वेतद् यत् स्थिरमस्थिरं वेति ॥ १३ ॥

एतदेव विवृणोति — ग्राह्येति । नन्वस्त्ययं विशेषः बाह्योऽर्थो ज्ञानमान्तरमिति । अतः कथं न वस्तुभेदः । अत आह — बाह्येति । अयमभिप्रायः नायं बाह्यान्तरविवेकः पारमार्थिकस्तत्त्वाभेदे सिध्यति । भेदे हि तथा भवेदेकं बाह्यमेकमान्तरमिति । अभिन्ने तु तत्त्वे किमपेक्ष्य किं बाह्यं किमान्तरं वा भविष्यति । अतो मृषैवायं ज्ञानमात्रनिर्मितः परिकल्पः कल्पनमिति ॥ १४ ॥

ननु बौद्धानामपि स्वच्छाकारमेकमेव ज्ञानम् । अतः कथमस्मिन् नीलादिरूपं ग्राह्यग्राहकाकारशबलं विभक्तमिदं नीलमहं जानामीति निरूप्यते । नहि स्वच्छस्य नीलादिता सम्भवति । नचैकस्य ग्राह्यग्राहकता नीलमहं जानामीति, स्वात्मनि क्रियाविरोधात् । अत एव न प्रविभागः इदं जानामीति । अतः प्रतिभासानुगुणोऽर्थाकारपक्ष एव न्याय्यः, अत आह —

चित्राभिश्चित्रहेतुत्वाद् वासनाभिरुपप्लवात् ।
स्वानुरूप्येण नीलादिग्राह्यग्राहकरूपितम् ॥ १६ ॥
प्रविभक्तमिवोत्पन्नं नान्यमर्थमपेक्षते ।
अन्योन्यहेतुता चैव ज्ञानशक्त्योरनादिका ॥ १७ ॥

मत्पक्ष इति सार्धद्वयेन। अयमर्थः—यद्यपि स्वच्छो ज्ञानात्मा एक एव, तथाप्यनादौ संसारे यानि पूर्वज्ञानानि तान्येव प्रसूतिः प्रसवो यासां वासनानां ताभिः नीलपीतादिविचित्रज्ञानहेतुत्वाद् विचित्राभिः आत्मानुरूपेण तस्य स्वच्छस्य ज्ञानात्मन उपप्लवात् । उपप्लवो भ्रान्तिज्ञानं, किमुक्तं भवति। यादृशी वासना तादृशं स्वानुरूपं विभ्रमं जनयति । नीलवासना नीलं, पीतवासना पीतमिति यावत् । एवं च स्वानुरूप्येणोपप्लवाद् ज्ञानात्मनि नीलादिरूपं तावत् प्रकाशते । तच्च ग्राह्यग्राहकाकारशबलं तदाकारवासनोपप्लवादेव। ग्राह्यग्राहकाकारशबलैर्हि पूर्वज्ञानैस्तदाका(रा?रा)एव वासना आहिताः। अतो नीलाद्याकारवत् तदाकारप्रकाशो नानुपपन्नः । विभक्ताकारवासनावशादेव च विभक्तप्रतिभासो वर्णनीयः । एवंच वासनावशादेव नीलादिरूपं ग्राह्यग्राहकाकाररूपितं प्रविभक्तमिवेदं नीलमित्युपपन्नमिति न पारमार्थिकं बहिःसन्तमाश्रयभूतमपेक्षते । एकस्मिन्नेव हि तत्त्वे त्रितयं समासं प्रमितिः प्रमाता प्रमेयं चेति । यथाहुः—

"अविभक्तोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥"

इति । आह—सन्तु तावद् वासनानिबन्धनाः संविदां नानासमुल्लासाः । तद्वैचित्र्यमेव कुतः । ननूक्तं विचित्रज्ञानहेतुत्वाच्चित्राभिरिति । न, अन्योन्याश्रयापत्तेः । तथाहि—वासनाभेदाद् ज्ञानभेदस्तद्भेदाद् वासनाभेदः इति दुरुत्तरमितरेतराश्रयमिति। अत आह—**अन्योन्येति** । अयमर्थः नेदमितरेतराश्रयम् । अनादिरयं वासनाज्ञानयोः कार्यकारणभावः बीजाङ्कुरयोरिव । नात्रान्यतरस्यापि पूर्वकोटिः प्रसङ्ख्यायते । अतो वासनातो ज्ञानं ततो वासनेति किमनुपपन्नम् । शक्तिरिति वासनामपादिशति । सा हि ज्ञानशक्तिरिति प्रसिद्धा । अयं चानादितयेतरेतराश्रयपरिहारः अनादौ संसार इत्यत्र सूत्रितोऽत्र विवृत इत्यनुसन्धातव्यमिति ॥ १७ ॥

अनेककल्पनायाश्च ज्यायसी ह्येककल्पना ।
शक्तिमात्रस्य भेदश्च वस्तुभेदाद् विशिष्यते ॥
तस्मादुभयसिद्धत्वाज्ज्ञानस्याकारकल्पना ।
ज्यायसी भवतस्त्वर्थं कल्पयित्वा भवेदियम् ॥
तदसिद्धावशक्तत्वात् तेनैवं विप्रकृष्टता ।
प्रत्यासन्नं च सम्बद्धं ग्राह्यं मम भविष्यति॥ २० ॥

एवं तावदुपपादितं ज्ञानमाकारवदिति । इदानीं तत्रैव कारणान्तरमाह — अनेकेति द्वयेन । कल्पनागौरवं हि द्वैतवादिनामापद्यते, नास्माकमेकत्ववादिनामिति भावः । ननु तवापि शक्तिकल्पनया द्वैतमेव, असत्यां हि तस्यां पूर्वोक्तविभागानुपपत्तिरत आह — शक्तिमात्रस्येति । अयमभिप्रायः — न वासना नाम काचिद् वस्तुतो ज्ञानातिरेकिण्यस्ति या द्वैतमावहति । संवृतिसत्यकल्पिता हि सा । नच काल्पनिकं वस्तु द्वैतमापादयति । अपिच बहिर्वस्तुवादिनामपि तदुपेत्य तत्समवाय्यन्यः शक्तिभेदः कल्पनीय एव तत्तत्कार्यभेदोपपादनाय । तदियं शक्तिकल्पना साधारणी । ज्ञानवादिनस्तु ज्ञानशक्तिकल्पनैव केवलेत्यस्ति विशेषः । एतच्च पारमार्थिकं शक्तिभेदमभ्युपेत्योक्तम् । नच तथा सौगता मन्यन्ते, चिन्मात्रं तु सदित्यभ्युपगमादिति । इतश्च ज्ञानमाकारवदित्याह — तस्मादिति ज्यायस्यन्तेन । उभयोरपि द्वैताद्वैतवादिनोः सिद्धं ज्ञानमतस्तस्यैवाकारकल्पना न्याय्या सिद्धाश्रयत्वादिति । तस्माद् वस्तुभेदादाकृष्येत्यर्थः । तव त्वस्माकमर्थासिद्धेराश्रयान्तरकल्पनापुरस्सरी तदाकारकल्पना स्यादित्याह — भवत इति ॥ १९ ॥

अत्र कारणमाह — तदसिद्धावशक्तत्वादिति । नीलादिर्हीदं नीलमिति क्वचिदाश्रितो दृश्यते । नासावाश्रयमन्तरेणोपपद्यते । तद् यदि ज्ञानाश्रय इष्यते सिद्धाश्रयो भवति, इतरथा साध्याश्रय इति विशेष इति । अपिचैवमर्थाकाराश्रयणे तेन विज्ञानेन विप्रकृष्टता नीलादेराकारस्यापद्येत ।

ततश्च तेन तत्प्रकाशायोग इत्यभिप्रायेणाह — तेनेति । अनेन च 'संवेदनादि'ति बौद्धोक्तो हेतुरन्तर्णीतः । एवं हि तेनोक्तं नानात्मनः संवेदनं भवति नीलवित्तौ पीतवत् । आत्मभूतस्य तु स्वात्मवदेव प्रकाशो नानुपपन्नः । तदिदमुक्तम् 'अनर्थान्तरत्वे तु नीलादेरनुभवात् तदात्मभूतः प्रकाशते, तथा नीलाद्यनुभवः स्यादि'ति । तथेति यथा ज्ञानात्मेत्युक्तं भवति । अतः संवेदनादेव तु भासमानस्य नीलादेस्तत्संविदश्चाविवेकः सिद्ध इति । अपरमपि 'ग्राह्यलक्षणयोगादि'ति बाह्यापलापे बौद्धोक्तं हेतुमुपन्यस्यति — प्रत्यासन्नमिति । अयमभिप्रायः — मम हि ज्ञानात्मभूतमेकान्तप्रत्यासन्नं नीलादि युक्तं यद् ग्राह्यतां प्रतिपद्यते । असम्बद्धस्य तु ग्राह्यलक्षणायोगः । नन्वियमेवार्थस्य ग्राह्यता यत् ततो ज्ञानस्योत्पत्तिः तत्सारूप्यं च । बाह्यनीलाद्याभासं हि ज्ञानम् । तत्स्वरूपं तावत् ततश्चोत्पद्यते कदाचित् ज्ञानकार्यव्यतिरेकात् । यथोक्तं — 'सत्सु समर्थेष्वन्येषु हेतुषु ज्ञानकार्यानुत्पत्तिः कारणान्तरवैकल्यं सूचयति । स बाह्योऽर्थः स्यादि'ति । सौत्रान्तिकमते सन्ति खल्वालोकेन्द्रियमनस्कारादयः । ते च ज्ञानहेतवः । नच ज्ञानं जायत इति दृष्टम् । तदिदं बाह्यार्थसन्निकर्षादेवोत्पद्यत इति तत्सिद्धिः । एवंचोत्पत्तिसारूप्याभ्यामेवार्थवेदनामित्युच्यते (अर्था ग्रा ? अर्थो गृ)ह्यत इति च । अत उत्पत्तिसारूप्ययोरेव ग्राह्यलक्षणत्वाद् ग्राह्योऽर्थो नापह्नोतुं शक्यते । मैवम् । एवं सत्यनन्तरमेव विज्ञानं तुल्यविषयं विषयः प्राप्नोति ज्ञानानां तत्सारूप्यात् तदुत्पत्तेश्च समनन्तरप्रत्ययाधीनजन्मत्वादुत्तरेषाम् । अपिच नार्थज्ञानयोः सारूप्यं, ज्ञानप्रतिभासिनः स्थूलाकारस्य परमाणुष्वभावात् । एकश्चायमाकारो ज्ञानसन्निवेशी । बहूनि च सञ्चितानि रूपादीनि । कथमनयोः सारूप्यम् । नचापि स्थूल एको विषयोऽवयव्यस्ति, तस्यावयवेभ्योऽव्यतिरेकात्, तन्नानात्वे नानात्वापत्तिः । एकावयवकम्पे च सर्वावयविकम्पप्रसङ्गः । एकावृतौ चाभेदात् सर्वावृतिः न वा कस्यचिदित्यविकलोपलम्भप्रसङ्गः । अवयवस्यावरणं नावयविन इति चेद्, न । अभेदे तदनुपपत्तेः । भेदे वा तदावरणेऽप्यनावृतत्वात् प्राग्वदस्य दर्शनप्रसङ्गः । कस्माच्च भिन्नोऽवयवज्ञानाधीनज्ञानः, न खलु घटसंवित् पटसंविदमपेक्षते । वस्तुस्वभावादिति चेद्, न । अन्यतमानुपलम्भेऽनुपलम्भप्रसङ्गात् । कतिपयावयवप्रति-

१. 'आत्मज्ञा' ख. पाठः.

पत्तौ वा (दर्शने?) अङ्गुल्यग्रदर्शनेऽपि स्थूलोपलम्भप्रसङ्गः । अतो नास्ति काश्चित् स्थूल एकोऽर्थः यो ज्ञानं सरूपयति । किञ्च इदमेकेन वा केनचिदात्मना ज्ञानार्थयोः सारूप्यं सर्वात्मना वा । एकदेशसारूप्ये नीलमपि पीतसंविदः सरूपम् उभयोः क्षणिकत्वादसाधारणत्वाच्चेति तदपि ग्राह्यं भवेत् । एवं च सर्वः सर्ववित् स्यात् । अतदुत्पत्तेरग्राह्यत्वमिति चेद्, न । प्रमाणाभावाद् नीलबुद्धिर्नलिपीताभ्यां सदृशी नीलादेवोत्पद्यत इति न नः प्रमाणं क्रमते । अपिच नीलादप्युत्पत्तौ न प्रमाणमित्यनन्तरमेव वक्ष्यामः । समं च सारूप्यमिति न ग्राह्येतरविवेकः । सर्वात्मना तु सारूप्यमातिष्ठमानो जडत्वमप्यर्थस्य बुद्धावादध्यात् । एवं चान्ध्यमेव जगतः । यथाहुः —

"एकदेशेन सारूप्ये सर्वः स्यात् सर्ववेदकः ।
सर्वात्मना तु सारूप्ये ज्ञानमज्ञानतां व्रजेत् ॥"

इति । नच तदधीना ज्ञानोत्पत्तिः, उपादानविशेषाभावादेव कार्यव्यतिरेकसिद्धेः । कार्यदर्शनबलेन हि वयं समनन्तरप्रत्ययमेव वासनापरनामानमुत्तरबुद्धीनां कारणमाचक्ष्महे । तत्कार्यव्यतिरेके तदभावमुन्नयामः । नहि समग्रं च कारणं कार्यं च न भवतीति सम्भवति । अत उपादानमेव तन्नामदशामनुपगतं यन्न कार्यमारब्धवदिति किमर्थग्रहणेन । यथोक्तं —

"यथाकथञ्चित् तस्यार्थरूपमुक्त्वावभासिनः ।
अर्थग्रहः कथं सत्यं न जानेऽहमपीदृशम् ॥"

इति । सिद्धः सत्स्वपि हेत्वन्तरेषु कार्यव्यतिरेकः । तस्मान्नोत्पत्तिसारूप्ये ग्राह्यलक्षणम् । नचागृह्यमाणोऽर्थः सिध्यतीति सिद्धं

"नान्योऽनुभाव्यो बुद्ध्यास्ति त(स्य?स्या) नानुभवोऽपरः ।
ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ॥"

इति । ग्राह्यलक्षणायोगात् तावन्नान्योऽनुभाव्योऽस्ति । अत एव तस्या नानुभवोऽपरः । तेनापि तद्ग्रहणानुपपत्तेः । अतः स्वप्रकाशा धीरेवैका मोदत इति सिद्धम् । यस्त्वसम्बद्धस्यैव ज्ञानेनार्थस्य प्रकाश्यतामातिष्ठते, सोऽसम्बद्धेनापि दीपेन घटस्य प्रकाश्यतामातिष्ठत इति विवृतं हेतुद्वयम् । सहोपलम्भनियम उपरिष्टाद् विवरिष्यत इति ॥ २० ॥

इतश्चाकारवज्ज्ञानं यस्मात् तद्वत् प्रकाशकम् ।
स्वयं प्रकाशहीनस्य बाह्यस्योपायसम्मतम् ॥ २१ ॥
नचागृहीते ज्ञानाख्ये प्रकाश्योऽर्थोऽवधार्यते ।
तदधीनप्रकाशत्वाद् दीपाभासे यथा घटः ॥ २२ ॥
उत्पन्नेष्वपि चार्थेषु प्रकाशाभावतः क्वचित् ।
प्रतिबन्धकयोगाद् वा संवित्तिर्नोपजायते ॥ २३ ॥
ज्ञानस्योत्पद्यमानस्य प्रतिबन्धो न कश्चन ।
नचाप्रकाशरूपत्वं येनास्याग्रहणं भवेत् ॥ २४ ॥

अपरमपि ज्ञानस्यैवाकारवत्तायां कारणमाह —इतश्चेति । युष्माकं मीमांसकानां तज्ज्ञानं प्रकाशकमिति सिद्धान्त इति । कस्य प्रकाशकमत आह— स्वयमिति । बाह्यस्य जडात्मनः स्वयं प्रकाशहीनस्य तदुपायतया सम्मतं, अन्यथा तत्प्रकाशायोगात् ॥ २१ ॥

किमतो यद्येवमत आह — नचेति । यद्धि यस्य प्रकाशकं तद् गृहीतमेव प्रकाशयति । तद् यदि ज्ञानमर्थस्य प्रकाशकमेतदपि नागृहीतं तत् प्रकाशयेत् । अतोऽवश्यं ग्रहीतव्यम् । नच तदनाकारं ग्रहीतुं शक्यम्, नचार्थज्ञानयोराकारभेदोपलम्भः । अतोऽवश्याभ्युपगन्तव्यं ग्रहणस्य ज्ञानस्यैवायमाकार इति साम्प्रतमित्यभिप्राय इति । तदधीनप्रकाशत्वादिति ज्ञानाधीनः प्रकाशः प्रतिभासो यस्येत्यर्थः ॥ २२ ॥

एवं तावदवश्यग्राह्यतया ज्ञानस्यैवाकारः अवश्यग्राह्यता च प्रकाशकतयेत्युक्तम् । इतश्चावश्यग्राह्यतेत्याह — उत्पन्नेष्विति द्वयेन । द्वेधा ह्युत्पन्नं वस्तु न गृह्यते प्रकाशकाभावात् प्रतिबन्धाद् वा । यथान्धकारतिरोहितो घटः कुड्यादिप्रतिबन्धाद् वा यथा लोके । स एव चैतदुभयमपि ज्ञाने सम्भवति । अतो ग्रहणकारणासम्भवादुत्पद्यमानमेव ग्रहीतव्यम् । एवं च तस्यैव साकारत्वापत्तिरित्युक्तमेवेति ॥ २४ ॥

प्राक् चार्थग्रहणादिष्टा तस्योत्पत्तिस्तदैव च ।
संवेदनं भवेदस्य नचेत् कालान्तरेऽपि न ॥ २५ ॥

किं हि तस्य भवेदूर्ध्वं प्राक् च नासीन्न येन तत् ।
पूर्वं गृहीतं पश्चाच्च गृहीतमिति भाष्यते ॥ २६ ॥

ज्ञानान्तरस्य चोत्पत्तिं प्रकाशो न प्रतीक्षते ।
तस्य तस्यापि चान्येन संवित्तावस्थितिर्भवेत् ॥

यदि त्वर्थप्रकाशात् प्राग् ज्ञानं नोत्पद्येतैव, ततोऽसतो ग्रहणासम्भवान्न गृह्येत, न त्वेवं भवद्भिरपीष्यते । उत्पन्नायामेव बुद्धावर्थस्य ज्ञाततास्युपगमात् । ततः प्रागुत्पन्नस्याग्रहणकारणाभावादावश्यकं तादात्विकं ग्रहणमित्याह — प्राक् चार्थेति अस्यान्तेन । यदि तूत्प(न्नं ? न्न) प्रतिबन्धं च केनापि न गृह्यत इत्युच्यते नित्यासंवेद्यतैव तर्ह्यापद्येत । ततश्चाभाव एव ज्ञानस्य भवेदित्यभिप्रायेणाह — नचेदिति ॥ २५ ॥

किं पुनः कालान्तरे न ग्रहणमित्यत आह — किमिति । अगृह्यमाणे विशेषे प्रागग्रहणं परस्ताच्च ग्रहणमित्यनुपपन्नमिति ॥ २६ ॥

ननूत्पन्नस्यापि संविदन्तरापेक्षया ग्रहणमिति किं नोपपद्यते अत आह — ज्ञानेति । युक्तं यदप्रकाशकोऽर्थः प्रकाशाय ज्ञानान्तरमपेक्षते । ज्ञानं तु स्वयमेव प्रकाशरूपमिति किं तस्य प्रकाशान्तरापेक्षया । अतः सहसैव प्रकाशेतेति । तुल्यजातीयान्तरापेक्षायामनवस्था । यथाहुः— 'ज्ञानान्तरेणानुभवे हीष्टा' इति । नच ज्ञानं न ज्ञायत एवेति साम्प्रतम् । अभावप्रसङ्गात् । उत्तरकालं च स्मृतिदर्शनात् सहैव हि विज्ञानेन पूर्वदृष्टमर्थं स्मरन्तो दृश्यन्ते ज्ञातोऽसावर्थो मयेति । नचाज्ञातस्य ज्ञानस्य स्मृतिरुपपद्यते । उक्तं च परैः — 'तत्रापि च स्मृतिः' इति । एवं चापरापरज्ञानापेक्षायामेकविषयसंवित्तावेवायुः पर्यवस्येत् न विषयान्तरसञ्चारो जायेत । तत्र च दृष्टं ज्ञानम् । यथाहुः —

"विषयान्तरसञ्चारस्तथा न स्यात् स चेष्यते ।"

इति । तदेतत् सर्वमभिप्रेत्याह — तस्येति ॥ २७ ॥

ज्ञानप्रष्ठेन योऽप्यूर्ध्वमर्थाभावेऽपि दृश्यते ।
परामर्शोऽर्थरूपस्य स कथं वोपपद्यते ॥२८॥
तद्रूपमर्थमालिख्य यदि धीर्नोपजायते ।
भूतकाले च यद्यर्थस्तत्पूर्वं नोपलक्षितः ॥ २९ ॥
वक्तारश्चापि दृश्यन्ते वर्तमानार्थबुद्धिषु ।
नीलोऽर्थोऽयं यतो मेऽत्र तद्रूपा जायते मतिः ॥३०॥
तस्मात् पूर्वगृहीतासु बुद्धिष्वर्थोपलम्भनम् ।

इतश्च प्राग् ज्ञानं ज्ञायते ज्ञानाकारश्च नीलादिः, येन ज्ञानपुरस्सरमेवावगतपूर्वं निरुद्धमर्थं स्मरन्तो दृश्यन्ते ज्ञातो मयातिक्रान्तोऽमुको राजेति । यदि ह्यर्थस्याकारो भवेत्, असत्यर्थे सता कथं धीरनुरज्येत । अतो बुद्धिरेव तदाकारमर्थमालिख्योपजायत इति युक्तम् । यदि चातीते काले ज्ञानपुरस्सरमर्थो नोपलक्षितो भवेत्, कथमिदानीं तथा स्मर्येत । यथावगतग्राहिण्यो हि स्मृतयः कथं मात्रयापि पूर्वानुभूतमतिक्रामन्ति । तस्माज्ज्ञानाकारो नीलादिः ज्ञानपूर्वकश्चार्थानुभव इत्याह — **ज्ञानेति** द्वयेन । तत् पुनरिदं परस्परविरुद्धमिवोभयं साध्यमुपलभ्यते । तथाहि । ज्ञानपूर्वमर्थोऽनुभूयत इत्यर्थमङ्गीकरोतीति लक्ष्यते । ज्ञानाकारसाधनेन च निराकरोति इति तद्विषयमनृतम् । मैवम् । नात्र ज्ञानपुरस्सरमर्थोऽवसीयत इति तात्पर्यम् । एवं तु मन्यते — अङ्गीकरयामि तावदेनं श्रोत्रियमनुभवानुभवपुरस्सरीमर्थस्थितिम् । एष हि छान्दसो द्वैतसिद्धिमेवमप्यविगुणां मन्यमानोऽभ्यनुजानाति तावत् प्रथमं ज्ञानसंवेदनम् । ततोऽनाकारोपलम्भासम्भवादेकाकारोपलम्भाच्चानायासमेवार्थापलापं वक्ष्याम इति च । तथा भाष्यकारेणापि — 'ननूत्पन्नायामेव बुद्धौ अर्थो ज्ञात इत्युच्यते' इति छद्मनैवार्थाभ्युपगमो दर्शितः । वार्त्तिककारेणापि तथैवानुविहितम् । अतो न दोष इति ॥ २९ ॥

इतश्च ज्ञानानुविधाय्यर्थः । तथाहि भवन्ति वक्तारः — नीलोऽयमर्थः तद्रूपानुभवादिति । ज्ञाननिरपेक्षे त्वर्थनिश्चये नैतदुपपद्यते । तदेतदाह — **वक्तार** इति ॥ ३० ॥

अतः सिद्धं बुद्धिज्ञानपुरस्सरमर्थज्ञानमित्युपसंहरति — **तस्मादिति** ।

नचोपलब्धिरस्तीह निराकारासु बुद्धिषु ॥ ३१ ॥

अत्रैके वदन्ति — किमिदमनिष्टमापाद्यते ज्ञानमनुभूयत इति । प्रतीमो हि वयमेकस्यां संविदि त्रितयं प्रमाता प्रमितिः प्रमेयं चेति, नीलाद्याकारं प्रमेयं प्रमितिमनाकारां प्रमातारं च । तथा हीदृशीयं प्रतीतिः नीलमहं जानामीति । तदिह नीलपदास्पदं प्रमेयं मितिर्ज्ञानाद्युपात्ता । प्रमाता तूत्तमपुरुषेणोपात्तः । किं पुनरत्र त्रितये प्रमाणम् । प्रत्यक्षम् । साक्षात्कारिणी हि प्रतीतिः प्रत्यक्षम् । अस्ति चास्यामर्थवित्तौ त्रितयस्य साक्षात्कारः । तत्रापि मातृमेययोः पराधीनः प्रकाशः । न मितेः, स्वयम्प्रकाशत्वात् । इतरयोस्तु न स्वयम्प्रकाशत्वं, सतोरपि स्वप्नादौ तददर्शनात् । अस्ति खल्वयं पुरुषः, स्वापे जागरायां च प्रत्यभिज्ञानात् । एवमेव विषयाः । नच तदा प्रकाशन्ते । तत् कस्य हेतोः, यदि विषयाणामात्मनश्च स्वयम्प्रकाशता संविदस्तु स्वापादावसम्भवादेवाप्रकाशः, नाप्रकाशत्वात् । अपिच मेयमातृगोचरा फलभूता संविदवगम्यते नतु तस्या अपि भिन्ना संविदपरा, यदसावपि परायत्तप्रकाशाश्रीयते । तदिह स्वप्रकाशा संवित् । तद्गोचरौ मातृमेयौ । संविद्गोचरत्वाविशेषेऽपि नात्मनः कर्मभावः, गन्तृवदुपपत्तेः । यथा खलु समानेऽपि क्रियाफलसंयोगविभागभागित्वे ग्रामादेः कर्मभावो, न गन्तुः । एवं प्रमाणफलसंवित्तिसम्बन्धाविशेषेऽप्यात्मनः कर्तृता । तत् कस्य हेतोः । परसमवायिक्रियाफलभागिता हि कर्मता । सावयवानां गन्तव्यानां च देहे[1] गतिसमवायाद् आत्मनि ज्ञानसमवायात् । तत्रासौ ग्रामः कर्म । तथाच विषया इति ते तथा । अतो निराकारैव संवित् स्वमहिम्ना सिध्यन्ती मातृमेयावपि व्यवस्थापयति । किमिदानीं प्रमत्तवचस्सत्यं पूर्वं बुद्धिरुत्पद्यते नतु पूर्वं ज्ञायत इति । न, बुद्ध्यपदेशात् तस्याश्चानुमेयत्वात् । अस्ति वा बुद्धिसंविदोर्भेदः । अस्तीति ब्रूमः । का तर्हि बुद्धिः, का च संवित् । आत्ममनस्संयोगो बुद्धिः । बुद्धिर्ज्ञानमित्यनर्थान्तरम् । फलभूता संविदनुभवादिपदास्पदम् । तया चात्ममनस्संयोगः कारणभूतोऽनुमीयत इति किमनुपपन्नम् । अदूरविप्रकर्षादन्यतरत्रान्यतरपदप्रयोगः । नन्वेवं संविदि संवेद्येषु च संवेद्यमानेषु संवेद्यद्वयोपलब्धिप्रसङ्गः । नचैवम्, एकाकारसंवेदनात् । उक्तमत्रैक एवाकारः संवेद्यः अनाकारा संवित् प्रकाशत इति । किमिदानीमसंवेद्यैव

१. 'ह', २. 'दि संवेद्यमा' ख. पाठः.

विवेकबुद्ध्यभावाच्च साकारस्य च दर्शनात् ।
साकारवत्तया बोधो ज्ञानस्यैव प्रसज्यते ॥ ३२ ॥

संवित् । न ब्रूमोऽसंवेद्यति । संवि(भक्त ? त्त)यैव हि संवित् संवेद्यते न संवेद्यतया । कथं वाचोयुक्तिः । इयमियं नास्याः कर्मभावो विद्यत इति, स्वयम्प्रकाशत्वात् । नचैवमसंवित् । न, अतन्मूलत्वात् संवेद्यभावस्य सर्वभावानां, सा हि सर्वभावानां सिद्धिः नचासञ्ज्ञेतिता सिध्यतीति कथं तेऽपि सिध्येयुः । अतः संवित्प्रकाश एव द्वैतं साधयतीति किं सिद्धसाधनेन । संविदुपारूढो हि नीलादिरद्वैतमापादयति । संविदैव त्वनाकारसंविदितया व्यतिरेचितो नीलादिर्नाद्वैताय घटत इति सिद्धं प्रमाता प्रमितिः प्रमेयं चेति । तान् प्रत्याह — नचेति । अयमभिप्रायः — श्रोत्रेयदृष्टश्चैव तावद् बुद्धिरनुमेयेति लक्ष्यते । यदेवमाह — 'ज्ञाते त्वनुमानादवगच्छती'ति । यत्तु ज्ञानाभिप्रायं तद् न संविदभिप्रायमिति । तन्न । पर्यायत्वादनयोः । चेतना बुद्धिः ज्ञानं संविदित्यनर्थान्तरमिति लौकिका बुध्यन्ते । नचात्ममनसोः संयोगश्चेतना, रूपादितुल्यगुणत्वात् । तच्चेतनात्वे च मनसश्चैतन्यप्रसङ्गः । तस्यात्ममनसोः साधारणत्वात् । अचेतना बुद्धिरित्यलौकिकम् । यथाहुः — 'बुद्धिश्चेतनैव हि म्यते' । इति । अतो यैवासावनाकारा संविद् भवताभिमता सैव तावद् द्धिः, तदभिप्रायमेव बुद्ध्यनुमेयत्वाभिधानम् । न त्वनाकारा संविदपरोक्षमनुभूयते बुद्धिश्चानुमीयत इति साम्प्रतम् । तदयमर्थः — यासौ लौकिकी बुद्धिर्नासावनाकारा अपरोक्षमुपलभ्यते । तस्मात् प्रत्यक्षबुद्धिवादिनायमाकारो ज्ञानसन्निवेशी वाच्यः । यथास्माभिरुक्तम् । यथावार्त्तिकं वा सिद्धान्तः अर्थ एव प्रत्यक्षो न बुद्धिरिति । तत्र चोक्ता बुद्ध्यनुमाने लिङ्गानुपपत्तिः । अतोऽसिद्धमनिराकाराया बुद्धेरनुपलम्भात् संविदेव द्वैतं साधयतीति ॥ ३१ ॥

अपिचैवं सहोपलम्भनियमात् त्रयस्याभेदापत्तिरित्याह — विवेकबुद्ध्यभावाच्चेति । त्रयाणां विवेकबुद्ध्यभावादेकस्यैव ज्ञानस्याकारवत्तया बोधः प्रसज्यत इति वक्ष्यमाणेन सम्बन्धः । ज्ञानग्रहणमुपलक्षणार्थम् । एकमेव तत्त्वमाकारवद् भवेदिति विवक्षितम् । यो हि मेयमातृप्रमासु सहोपलम्भमातिष्ठते तस्यान्यतरविविक्तान्यतरबुद्ध्यभावादभेद एव त्रयस्या-

पद्येत, भेदे नियमायोगात् । भिन्नानां हि घटादीनामनियतः सहोपलम्भः । ते हि सहभावेन विवेकेन चोपलभ्यन्ते । अतोऽनियमव्याप्तो भेदो नार्हति व्यापकविरुद्धोपलब्धौ भवितुं धूम इवाग्निना व्याप्तोऽनग्नौ । भिन्नावभासाद् भेद इति चेद्, न । अनेकान्तात् । तत्रैतत् स्याद्, एकदापि हि त्रितयमनुभूयमानं भिन्नमेवावभासते घटकुड्यादिवदतो भिद्यत इति । तन्न । अनैकान्तिकत्वाद् भेदोपलम्भस्य भेदे । उपलभ्यते खलु द्विचन्द्रादिर्योऽभिन्नश्चन्द्रः । नचैकस्माद् भिद्यते । तत् कस्य हेतोः । सहोपलम्भनियमादेव । स हि मुख्येन नियतसहोपलम्भः, तन्न ततो भिद्यते । तदनियतसहोपलम्भा एव भावा भेदेनावसीयमाना भिद्यन्ते नेतरे । यथाहुः— 'न भिन्नावभासित्वेऽप्यर्थान्तररूपत्वं नीलस्यानुभवात् तयोः सहोपलम्भनियमाद् द्विचन्द्रादिवदि'ति । ननु भिन्नयोरपि रूपालोकयोः सहोपलम्भनियमो दृष्टः । अनालोकोपलम्भा न रूपबुद्धिर्यतः । तन्न, केवलस्यापि क्वचिदालोकस्य दर्शनात् । रूपस्य च प्राणिविशेषेष्वनालोकस्य । सन्ति हि केचित् प्राणिनः येऽन्धकार एव रूपमालोकयन्ते । आलोके तु प्रतिहन्यन्ते । मातृमेयसंवेदनानि तु सहैवोपलभ्यन्त इति न भेदमर्हन्ति । नहि नीलाद् भिन्नं पीतं तेन सह नियमेनोपलभ्यते । अतः सहोपलम्भनियमादभिन्नं त्रयमापद्यते इति । ननु चायमुपालम्भोऽस्तु सहोपलम्भनियमवादिनामेकेषां मीमांसकानाम् । ये तु विषयवित्तिपुरस्सरीं बुद्धिसंविदमातिष्ठन्ते, तेषामसिद्धः सहोपलम्भनियमः । सदैव हि विषयसंवेदनोत्तरकालमेव संविदुपलभ्यते । यथाहुः —

"पूर्वं संगृह्यते पश्चाज्ज्ञानं तज्ज्ञाततावशात् ।"

इति । तान् प्रत्याह — सेति त इत्यन्तेन । अयमभिप्रायः — इदं तावदविवादं साकारं वस्तु दृश्यत इति । साकारदर्शनं चेदमप्रत्यक्षे संवेदने नोपपद्यते, विषयः सन्मात्रतया न प्रकाशते यतः । तथा सति नित्यप्रकाशापत्तेः । अतो विषयोपलम्भसत्तयैव विषयप्रकाशः, न तत्स्वरूपसतया । विषयोपलम्भसत्ता चासिद्धा न सत्तानिबन्धनव्यवहाराय घटत इति तत्सिद्धिरास्थेया । नच वित्तेरन्या सिद्धिर्भावानां तद् यद्युपलम्भो विदितोऽसिद्धः, तदसिद्धौ विषयासिद्धिः, येन स एव तत्सिद्धिरिति विश्वमस्तमितम् । अतोऽस्मात् साकारस्यैव वस्तुनो दर्शनादनुपपद्यमानादवगम्यते पदस्ति सहोपलम्भ इति । अन्यथा तद्दर्शनायोगात् । यथाहुः —

नह्येवं कल्पना शक्या निराकारादितो मतिः ।
गृह्यतेऽर्थस्ततः पश्चात् साकारः सम्प्रतीयते ॥ ३
आकारवत्त्वभेदोऽत्र ज्ञात्वा शक्येत भाषितुम् ।
प्राग्बुद्धिग्रहणादर्थे संवित्तिर्नेति साधितम् ॥ ३

"अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यति ।"

इति । अतः सिद्धं सहोपलम्भनियमाज्ज्ञानस्याकारवत्तया बोधः नास्ति त
भेद इति ॥ ३२ ॥

आह — यद्युपलम्भासिद्धावुपलभ्योऽपि न सिध्यति, अस्तूपल
सिद्धिः । उपलम्भान्तरेण तु सिद्ध उपलभ्यं साधयिष्यति । एवमपि
पलम्भनियमासिद्धिरित्युपलम्भसिद्धिपूर्वकत्वादुपलभ्यसिद्धेः । उपलभ्या
पुरस्सरी तूपलम्भसिद्धिः प्रतिक्षिप्ता, सिद्धेरसिद्धौ साध्यासिद्धेः । उ
सिद्धिपूर्विका तु साध्यसिद्धिः किं नेष्यते । अतोऽसिद्ध एवायं
आह — नहीति । अस्यार्थः — नेयमीदृशी कल्पना सम्भवति यदन
संविदादावनुभूयते ततश्च पश्चात् साकारोऽर्थ इति । निराकारबुद्ध्य
ब्धेरुक्तत्वात् । इतश्च नैवं कल्पना युक्ता । कथं हि स्वोपलम्भकाले
न्नोऽर्थः स्वोपलम्भोपलम्भावसरे संवेद्येत, यो ह्युपलभ्यमान एव न
सोऽन्योपलम्भावसरेऽनुपलभ्यमान एव सेत्स्यतीति सुव्याहृतम् । ए
अन्येन संवेदनोपलम्भे सोऽन्यसिद्धस्तत्साधनाय न प्रभवतीत्यपरापरा
यामनवस्था । एकासिद्धौ सर्वासिद्धिः । क्वचिद्वा स्वप्रकाशेऽन्येऽपि
स्युरविशेषात् । अतः स्वात्मानं विषयाकारं च युगपज्ज्ञानमुपलभत
सिद्धः सहोपलम्भनियमः । एकव्यापारे क्रमायोगात् । एकः खल्वयं सं
स्वात्मनि विषयाकारे च व्यापारः, प्रकाशात्मा नायं क्रमभावी न स
तीति ॥ ३३ ॥

ननु मा भूदनाकाराया बुद्धेरुपलम्भः । सापि त्वाकारवत्येवोपल
अर्थश्च । तस्माद् द्वयोराकारवत्त्वं भविष्यति । ततश्चोपलभ्यत इति किम
पन्नमत आह—आकारेति । अस्यार्थः — योऽयं ज्ञानार्थयोराकारवत्त्व
यद्ययं ज्ञातः स्यात्, तथा(सी ? स)ति ज्ञात्वा भाषितुमपि शक्येत ।

नचार्थाकार एवायं ज्ञानारूढः प्रतीयते ।
नहि सोऽन्तः प्रवेशाय पर्याप्तो नार्थहानये ॥ ३५ ॥
इत्थम्भावे प्रमाणं च तस्य वक्तुं न शक्यते ।
तदीयप्रतिबिम्बत्वमेतस्मादेव नेष्यते ॥ ३६ ॥

पीतभेदवत् । नचैवं भाषितुं शक्यम् ईदृशो ज्ञानाकार ईदृशोऽर्थाकार इति, नीलाद्याकारमात्रज्ञानादिति । एवं हि सर्वं समञ्जसं भवति । यदि बुद्धिग्रहणात् प्रागेव साकारोऽर्थः सिध्यति, ततो हि तत्सिद्ध्यन्यथानुपपत्त्या ज्ञानमपि कदाचित् सिध्येदिति सिध्यति द्वैतम् । अत्र पुनरगृहीतायां बुद्धावर्थो(नु ? न)सिध्यतीति 'साकारस्य च दर्शनादित्य'त्र साधितम् । अतो न कथञ्चिद् द्वैतसिद्धिरित्यभिप्रायेणाह — प्रागिति ॥ ३४ ॥

अन्यन्मतं — सत्यमाकारवद् ज्ञानं, किन्तु अर्थेनायमाकारो ज्ञान आधीयते । अयमेवार्थज्ञानयोः ग्राह्यग्राहकभावः, यदर्थस्य ज्ञाने स्वाकारसमर्पणम् । कथमपरथा क्षणिकत्वादतीतोऽसमसमयभाव्यर्थो ज्ञानालम्बनं भवेत् । यथाहुः —

"भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥"

इति । एतद् दूषयति — नचेति । किमिति नैवमत आह — नहीति । अर्थाकारो ह्यर्थधर्मः । नच धर्मः स्वाश्रयं हातुमाश्रयान्तरं वोपगन्तुं[1] प्रभवति, स्वरूपहानापत्तेरिति ॥ ३५ ॥

अपिच प्रमाणान्तरप्रसिद्धेऽर्थस्याकारवत्त्वे भवेदप्येवम् । नच तस्याकारस्येत्थम्भावेऽर्थधर्मत्वे प्रमाणमस्ति, हेत्वन्तरसम्भवेऽपि कार्यानिष्पत्तिः कारणान्तरवैकल्यं सूचयतीति तु निराकृतमुपादानविशेषादेव कार्यसिद्धेरुक्तत्वादित्यभिप्रायेणाह — इत्थमिति । ये तु वदन्ति — मा नामार्थाकारोऽर्थं हातुमाश्रयान्तरं वोपगन्तुं प्रभवति । अर्थस्यैव प्रतिबिम्बमिदं शुद्धादर्शप्रतीकाशे स्वच्छे ज्ञानात्मनि दृश्यत इति । तान् प्रत्याह — तदीयेति । एतस्मादेवेति । अर्थाकारत्वे प्रमाणाभावादित्यर्थः ॥ ३६ ॥

१. 'नुं शक्नः प्र' ख. पाठः.

निश्चन्द्रे बिम्बरूपं हि दृष्टं येन दिवा जले ।
स रात्रौ खे च तं दृष्ट्वा जानाति प्रतिबिम्बताम् ॥
विज्ञाने न कदाचित्तु प्राक्तनिराकारदर्शनम् ।
बाह्येवाकारवत्ता धीर्येनैवं कल्पना भवेत् ॥ ३८ ॥
शब्दगन्धरसानां च कीदृशी प्रतिबिम्बता ।
ज्ञाने च गृह्यमाणस्य कथं स्यादर्थधर्मता ॥ ३९ ॥
बाह्याभ्यन्तरदेशत्वान्न चार्थज्ञानयोर्मिथः ।
सम्पर्कोऽस्ति यतो मोहादविवेकमतिर्भवेत् ॥ ४० ॥
असम्मूढस्य चादृष्टे न सम्मोहप्रकल्पना ।
कल्प्यमानेऽथवाप्येवं न द्वयोरवतिष्ठते ॥ ४१ ॥

तानेव प्रसिद्धप्रतिबिम्बोदाहरणेन प्रतिबोधयति — निश्चन्द्रेति । तमिति योग्यतया चन्द्रः प्रतिनिर्दिश्यते । खे च जले चेत्यर्थः ॥ ३७॥

नचैष न्यायोऽत्र सम्भवतीत्याह — विज्ञानेति ॥ ३८ ॥

अपिचास्तु रूपवत्सु प्रतिबिम्बकल्पना, अरूपाणां तु शब्दादीनां प्रतिबिम्बकल्पना न कथञ्चित् सम्भवतीत्याह — शब्देति । अपिच नीलाद्याकारा संविदुपलभ्यते । तत् किमपराद्धमनया, यत्तामनादृत्यायमाकारोऽर्थधर्मतयाभ्युपगम्यते प्रतिबिम्बवच्च दर्शनमित्यभिप्रायेणाह — ज्ञाने(चे)ति ॥ ३९ ॥

यस्तु वदति — नार्थाकारो ज्ञाने सङ्क्रामति । नचार्थस्थः प्रतिबिम्बो दृश्यते । किन्तु ज्ञानमर्थेनायोगोलकमिवाग्निना संसृष्टम् । अतोऽयसीव भास्वराकारो मोहादर्थाकारो ज्ञाने दृश्यत इति । तं प्रत्याह — बाह्येति । अयस्तेजसोर्हि सन्निकर्षाद् युक्तो मोहादविवेकभ्रमः । बाह्याभ्यन्तरदेशौ तु ज्ञानार्थावसम्पृक्तौ । ततः कथमनयोर्मोहादविवेकभ्रम इति ॥ ४० ॥

अपिच कश्चिदेकः सम्मूढो भवति जगतस्तु सम्मोहकल्पना सम्मोह एव । नचात्र कश्चित् कदाचिदसम्मूढो दृश्यते । सर्वस्य विवेकादर्शनात् ।

संसर्गधर्म आकारस्तस्मादेव न युज्यते ।
देशभेदादसंसर्गो मूर्तामूर्ततया तथा ॥ ४२ ॥
त्रैलोक्येन प्रसङ्गाच्च संसर्गो नैककालता ।
नचाप्यार्जवतः स्थानं ज्ञानेनार्थस्य विद्यते ॥ ४३ ॥
सर्वथा कल्पनायां च चक्षुषापि रसादयः ।
गृह्येरन् सर्वभावानामण्वाकाराश्च तद्गताः ॥ ४४ ॥

अतो न सम्मोहकल्पना युक्तेरित्याह — अन्यस्मृहस्येति । यदि तु ज्ञानार्थयोर्विविक्तयोरदर्शनेऽपि सम्मोहः कल्प्यते, तर्हि द्वयोरेव नावतिष्ठेत । एवं हि यथेष्टमेव तत्त्वानि प्रसङ्गाय सम्मोहोऽभिधीयतां, किं विशेषादित्याह — कल्प्यमान इति ॥ ४१ ॥

अन्यद् दर्शनं — नार्थाकारो मोहाज्ज्ञानेऽवगम्यते । किन्तु सांसर्गिकोऽयमाकारश्चूर्णहरिद्रयोरिवारुणिमेति । तदप्यत एव बाह्याभ्यन्तरदेशत्वादनुपपन्नमित्याह — संसर्गेति । तदेव प्रकटयति — देशभेदादिति । अपिच, अमूर्तं ज्ञानं मूर्तोऽर्थः कथमनयोः संसर्गधर्म आकारो भवेत् । घटाकाशादावदर्शनादित्याह — मूर्तामूर्ततया तथेति ॥ ४२ ॥

नन्वसत्यप्येकदेशत्वे एककालतया संसर्गो भविष्यतीत्यत आह — त्रैलोक्येनेति । त्रैलोक्यं हि ज्ञानेन समकालतया संस्पृष्टं संसर्गजन्माकारं प्रतिभासयेत् । नचैवमस्ति । तस्मादतिव्याप्तेर्नैककालतया संसर्ग इति । नन्वार्जवावस्थानं ज्ञानार्थयोः संसर्गो भविष्यतीत्यत आह — नचेति । निर्मुखस्यार्जवाभावाद् न ज्ञानेनार्थस्यार्जवावस्थानम् । सर्वतोदिक्पदार्थबोधेन सर्वतोमुखत्वे वा सर्वार्थसंसर्गप्रसङ्गात् सर्वाकारोपलब्धिः । नहि सर्वतोमुखं कस्यचिदेकस्याभिमुखं युक्तमिति ॥ ४३ ॥

अपिच, येनैवार्थेन ज्ञानस्य संसर्गः कल्प्यते, सर्वथैव तेन संसर्गः कल्पयितव्यः, निर्भागत्वात् । एवं च चक्षुषैकत्र भावेऽनुभूयमाने तेनैव तद्गतरसाद्युपलब्धिप्रसङ्गः, तद्गतसूक्ष्माकारोपलब्धिश्चेत्याह — सर्वथेति ॥ ४४ ॥

नचापि विषयत्वेन स्थाने संसर्गकल्पना ।
विषयत्वं हि कीदृक् स्यात् प्रागाकारोपलम्भनात् ॥
नह्यसंचेतितो भावो विषयत्वेन कल्प्यते ।
विषयत्वात् तदाकार आकाराद्र विषयश्च सः ॥ ४६ ॥

द्वयोराकारनिर्मुक्तं सत्त्वं संसृष्टता तथा ।
स्वरूपतः परिच्छिद्य वक्तुमित्यादि युज्यते ॥
नचाप्यस्येह सद्भावः प्राग् गृहीतो नचोपरि ।
नह्याकारविनिर्मुक्तं ग्राह्यमस्तीति भाषितम् ॥ ४८ ॥

ननु यदेव तदर्थस्य ज्ञानं प्रति विषयतयावस्थानं सोऽनयोः संसर्गो भविष्यतीत्यत आह — **नचेति** । अत्र कारणमाह — विषय(त्व)मिति । अयमभिप्रायः — संसर्गाकारवादिना हि प्रागेवाकारोपलम्भनात् संसर्गो वक्तव्यः । नच विषयत्वमाकारोपलम्भनात् प्रागस्ति । अतः कथं तन्निबन्धनाकारा संविद् भवति ॥ ४५ ॥

किमिति न स्यादत आह — **नह्रीति** । संवेद्यमान एव हि भावो विषय इति विषयविदः । अत उपलम्भोत्तरकालमेव विषयभावान्न तन्निबन्धन आकारबोधः शक्यतेऽङ्गीकर्तुमिति । एवं तु कल्प्यमान इतरेतराश्रयं प्राप्नोतीत्याह — विषयेति । नीलत्वविषयत्वेन संसर्गात् तदाकारो निष्पद्यते । तदाकारनिष्पत्त्या चं तस्य विषयभाव इति दुरुत्तरमितरेतराश्रयमिति ॥ ४६ ॥

दूषणान्तरमाह — **द्वयोरिति** । अयमभिप्रायः — यदि ज्ञानार्थयोर्द्वयोरप्याकारशून्यं स्वरूपमवगतं स्यात्, पुनश्च कदाचित् संसृष्टत्वेनाकारसंवित्तिः, तदा भवेदपि संसर्गधर्माकारकल्पना । नचैवमस्तीति वक्ष्यामः ॥ ४७ ॥

नचार्थस्य ज्ञानाद् विविक्तस्य सद्भावो गृहीतपूर्वः । नच ज्ञानस्योपरि गृह्यते येन चूर्णहरिद्रयोरिव विविक्तगृहीतयोरनयोः संसर्गः कल्प्यत इत्याह — **नचेति** । कारणमाह — नहीति । संसर्गधर्मत्वे ह्याकारस्य

तस्मादर्थेन संसर्गो निष्प्रमाणक एव ते ।
ज्ञानवैचित्र्यसिद्ध्यर्थं नचास्त्यर्थस्य कल्पना ॥ ४९ ॥
तदधीनं हि वैचित्र्यं क्व दृष्टं येन कल्प्यते ।
निराकारेण चोत्पत्तिर्वैचित्र्याकारयोः कथम् ॥ ५० ॥

प्रथमं द्वयोरप्यनाकारबोधेन भवितव्यम् । नचाकारशून्यं ग्राह्यमस्तीति पूर्वमुक्तमिति ॥ ४८ ॥

उपसंहरति — तस्मादिति । किं पुनरिदमर्थस्य सद्भावो न गृहीत इति । ज्ञानवैचित्र्यानुपपत्तिरेव ह्यर्थस्य सद्भावे प्रमाणम् । स्वच्छाकारस्य हि ज्ञानस्य न कारणान्तरमन्तरेणाकारसम्बन्धस्तद्वैचित्र्यं चोपपद्यते । अतोऽस्ति कश्चिज् ज्ञानातिरिक्तो हेतुर्येनेदं वैचित्र्यमाधीयत इत्यभ्युपगन्तव्यम् । न चेन्द्रियाण्येव तत्र कारणमिति युक्तं, तेषामेकरूपत्वेन कार्यवैचित्र्यानुपपत्तेः । नच समनन्तरप्रत्ययादेव केवलाद् विचित्राकारदर्शनमुचितं, विसदृशप्रत्ययानन्तरमेव हि वयमेकान्तविसदृशं प्रत्ययमुपादीयमानमुपलभामहे । तत् तद्धेतुकत्वेऽनुपपन्नम् । यथाकार्यदर्शनं तु विचित्रा एव हेतवः कल्पन्त इति युक्तम् । ते चार्थशब्दवाच्याः । एवञ्च प्रसिद्धसद्भावोऽर्थः ज्ञानं चाविवादसिद्धमेवेति प्रसिद्धसद्भावयोर्न्याय्य एव संसर्गः, अत आह — ज्ञानवैचित्र्येति ॥ ४९ ॥

किमिति न कल्पना, अत आह — तदिति । यदि वैचित्र्यमर्थाधीनतया विदितप्रतिबन्धं भवेद्, एवमर्थमनुमापयेत् । अत्यन्तापरिदृष्टपूर्वेण त्वर्थेन न क्वचिद् वैचित्र्याधानं दृष्टमिति न तद्दर्शनेन तदनुमानं युक्तम् । कार्यदर्शनबलेन कुतश्चिदेव समनन्तरप्रत्ययविशेषात् किञ्चिदाकारं ज्ञानं जायत इति न नोपपन्नम् । विलक्षणा हि ते उपादानविशेषा विलक्षणशक्तय इति न किञ्चिद् दुष्यतीति कार्यदर्शनबलानुसारिण्यामेव च कारणव्यवस्थायां सुष्वा(?)पादावप्याकाराभावसिद्धिः । कार्याभावेन कारणाभावानुमानात् । भवति तु तास्वपि दशासु स्वच्छसंवित्सन्तानः परस्ताज् ज्ञानदर्शनाद्, अनुपादानकारणस्य तस्यानुपपत्तेः । कथमनाकारादाकारवतो निष्पत्तिरिति चेत्, कथं विसदृशाद् विसदृशस्योत्पत्तिः । तत्रापि शक्तिभेद एव कार्यदर्शनबलानुमेयो निबन्धनम् । कश्चिदेवेह मूर्छादावन्ते प्रत्ययभेद

निराकाराच्च विषयाद् बुद्ध्याकारोऽतिविस्मयः ।
स्मृतिस्वप्नादिबोधेन स्यादनाकारता तव ॥ ५१ ॥
नहि तत्रार्थसंसर्गः केवला वासनैव तु ।
हेतुत्वेनोपपन्नेति सैव जाग्रद्धियामपि ॥ ५२ ॥

आविरस्ति, यः परस्तान्मूर्छोच्छेदे नीलाद्याकारप्रत्ययमुपजनयति । स तस्यायमचिन्तनीयो महिमा कार्यदर्शनप्रमाणको न मीमांस्यत इति सूक्तमर्थसद्भावो न गृहीत इति । अपिच यदि साकारोऽर्थः तदधीनं च ज्ञानानां वैचित्र्यं, कथं तर्हि मूर्छादावन्तिमेन निराकारेण ज्ञानेन परस्ताद् भाविनो ज्ञानजातस्याकारो वैचित्र्यं वोपपद्यते । नहि तदुभयमप्यर्थजन्यं, सत्येव तस्मिन्नभावात् । मूर्छायामपि ह्यर्थ आसीदेव । नच तेनासावाकारो दर्शितः । अतो व्यभिचारिणः समनन्तरप्रत्ययविशेषादेव निराकारादपि वैचित्र्याकारयोरुत्पत्तिरभ्युपगन्तव्या । एवञ्च सर्वत्रैव तथाभ्युपगन्तुमुचितम् । किमर्थग्रहेण । पठन्ति च । 'अर्थग्रहः कथं सत्यमि'ति । तदेतदाह — निराकारेणेति ॥ ५० ॥

अपिच, साकारा नीलादयो विषया ज्ञानं सरूपयन्तु निराकारस्तु गगनकुसुमशशविषाणवन्ध्यासुतादिविषयः कथं बुद्धावाकारमादध्यात् । नहि तत्र विषयाकारो नाम कश्चिदस्ति । बलात् तत्र बुद्धिरेव साकारेति वक्तव्यम् । तद् व्यापकमस्तु । किमर्थजरतीयेनेत्यभिप्रायेणाह — **निराकारादिति** । अपिच पूर्वानुभूतेषु स्मर्यमाणेषु असम्बन्धस्वभावेषु स्वप्नादिबोधे चात्यन्तानन्तानानुभूतस्वशिरश्छेदादिविषये विषयाकाराभावादनाकारस्तद्वादिनां ज्ञानमापद्यत इत्याह — स्मृतीति ॥ ५१ ॥

अत्र कारणमाह — नहीति । सता ..... सतेति भावः । कथं तर्हि तत्राकारासम्बन्धः अत आह — केवलेति । वासनेति । समनन्तरप्रत्ययमेवोपादानापरनामानमुपादत्ते । ननु ज्ञानातिरेकि.....पूर्वं चिरन्तनबौद्धमतेन वासनाभेदो वर्णित इति वेदितव्यमिति । एवञ्च जाग्रद्बुद्धिष्वपि वासनाहेतुक एवाकारप्रतिभासो युक्त आश्रयितुं, किमर्थजरतीयेनेत्यभिप्रायेणाह — इतीति ॥ ५२ ॥

१ 'स्वापादि' क. पाठः.

अन्वयव्यतिरेकाभ्यामेवं ज्ञानस्य गम्यते ।
आकारो नहि बाह्यस्य ज्ञानापेतो निदर्श्यते ॥ ५३ ॥
बाह्योपेतो मया यद्वत् तस्मात् संसर्गवागियम् ।
निराकारेऽपि विज्ञाने वासनास्वेव युज्यते ॥ ५४ ॥
द्वयोरप्येक आकार इत्येतस्याप्रमाणता ।
देशभेदादसंसर्गाद् द्वयोश्चानवधारणात् ॥ ५५ ॥

किञ्च, अन्वयव्यतिरेकाभ्यां ज्ञानाकारकल्पनैव साधीयसीति दर्शयति— **अन्वयेति** । एवंशब्दो युक्त्यन्तरोपन्यास इति । कथमवगम्यते, अत आह — नहीतिवदन्तेन । अस्यार्थः—असत्यपि बाह्ये स्वप्नादौ ज्ञानमात्रान्वयादेवाकारान्वयो दृश्यमानो ज्ञानप्रभावित एवावसीयते । न त्वेवमर्थवादिनो ज्ञानापेतमर्थस्याकारान्वयं दर्शयितुं शक्ताः । असति ज्ञान आकारप्रतिभासायोगादिति । अतः सिद्धं तावद् वासनानिमित्त एवायं ज्ञानाकारो नार्थसंसर्गधर्म इति । यदित्ववश्यं सांसर्गिकोऽयमाकारो वक्तव्यः, परमस्तु स्वभावनिराकाराणां ज्ञानानां वासनासंसर्गनिबन्धनत्वेनाकारस्य संसर्गवाक्प्रवृत्तिरित्याह — तस्मादिति ॥ ५४ ॥

प्रत्यूढः संसर्गधर्मपक्षः । अन्यन्मतं — नीलादिराकारो भासते । न चायं ज्ञानार्थयोरन्यतराश्रयतया निर्धारयितुं शक्यते । तदयमगृह्यमाणे विशेषे एक एव द्वयं साकारयतीत्याश्रीयते लाक्षाराग इव सन्निहितं मणियुगलम् । तदेतदुपन्यस्य दूषयति — द्वयोरिति । कथमप्रमाणमत आह — देशभेदादिति । अन्तःस्थं हि ज्ञानं बहिरर्थः । नानयोः सन्निकर्षोऽस्तीति नेदमुभयमेकमाकारमुपजीवितुमुत्सहते । मणियुगलं तु सन्निहितमेको लाक्षारागोऽनुरञ्जयतीति न नोपपन्नमिति । ननु भिन्नदेशयोरपि कुतश्चित् संसृष्टयोरेकाकारोपजीवनं भविष्यतीत्यत आह — असंसर्गादिति । उक्तमिदं नानयोः कदाचित् संसर्गो गम्यते मणेरिव प्रमाणाभावादिति । अपिच पृथगवधारितसद्भावस्य द्वयस्य साधारण आकारो भवेत्, नत्वत्र विभक्ताकारं द्वयमुपलभ्यते । सर्वदैवैकाकारोपलम्भात् । उक्तं च — 'अर्थज्ञानयोराकारभेदं नोपलभामहे' इति । तदेतदाह — द्वयोरिति ॥ ५५ ॥

एवमेवार्थबुद्ध्योः स्यात् सादृश्यान्नाविभक्तता ।
भेदे ज्ञाते हि सादृश्यं नाज्ञाते स्यात् खपुष्पवत् ॥
तथा द्विचन्द्रमायादावन्यथार्थे व्यवस्थिते ।
या स्यादाकारसंवित्तिर्नासावर्थनिबन्धना ॥ ५७ ॥
नक्षत्रं तारका तिष्यो दारा इत्येवमादिषु ।
नैकत्रार्थे विरुद्धत्वाल्लिङ्गानेकत्वसम्भवः ॥ ५८ ॥
परिव्राट्कामुकशुनां कुणपादिमतिस्तथा ।
दीर्घह्रस्वत्ववुद्धिश्च ह्येकस्मिन्नप्यपेक्षया ॥ ५९ ॥

अन्यद् दर्शनं—विभक्ताकारमेवेदमुभयमत्यन्तमुसदृशत्वेन त्वाकारविवेको न लक्ष्यते नीलोत्पलवन इव कादम्बकानामिति । एतदुपन्यस्य दूषयति—**एवमिति** । सादृश्यादविभक्तता न स्यादित्यन्वय इति । कारणमाह—भेद इति । निर्ज्ञातभेदयोर्हीन्दीवरकादम्बयोः सादृश्यादविवेकाभिधानं युक्तम् । पृथगनवगतपूर्वस्य त्वर्थस्य खपुष्पतुल्यस्य सादृश्यादविवेक इति महानयमविवेक इति । सर्वे चैत बाह्यार्थवादिबौद्धैकदेशिपक्षा उपन्यस्य दूषिता इति वेदितव्यमिति ॥ ५६ ॥

इतश्च ज्ञानस्याकार इत्याह—तथेति । द्विचन्द्रादिविभ्रमेष्वन्यथार्थे व्यवस्थितेऽन्याकारा बुद्धिरुपजायते । तच्चार्थनिबन्धनत्वे त्वाकारस्य नोपपद्यते । कथं ह्यन्याकारोऽर्थो ह्यन्याकारां धियमुपजनयेत् । तदवश्यमसत्यप्यर्थे भासमान आकारो ज्ञानस्यैव वक्तव्यः । अतः सर्वत्रैव तथातधारणं युक्तमित्यभिप्रायः ॥ ५७ ॥

किञ्च यदेतद् विरुद्धानेकलिङ्गत्वमेकस्य नक्षत्रं तारका तिष्यो दारा इत्यादिषु तदर्थाकारत्वे नोपपद्यते विरुद्धधर्माध्यासस्य भेदनिबन्धनत्वेनार्थभेदापत्तेः । भिन्नान्येव तु विचित्रवासनानिबन्धनानि विचित्रार्थज्ञानानि जायन्त इति युक्तम् । तदेतदाह—**नक्षत्रमिति** ॥ ५८ ॥

यथैकस्यामेव प्रमदातनौ यथा परिव्राट्कामुकशुनां कुणपं कामिनीभक्ष इति कल्पना भवति, साप्येकात्मत्वादेकस्यार्थस्यार्थवादिनां नोपपद्यत

घटत्वपार्थिवद्रव्यसंज्ञेयादिमतिस्तथा ।
युगपद् ग्राहकाणां च न स्यादैकात्म्यवत्तया ॥ ६० ॥
नार्थे ह्येकत्र युगपद् विरुद्धाकारसम्भवः ।
प्रत्ययानां च भिन्नत्वाद् भवेच्छक्त्यनुसारतः ॥ ६१ ॥

इत्याह — परिव्राडिति । अत्र नार्थनिबन्धनेत्यनुषङ्गनीयमिति । इदं चापरं बाह्यार्थवादिनां नोपपद्यत इत्याह — दीर्घेति एकैव हि प्रदेशिन्यङ्गुष्ठमध्यमाङ्गुल्यपेक्षया दीर्घह्रस्वतयावगम्यते, तच्चैतदैकात्म्ये तस्यार्थवादिनां नोपपद्यते । पूर्वं च प्रमात्रपेक्षयानेकाकारसंवित्तुक्ता । अत्र तु न केवलं भिन्नानां प्रमातृणामेकत्रानेकाकारबुद्धिः, एकस्यापि तूपाधिभेदादनेकाकारबोधो दृश्यत इत्युक्तमिति ॥ ५९ ॥

न केवलमौपाधिको नानाकारः प्रत्ययः । किन्तु घटोऽयं पार्थिवोऽयमित्यादिरेकत्रैवार्थे युगपदनेकेषां ग्राहकाणां विकल्पो दृश्यते । तच्चेदं पारमार्थिकार्थसद्भावे नोपपद्यते तस्यैकात्मत्वात् । एकोऽर्थ एकात्मक इति सर्वैरेव स तथावगम्यते । न चैवम् । अतो बुद्धिमात्रविलसितमेवेदमनेकाकारत्वमिति साम्प्रतम् । तदेतदाह — घटत्वेति । अत्र च प्रातिलोम्येनान्त्यसामान्यात् प्रभृति परसामान्यं यावदुपन्यासः कृत इत्यनुसन्धातव्यम् । ज्ञेयता तु न सामान्यं ज्ञानसम्बन्धोपाधिकत्वात् । अयमपि च प्रतीतिप्रकारो दृश्यत इति प्रदर्शनार्थमुक्तम् । यद्यपि चात्र घटत्वादीनां दीर्घत्वादीनामिव विरोधो न दृश्यते, तथाप्येकात्मकत्वादेकस्य निर्भागस्यार्थात्मनो नानाकारप्रतिभासोऽनुपपन्न इत्युक्तमिति ॥ ६० ॥

किमिति न स्यादत आह — नेति । न तावदेकत्रार्थे एकात्मन्यनेकाकारत्व एवं न्याय्यः । यथाहुः —

"अन्यथैकस्य भावस्य नानारूपावभासिनः ।
सत्यं कथं स्युराकारास्तदेकत्वस्य हानितः ॥"

इति । नतरां विरुद्धाकारसम्भवः । स च प्रागेवोक्तोऽनुसन्धातव्य इति । ज्ञानवादिनस्तु नानाप्रत्यया नानाप्रकारा भवन्तीति युक्तमित्याह — प्रत्ययानामिति । किं पुनरेषां तथात्वे कारणमत आह — शक्त्यनुसारतः ।

निरपेक्षं स्वरूपेण तस्माज्ज्ञानं यदाकृति ।
तथार्थो न यथार्थं तु ज्ञानमुत्पद्यते क्वचित् ॥ ६२ ॥
इत्थं विज्ञानतन्त्रत्वे कोन्वर्थं कल्पयिष्यति ।
धीरनारोपिताकारा स्वात्मन्येवोपयोक्ष्यते ॥ ६३ ॥
नैतदस्ति त्वयैकं हि ग्राह्यं ग्राहकमिष्यते ।

शक्तिरिति समनन्तरप्रत्ययमेवापदिशति, तदधीनत्वाज्ज्ञानकार्यनिष्पत्तेः । तदतिरिक्ता तु शक्तिरप्रमाणिकैवेति न बौद्धैरिष्यत एवेति ॥ ६१ ॥

अतः सिद्धं तावद् भासमान आकारो ज्ञानस्यैव न त्वर्थी(क्षेपः? पेक्षः) अर्थानिरपेक्षमेव तु स्वरूपेण यादृशं ज्ञानं यदि तदनुसार्यर्थोऽभ्युपगन्तुमिष्यते सोऽस्तु नाम । न पुनर्यथार्थं ज्ञानं नाम किञ्चिदस्तीत्याह — **निरपेक्षमिति** ॥ ६२ ॥

अस्तु तर्हि ज्ञानानुसार्येवार्थः, न. एवमपि द्वैतहानिरित्यत आह **इत्थमिति** । अयमभिप्रायः गलज्जिह्विकयेदमस्माभिरुक्तं तथार्थ इति । नतु ज्ञानाकारत्वेऽर्थो नाम कश्चित् सिध्यति । आकारभेदानुपलम्भात् । अतो न विज्ञानतन्त्रत्वेऽर्थकल्पना शक्यते कर्तुम् । अर्थेनानारोपिताकारा धीरेव स्वात्मन्येवोपयोक्ष्यते । स्वात्मानमेव प्रकाशयति न त्वर्थविषया । यद्येवं सर्वसंविदामनर्थकत्वात् किंकृतः प्रमाणेतरविवेकः । अर्थक्रियाकारिप्रत्ययसदसद्भावकृत इति ज्ञात्वा शाम्यतु भवान् । व्यवहारसंवादापेक्षया हि प्रमाणं तद्विसंवादादप्रमाणमिति सांव्यवहारिकी प्रमाणस्थितिः । पारमार्थिकं तु प्रमाणं चिन्तामर्यामेव प्रज्ञामनुशीलयन्तः कंचिदेव कृतिनो निर्धूतनिखिलनीलाद्युपरागमभिमुखीकुर्वन्तीति तत् तुरीयं प्रत्यक्षमाचक्षते ॥ ६३ ॥

सिद्धान्तमिदानीमारभते — **नेति** । अस्यार्थः एकं हि ज्ञानं ग्राह्यग्राहकमिति वः सिद्धान्तः । नचैकस्योभयात्मकत्वे कश्चिद् दृष्टान्त इति । तत्पुनरिदं पूर्वापरयोरनवहितस्यैव भाषितम् । तथाहि — न तावद् ग्राह्यग्राहकाकारं ज्ञानमिति बौद्धैरिष्यते । अपितर्हि प्रलीनग्राह्यग्राहकोद्ग्राहं चिन्मात्रमेव स्वयंप्रकाशमिति । उक्तं हि

"ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते ।"

इति । बौद्धगन्धिर्मीमांसकैरप्युक्तं — 'संवित्तयैव हि संवित् संवेद्यते न तु संवेद्यतया नास्याः कर्मभावो विद्यते' इति । दृष्टान्ताभाववचनमपि चासमर्थम् । नहीदानीमनुमानतो बौद्धस्य प्रत्यवस्थानं, येन दृष्टान्ताभाववचनेनोपालभ्यते । निरालम्बनानुमानस्य प्रत्यक्षबाध उक्तः सम्प्रति प्रत्यक्षशक्तिपरीक्षयैव प्रत्यवस्थितं न ज्ञानं बहिरर्थे प्रवर्तितुं शक्तं ग्राह्यलक्षणायोगादित्यादिभिः । अतः किं दृष्टान्ताभाववचनेनोपालभ्यते । अत्रोच्यते — एवं हि मन्यते । अवश्यमयं ग्राह्यग्राहकभावः संविदो बौद्धैरभ्युपगन्तव्यः, कथमन्यथा सैव सिध्यति । न ह्यग्रहणकर्मणः कस्यचित् सिद्धिरस्ति । ननु स्वप्रकाशः प्रकाशः किमस्य प्रकाशान्तरेण । स्वप्रकाश इति कोऽर्थः । स्वयमेव प्रकाशते नतु प्रकाशान्तरमपेक्षत इति । किं पुनरिदं प्रकाशत इति प्रकाशादर्थान्तरवचनं, न वा । यद्यर्थान्तरवचनम्, अस्ति तर्हि संविदोऽप्यपरः प्रकाशः । अन्यथा प्रकाशत इत्यनधिकार्थमवचनीयमेव । स्वरूपं हि संवित्पदेनैवोपात्तम् । अतः प्रतीतिकर्मतैव संविदः प्रकाशतेपदार्थो घटः प्रकाशत इतिवत् । स्यादेतत् । कर्तृप्रतिनिर्देशोऽयं नातः कर्मभावोऽवसीयत इति । नैवम् । एवमपि प्रकाशतेपदार्थस्य कर्तृभावो वाच्यः । नासावसति प्रकाशभेदे सिध्यति, अद्वितीयस्य भेत्तुमशक्यत्वात् । अतो नाप्तास्य सिद्धिरस्ति । नचापि कर्मणः प्राप्तिरस्तीति सत्याः संविदोऽवश्यं प्राप्यकर्मता भावान्तरवद् वक्तव्या नान्या गतिरस्ति । नन्वर्थः कर्म, आत्मा कर्ता, संवित्तु फलं, तत् कथं कर्मेत्युच्यते । न । फलस्याप्यप्रतीतिकर्मणः सिद्ध्यसम्भवात् । अन्यथा मातृमेययोरपि स्वप्रकाशापातात् किं तत्सिद्ध्यर्थं संविदभ्युपगमेन । न प्रयोजनतः संविदं सङ्गिरामहे, अपितु प्रतीतितः । प्रतीमो हि वयं मातृमेयगोचरां फलभूतां संविदम् । न ततोऽपि भिन्नामपरामिति तावत्येव व्यवतिष्ठामहे । मैवम् । निराकृतमिदं नानाकारा धीरुपलभ्यत इति । नहि नः संवित्प्रकाशवदर्थप्रकाशोऽपि भासते, नीलाद्याकारमात्रप्रकाशात् । नन्वप्रकाशात्मानो घटादयः प्रकाशान्तरमपेक्षन्ताम् । संविदस्तु तद्रूपायाः किमिति प्रकाशान्तरापेक्षया । न, अतद्रूपत्वात् । संविदोऽपि हि न स्वात्मप्रकाशात्मत्वं, अर्थप्रकाशो ह्यसौ ।

वक्ष्यति च—'ईदृशं वा प्रकाशत्वं तस्ये'ति। अतोऽवश्याभ्युपगन्तव्यः संवित्सिद्धये प्रकाशभेदः। किमिदानीमसिद्धैव संवित् संवेद्यं साधयति संविदन्तरसिद्धा वा। न तावत् पूर्वः कल्पः। अप्रसिद्धा ह्यसती न संविद् व्यवहाराय घटत इत्युक्तम्। संविदन्तराधीनायां तु सिद्धावव्यवस्थापात इत्युक्तम्। सत्यम्। न संविदन्तराधीनासिद्धिः संवित् संवेद्यं साधयति। स्वरूपसत्येव तु। कथमधीविषया सतीति चेद्, न धीविषयभावः सत्ता। किन्तु सामान्यमुत्पत्त्युत्तरकालभावि तद्वताम्। अतो मृत्सलिलप्रच्छन्नबीजादिवदविदितस्वरूपसामर्थ्यैव संवेद् विषयं व्यवस्थापयति। स च व्यवस्थितः सत्यां जिज्ञासायां संवेदं संविदन्तराधानेन साधयति। नन्वियं विषयसामर्थ्येन संवित्सिद्धिः प्रत्युक्ता 'वस्त्वन्तरं प्रकल्प्यं स्यात्' इत्यत्र यथा न प्रत्युच्यते तथानन्तरमेव वक्ष्यामः

"यावज्ज्ञासितज्ञानादव्यवस्थापि नापैति।"

इति। अतएव सहोपलम्भनियमोऽपि परैरुक्तोऽस्मान् प्रत्यसिद्ध एव। विषयवित्तिकाले संवेदोऽनुपलम्भात्। विषयमात्रमेव हि इदं नीलमिति नश्चकास्ति, नाहं नीलमिति। संवित्प्रकाशे च तथा प्रकाशानुपपत्तिः। नहि स्वगोचरा संवित् परनिरूपणात्मिका भवति, स्वपरवेद्ययोरिदमहङ्कारयोरविशेषापत्तेः। अयं स्वात्मानमहमिति प्रतिनिर्दिशति परमिदमिति। नत्वभेदेनेदङ्कारमहङ्कारं चोभयमेकत्र प्रयुङ्क्ते। अतो नास्तीदं नीलमित्यत्र संविदुपलम्भ इत्यसिद्धो हेतुः। स्वप्रकाशसंविद्वादेनामेव त्वयमुपालम्भ इत्युक्तम्।

स्यादेतत्। अज्ञातो ज्ञापकहेतुः कथं ज्ञापयतीति। नायं दोषः। अज्ञातस्यापि चक्षुषो ज्ञानजननोपलब्धेः। ननु चक्षुरङ्कुरस्येव बीजं ज्ञानस्य कारकमेवेति युक्तमज्ञातस्यापि जनकत्वम्। मैवम्। ज्ञानहेतोरेव ज्ञापकत्वसमाख्यानात्। अपिच न ज्ञानं ज्ञापकहेतुः ज्ञानत्वात्। ज्ञानस्य हि जनका धूमादयो ज्ञापकाः न ज्ञानमेवेति कथमज्ञापकस्य ज्ञापकधर्मा आपाद्यन्ते। स्वरूपसत्यैव संविदा विषयः साध्यते। सा तु पश्चाज्ज्ञानान्तरेण साध्यत इति। असति तु ग्राह्यत्वे संविदेव न सिध्येदित्यापाद्य ग्राह्यग्राहकत्वमेकत्वे दूषणमुच्यते 'नैकत्राद्वितीये तत् सिध्यती'ति। यदपि च संवेदनमसत्यभेदे नीलसंवेदनयोरनुपपन्नमिति। तदप्यनेनैव निराकृतम्।

विपरीतमिदमुच्यते — ऐकात्म्ये संवेदनमिति, भेदाश्रयत्वाद् ग्राह्यग्राहकभावस्य, स्वप्रकाशत्वनिषेधाच्च । एकं हि तत्त्वमविभागं नात्मनि वर्तितुमर्हति । स्वात्मनि क्रियाविरोधात्, न ह्यङ्गुल्यग्रमात्मनात्मानं स्पृशति सूच्यग्रं वा विध्यति । कर्मकर्तारौ हि तद्धर्मभेदाश्रयणेनैवोभयथा विवक्ष्यन्ते केदारादयो लवनादौ न त्वेकान्तमेकात्मानः । आत्मनोऽपि ग्राह्यग्राहकभावमनन्तरमेव समाधास्यतीति सिद्धं नैकस्य ग्राह्यग्राहकभाव इति । यत्तु भेदे ग्राह्यलक्षणायोग इति । तद् यद्युत्पत्तिसारूप्याभिप्रायेण तदनुमन्यामह एव उक्तदोषत्वादेवंविधस्य ग्राह्यत्वस्य । यत्तु ज्ञानोत्पत्तौ सञ्चे(द्य? त्य)ते तद् ग्राह्यं, कथमनात्मभूतमसम्बद्धं सञ्चेत्यते । एवं ह्येकमेव ज्ञानं विश्वं गोचरयेद्, असम्बन्धाविशेषात् । अस्ति वा ऐकात्म्ये नीलसंवेदनयोः सम्बन्धः । नन्वसौ भेदाधिष्ठानः कथमेकत्राविभाग आस्पदं लभते । स्यादेतत् । ऐकात्म्येऽपि किंसम्बन्धेन, स ह्येकात्मा स्वप्रकाश एवेति । मैवम् । उक्तो हि स्वात्मनि वृत्तिविरोधः । तस्माद् भिन्नमेव संवेदनान्नीलं ग्राह्यलक्षणमुपनिपततीति तद्ग्रहे भेदमातिष्ठामहे । अभेद एव तूक्तेन प्रकारेण ग्राह्यलक्षणायोगः । यदा तु ज्ञानार्थयोः सारूप्यनिराकरणार्थं स्थूलानुपपत्तिश्चलाचलोपलम्भादिभिरापादिता, तां वनोपन्यासावसरे परिहरिष्यामः । सारूप्येण तु ग्राह्यतामनातिष्ठन्तो नेह स्थूलसिद्धावादियामहे । तदेकप्रकाराभिहतमेव हेतुत्रयम् । कथमिदानीमसम्बद्धं प्रकाशते । तत्प्रकाशे वा नातिप्रसङ्गः । नासम्बद्धं प्रकाशते । इन्द्रियाणि हि प्रकाशकानि । तानि च प्राप्यकारित्वादर्थेन सम्बद्धान्येवार्थविषयमात्मनि ज्ञानं जनयन्ति । तैश्चासन्निहितमवर्तमानं वा न प्राप्यत इति नातिप्रसक्तिः । ज्ञानं तु न प्रकाशकं प्रकाशत्वात् । प्रकाशकं च नासम्बद्धं प्रकाशकं प्रदीपवदिति तत्प्रकारजुषामिन्द्रियाणामिष्ट एव सम्बन्धः । तत् किमसम्बन्ध एव ज्ञानार्थयोः । यद्येवं कथं घटस्य ज्ञानं नासम्बन्धः । विषयविषयिभावोऽपि सम्बन्ध एव । स चास्ति ज्ञानार्थयोः । संयोगस्तु नेष्यते समवायो वा । कोऽयं विषयार्थः । येयं प्रतीतिकर्मता । प्रतीतिरिति हि क्रिया । अस्यामात्मा कर्ता । इन्द्रियाणि करणम् । अर्थः कर्म । तद् येयमर्थस्य प्रतीतौ कर्मकारकता तदेव तस्य विषयत्वं तच्च रूपं प्रतीतेः प्रागभूतं परस्तान्निष्पद्यत इत्यवश्यमाश्रयणीयम् । अन्यथा ज्ञाताज्ञातयोरविशे-

षापत्तेः । तदेव ज्ञातता(ति ? दि)पदास्पदं ज्ञानज्ञाने लिङ्गं, कथं पुनस्तदप्रतीतायां प्रतीतौ प्रतीयते । ज्ञानविशिष्टता हि ज्ञातता । सा कथमज्ञाते विशेषणे ज्ञायते । अज्ञाता वा लिङ्गमनुपपद्यमाना वा न ज्ञानं गमयति । न ह्यज्ञातं लिङ्गमनुपपद्यमानं वा लिङ्गिनमुपपादकं वोपस्थापयति । तदितरेतराश्रयं, ज्ञानज्ञाततयोरितरेतराधीनसिद्धित्वात् । स्वरूपमात्रेण त्वर्थो न लिङ्ग(मि ? म)तिप्रसङ्गादित्युक्तमेव । भवेदेवं यदि ज्ञानप्रतीतौ ज्ञातः प्रतीतो भवेत् तदुत्पत्तौ तु स प्रतीत इत्युच्यते । अतः स्वयं सिद्धो ज्ञानं साधयति । यत्तु ज्ञानविशिष्टता ज्ञाततेति । तन्न । तत्कर्मता हि सेत्युक्तमेव । तत्कर्मभावश्चार्थस्य न तत्प्रतीतौ सम्भवति । किन्तर्हि । तदुत्पत्तौ । तदयमुत्पत्त्यैव ज्ञानस्याप्राप्तपूर्वो विषयः सम्प्रति प्राप्तो ज्ञानमुपकल्पयति । एष हि प्राग् ज्ञानोत्पत्तेः सुस्वापादावन्ध इवासीत्, न कञ्चिद् विषयमज्ञासीत् । तत् केयमाकस्मिकी विषयाणां प्राप्तिरिति चिन्तयति — नहि कदाचिद् भुवामकस्माद् भावः सम्भवति । अहेतुसापेक्षस्य गगनवन्नित्यभावापत्तेः । अभावो वा तत्कुसुमवदिति भवितव्यमस्य कदाचिद्भवतोऽर्थसन्निकर्षस्य केनापि कारणेन । न ह्यसौ तथाविधः स्वरूपेणैव, नित्यतथात्वापत्तेः । नेन्द्रियवशेन । तेष्वपि सत्सु सुस्वापादावदर्शनाद् अर्थतथात्वस्य जागरायां चाव्याप्रियमाणेषु । अस्तु तर्हि तद्व्यापार एव तथात्वे हेतुरर्थस्य । न, सत्यप्यभावात् । अस्ति खल्वस्य नानार्थैः सन्निकृष्यमाणानामिन्द्रियाणामसाधारणो व्यापारः । किञ्चिदेव तु कदाचिज्ज्ञातं भवति । एवमेवात्ममनसोरपि सतोरर्थतथात्वादर्शनादहेतुत्वं तथात्वेन । नन्वव्यभिचारी मनसो योगस्तद्भावे हेतुर्भविष्यतीति । कस्य इन्द्रियाणामात्मनो वा । तन्न तावदिन्द्रियाणाम् । यदेव हि किञ्चिद् बहिरिन्द्रियं चक्षुरादि कार्यदर्शनवशान्मनसा संयुक्तमित्यवगतं तदेव किञ्चिज् ज्ञापयति । नेतरत् तदिन्द्रियमनोयोगहेतुकत्वेन युज्यते ज्ञातत्वस्येति तद्योगो न हेतुत्वेन कल्प्यते । आत्मन्यपि मनोयुक्ते कस्य हेतोः किञ्चिदेव ज्ञातं नापरम् । येनेन्द्रियं सन्निकृष्यते चक्षुरादि तदात्ममनोयोगाज्ज्ञातं भवतीति चेद्, न । उक्तव्यभिचारत्वात् । चक्षुस्सन्निकृष्टमपि हि किञ्चिदेव कदाचिज्ज्ञातं भवति नापरं, तदसति विशेषे नावकल्पते ।

अपिच ज्ञानकर्मता ज्ञातत्वं चेतना ज्ञानमिति चानर्थान्तरमिति लोकसिद्धम् । तद् यद्यात्ममनोयोगश्चेतना, तस्योभयसाधारण्याद् मनश्चैतन्य-

प्रसङ्गो वर्णितः । न ज्ञानं चेतना, अपितु संवेदनमिति चेत् । अस्ति वानयोर्विशेषः । नन्वेवं नीलं जानाति संवेत्तीति च सह प्रयुज्येत, अर्थभेदेनापर्यायत्वादिति नात्ममनस्संयोगो ज्ञानम् । अतो न तत्प्रभावितं भावानां ज्ञातत्वम् । सोऽयमहेतुकः प्राप्यकर्मभावोऽर्थस्य ज्ञाततात्माजन्यो नावकल्पते । हेत्वभावेन कार्याभावप्रतिबद्धेन तदनुमानात् । सेयं प्रत्यक्षादीनामनुमानविरोधानुपपत्तिः । तानि ह्यर्थं प्रापयन्ति । हेत्वभावानुमानं च तत्प्राप्तिं प्रतिक्षिपति । सेयमनुपपत्तिर्ज्ञानकल्पनया समाधीयते । अस्ति कश्चिदात्मसमवायी ज्ञानसंवेदनादिपदपर्यायवाच्यो जानातिधातूपादानः क्रियाभेदो यस्मिन्नर्थानां प्राप्यकर्मतेति । ननु ज्ञानं गुणः गुणकाण्डे पाठात् न तु क्रिया । अतः कथं तस्यार्थः कर्मेत्युच्यते । नहि विभोरात्मनः स्पन्दसमवायः सम्भवति । नचापरिस्पन्दात्मिका क्रिया, पञ्चानामपि कर्मणां स्पन्दात्मकत्वात् । न । धात्वर्थमात्रस्य क्रियात्वात् । वक्ष्यति च—'क्रिया धात्वर्थमात्रं स्यात्' इति । बुध्यत इत्यादिभ्यश्च शब्देभ्यः क्रियाप्रत्यय एवोपजायमानो दृश्यते पूर्वापरीभावावगतेः । अतो युक्तैव ज्ञानकर्मता विषयाणां ज्ञानाकारवादिनाम् । अपिचावश्यमप्राप्तपूर्वस्य नीलादेः प्राप्तिर्वक्तव्या । अन्यथा प्रागिवोत्तरकालमप्यप्रतिभासमाने विषयाकारे आन्ध्यमेव जगतो भवेत् । भासते विषयाकारो न केनचित् प्राप्यत इति चेत्, कस्य भासते । यदि न कस्यचित्, किंकृतो व्यवहारभेदः । एको हि नीलं विद्वांस्तदुपाददानो दृश्यते । नापरो विद्वान् । सोऽयं स्वतन्त्रे नीले किंकृतो विशेषः । नहि स्वतन्त्रो भासमानः सर्व(स्या ? स्य)स्यान्न वा कस्यचिद् वनवह्निरिवानुपलभ्यमानः केनापि । अतोऽवश्यमस्य क्वचित् सन्ताने प्राप्तिर्वक्तव्या । तथाच 'यदाभासं प्रमेयं तदि'ति पठन्ति । नचाप्रमाकर्मणः प्रमेयता सम्भवति । अस्त्ययं प्रमेयादिविभागः, किन्तु भ्रान्तिपरिकल्पितः । तथाचोक्तम्—"अविभक्तोऽपि बुद्ध्यात्मा" इति । सत्यमुक्तम् । अयुक्तं तु तत् । एवंहि न किञ्चित् पारमार्थिकं नाम भवेत् । चिन्मात्रतापि हि प्रतीतिवशादेवाश्रीयते । तद्वदेव तु विषयाकारोऽपि भासमानः कथमपारमार्थिको भवेत् । तद्विपर्यस्तत्वे वा कथं संवित्स्वरूपमविपर्यस्तं भवेत् । उभयत्रापि बाधादर्शनात् । अतः संविदेवात्मनो भिन्नमर्थमिदमिति दर्शयन्ती नान्यथा वक्तुं शक्यत इति सिद्धमिदमिति बहिः प्रसिद्धो विषयो ज्ञानं साधयतीति ।

यत्तूक्तमर्थस्थो धर्मः परेणापि ज्ञातो ज्ञानं गमयेदिति । तदयुक्तम् । अर्थो हि ज्ञातोऽनुपपद्यमानो ज्ञानकल्पनायां हेतुरुक्तः । नचासौ सर्वस्य तथा भवति । यस्यैव तु ज्ञानमुत्पन्नं तस्यासौ ज्ञात इति प्रतीतिसाक्षिकमेव । यथा यस्यैव गमनं तस्यैव देशान्तरप्राप्तिर्भवति असत्यपि गतिज्ञाने । किमात्मकः पुनरर्थस्थो धर्मः । उक्तं कर्मकारकतेति । ननु कर्मशक्तिरप्रत्यक्षसिद्धा कथं ज्ञानं गमयति । न कर्मशक्त्या ज्ञानं कल्पयामः । कर्मणा त्वर्थेन, स तु प्रत्यक्षसिद्ध एव । तस्य चाप्रत्यक्षायामपि शक्तौ कारकान्तरवत् प्रत्यक्षतोपपत्तिः । कारकान्तरशक्तयोऽपि ह्यप्रत्यक्षा एव । न चैतावता तेषामप्रत्यक्षभावः । अतः प्रत्यक्षादिप्रमाणप्राप्तो विषयो ज्ञानकल्पनायां हेतुः । प्राप्तिश्चार्थस्यामूतपूर्वावस्था सर्वस्य स्वसंवेद्येत्येके । अन्ये तु हानादिव्यवहारयोग्यतैवार्थस्य प्राप्तिरित्याहुः । सैव हि ज्ञातत्वम् । तदेव हि ज्ञानफलम् । क्रियाफलभागिता च कर्मत्वम् । सर्वथा सिद्धं ज्ञातादर्थाज् ज्ञानानुमानम् । येऽपि प्रत्यक्षैव संवित् स्वात्मानं विषयवदवस्थापयतीति मन्यन्ते, तैरपि ज्ञानोत्पत्तेः प्रागभूतः परस्ताद् भाव्यर्थगतो धर्मभेदोऽभ्युपगन्तव्यः । नतु ज्ञानप्रत्यक्षतैवार्थप्रत्यक्षता । न ह्यन्यस्मिन् प्रत्यक्षेऽन्यत् प्रत्यक्षं भवति, अतिप्रसङ्गात् । यदि संवित्प्रत्यक्षतैवार्थप्रत्यक्षता भवेद्, अनुमेयादीनामप्यापद्येत । अनुमानसंविदोऽपि प्रत्यक्षत्वात् । अतोऽवश्यं स्वगत एवार्थस्य विशेषो वक्तव्यः, येन प्रत्यक्षेतरते व्यवतिष्ठेते । अतः सिद्धं नाप्रमाणिका ज्ञेयसिद्धौ ज्ञानकल्पनेति द्वैतासिद्धिः । सर्वसंविदां त्वानर्थक्ये विषयाकारप्रत्यभिज्ञा निर्निबन्धनैव भवेत् । एष हि पूर्वेद्युर्दृष्टमर्थमपरेद्युः प्रत्यभिजानाति । तज्ज्ञानेन सह निरुद्धस्याकारस्य नोपलभ्यते । अन्यः खल्वयमद्यभुवो ज्ञानस्याकारः । अन्यश्चासौ यः प्राङ् निरूपितानिरुद्धः । कतरदत्र प्रत्यभिजानीमः । प्रमाणेतरविभागोऽपि सर्वसंविदामानर्थक्येऽनुपपन्नः । न चार्थक्रियाकारिज्ञानसदसद्भावनिबन्धनोऽसाविति युक्तम् । स्वप्नपरिदृष्टेष्वप्यर्थेषु (का? क)चिदर्थक्रियाकारिज्ञानोदये प्रामाण्यप्रसङ्गात् । बाध्यते स्वप्नज्ञानमनन्तरम्, अतो न प्रमाणमिति चेत्, जाग्रज्ज्ञानमपि योग्यवस्थायां बाध्यत एवेति कथं प्रमाणम् । अथ तच्चिरेण बाध्यत इत्युच्यते, नैतावता विशेषेण सत्यमिथ्यात्वे भवतः । नहि मायासुवर्णज्ञाने चिरेण विसंवादो दृश्यत

१. 'मन्त' ख. पाठः.

नचैकस्यैवमात्मत्वे दृष्टान्तः कश्चिदस्ति ते॥ ६४॥
अग्न्यादयो घटादीनां प्रसिद्धा ये प्रकाशकाः।
न ते प्रकाश्यरूपा हि प्रकाशस्यानपेक्षणात् ॥ ६५॥
ग्राह्यत्वं तु यदा तेषां तदाक्षं ग्राहकं मतम्।
अक्षग्रहणकाले तु ग्राहिका धीर्भविष्यति ॥ ६६ ॥

इति तत् प्रमाणम्। अतो यत् प्रमाणं तत् प्रमाणम्, अप्रमाणं चाप्रमाणं न त्वर्धजरतीयमुपपद्यते। अतः सिद्धं ज्ञानाद् भिन्न एवार्थो ग्राह्यलक्षणानुयायी ज्ञानं च साधयतीति। दृष्टान्ताभाववचनमपि नानुमानदूषणार्थं, किन्तु स्वाभिप्रेतानुमानदूषणपरिहाराय। एवं ह्यत्रानुमानमन्तर्णीतं नाविभागं द्व्यात्मकम् अविभागत्वाद् अन्यतरांशवदिति। यदि च कश्चित् कदाचिदग्न्यादिषु दर्शनादनैकान्तिकतां ब्रूयात्, तदर्थमिदमुक्तं 'नचैकस्यैवमात्मत्वे दृष्टान्तः कश्चिदस्ति ते' इति। तच्चैतदुपरिष्टात् प्रपञ्चयिष्यतीति॥ ६४॥

नन्वग्न्यादीनामेकात्मनामेव प्रकाश्यप्रकाशकता दृष्टा। अतोऽनैकान्तिको हेतुरत आह — अग्नीति। अयमर्थः— येऽग्न्यादयः प्रकाशकतया प्रसिद्धाः ते घटादीनां न स्वात्मन इति, न प्रकाशरूपाः प्रकाशात्मनः स्वरूपस्येति। किं पुनः स्वात्मनः प्रकाशस्य न ते प्रकाशकाः। नहि तेऽप्रकाशिताः सिध्यन्ति। नच तत्सिद्ध्यर्थमपरसजातीयापेक्षा दृश्यते। नहि प्रदीपः प्रदीपान्तरमपेक्षते। अत आह— अनपेक्षणादिति। अयमभिप्रायः — न ते स्वप्रकाशाय स्वात्मानमपेक्षन्ते, स्वात्मनि वृत्तिविरोधात्। स्वस्य स्वस्मिन् प्रकाशायोगादिति॥ ६५॥

किमिदानीमप्रकाशिता एव प्रकाशन्ते, नैवमपि। केन तर्हि प्रकाश्यन्त इत्यत आह — ग्राह्यत्वमिति। चाक्षुषेण हि तेजसा प्रकाशितास्ते गृह्यन्ते। तत् तेषां ग्राहयितृ न ग्रहीतृ। इन्द्रियचैतन्यप्रसङ्गात्। नन्वेवं तेजसस्तेजोन्तरापेक्षायां सजातीयापेक्षेत्यनवस्था। मैवम्। उक्तात्र नायनस्य तेजसः कार्यदर्शनानुसारिणी रूपसिद्धौ शक्तिसिद्धिः। बहिस्तेजसो रूपप्रकाशकत्वदर्शनाद् देहेऽपि वर्तमानं तदेव रूपस्य प्रकाशकं भूतान्तराणां तैजसस्य च। नचेह सजातीयापेक्षा। अवान्तरजातिभेदात्। अत एवा-

तस्यां तु गृह्यमाणायामन्या धीर्ग्राहिकेष्यते ।
नन्वात्मा ग्राहको ग्राह्यो भवताभ्युपगम्यते ॥ ६७ ॥

कथञ्चिद् धर्मरूपेण भिन्नत्वात् प्रत्ययस्य यत् ।
ग्राहकत्वं भवेत् तत्र ग्राह्यं द्रव्यादि चात्मनः ॥ ६८ ॥

यस्तु नात्यन्तभेदोऽत्र क वासाविष्यते मया ।
प्रत्यासत्तिनिमित्ता तु प्रत्यगात्मप्रवृत्तिता ॥ ६९ ॥

न्धस्य प्रदीपादयो न बुद्धिविषयाः । स्वप्रकाशत्वे च तेषामन्धस्यापि धीगोचरा भवेयुरिति । अक्षमपि रूपरूपिरूपैकार्थसमवायिना प्रकाशकं न स्वात्मनः, तद्ग्रहणकाले बुद्धेरेवान्यथानुपपत्तिप्रमाणिकाया ग्राहकत्वमित्याह— अक्षेति ॥ ६६ ॥

बुद्धिस्तु बुद्ध्यन्तरवेद्येत्यनन्तरमेवोपपादितमित्याह—तस्यामिति । अत्र चोदयति — नन्विति । आत्मनो हि ग्राहकान्तराभावादवश्यमेकस्याभयरूपता वक्तव्या । नह्यसावन्येन गृह्यते । ग्राहकानन्त्यप्रसङ्गात् । अतस्तद्वदेवैकस्यैव ज्ञानात्मनो ग्राह्यग्राहकभावो नानुपपन्न इति ॥ ६७ ॥

परिहरति — कथञ्चिदिति । अयमभिप्रायः — निर्भागं हि ज्ञानमिति वः सिद्धान्तः । नचैवंविधस्य द्वैरूप्यमुपपन्नम् । आत्मा तु केनचिदात्मना ग्राहकः । केनचिदात्मना ग्राह्य इति किं नोपपद्यते । तथाहि — अस्यार्थसंयुक्तेन्द्रियसंयुक्तमनस्संयोगिनः प्रत्ययो नाम धर्मभेदो जायते । स चास्मात् कथञ्चिद् धर्मरूपेण भिन्नः । तेन चायं ग्राहकः । यत् तस्य पृथिव्यादिद्रव्यान्तरसाधारणं द्रव्यादिरूपं तद् ग्राह्यम् । ज्ञानस्य तु नैवंविधः कश्चिद् विभागो बौद्धैरिष्यते । अतः कथं तस्य द्वैरूप्यमिति ॥ ६८ ॥

नन्वेवमपि तावदत्यन्तभेदो ग्राह्यग्राहकयोरनिष्ट एव, अभेदस्यापि धर्मधर्मिणोरिष्टत्वादत आह— यस्त्विति । अत्यन्तभेदो हि घटाग्न्यादीनामप्यस्माभिर्नेष्यते एव । द्रव्यादिरूपेणाभेदात् । अतः कथञ्चिद् भिन्नयोरेव सर्वत्र प्रकाश्यप्रकाशकत्वमित्यात्मनोऽपि नानुपपन्नमिति । यदि तर्हि प्रत्य-

अस्मत्प्रयोगसम्भिन्ना ज्ञानस्यैव च कर्तरि ।

यांशो ग्राहकः द्रव्यांशो ग्राह्यः, कथं तर्हि भाष्यकारः 'प्रत्यगात्मनि चैतद् भवति न परत्रे'ति प्रत्यगात्मवृत्तितामात्मनो मन्यते । नन्वेवं परगोचर एवाहं-प्रत्ययो भवेत् । परं हि प्रत्ययात्मनो द्रव्यादिरूपमत आह—प्रत्यासत्तीति। येयमात्मनः प्रत्यगात्मवृत्तिता भासते नायं दोषः । सर्वमेव हि नोऽनेकान्तेन परत्र प्रवर्तते । आत्मा त्वत्यन्तप्रत्यासन्नग्राह्यग्राहकधर्मकः प्रत्यगात्मवृत्तितया भासते । अत्यन्तप्रत्यास(न्नो ? न्नौ) हि नरस्य जलाजलात्मानौ तयोरसौ साधारणो ग्राह्यग्राहक इत्यभिधीयते इति न कश्चिद् दोष इति ॥ ६९ ॥

अपिच, अहमिति योऽयमस्मत्प्रयोगः तत्सम्भिन्ना विशदतरमात्मगोचरा संविदुत्पद्यमाना दृश्य(न्ते ? ते ।) ज्ञानं तु न स्वगोचरं जातु जायमानमुपलब्धम् । अतो नात्मदृष्टान्तेन ज्ञानस्योभयरूपता वक्तुं शक्या । नहि तदहं नीलमिति कदाचिदुत्पद्यमानं दृश्यते । सर्वदेदम्प्रयोगसम्भिन्नबोधात् । अत उपपन्नैवात्मकर्तृकात्मनि संवित्तिः नतु ज्ञान इत्याह— **अस्मत्प्रयोगसम्भिन्नेति** । अत्रैके वदन्ति कुमारस्वामिवादिनः — नात्मास्मत्प्रयोग-**सम्भिन्नबोधवेद्यः** । नहि वयं कार्यकारणसङ्घातातिरेकिणमयमस्मीति पुरुषं बुध्यामहे । पृथिव्यादिद्रव्यानुभव एव स्वप्रकाशः स्वमात्मानं स्वप्रकाश्यमात्मानं मेयं च द्रव्याद्यवस्थापयति । नहि विषयवित्तावप्रतिसंहिते पुरुषे स्वपरवेद्ययोरतिशयः सिध्यति। अतो विषया न बोद्धर्यनवभासमाने भासन्ते । **नासौ** तेषु । अत एव विषयवेदनोपरमे जडाकाशादिवदात्मनोऽवस्थानं सङ्गिरन्ते । यदा खल्वयं पुरुषः प्रक्षीणाशेषकर्माशयो मुच्यते, तदा ज्ञानकारणानामिन्द्रियादीनामभावादसति विषयवेदने चिद्रहितः खवदवतिष्ठते । **निश्शेषवैशेषिकात्मगुणोच्छेदलक्षणमेव** हि मोक्षं मन्यन्ते । नचैवमपुरुषार्थत्वं, दुःखोपरमस्यापि पुरुषेणार्थ्यमानत्वात् । संसारिणो हि दुःखेनोद्विग्ना अत्यन्ताय तदुच्छेदमभिसन्दधाना गृहेभ्यः प्रव्रजन्तो दृश्यन्ते । ननु **सुखमप्यात्मनो** वैशेषिको गुणः । तस्योच्छेदादपुरुषार्थत्वमपि भवेत् । **मैवम्** । सुखमपि संसारिणो नानाविधानेकदुःखसङ्कुलं नातिचिरमनुवर्तत **इति** महान्तस्तदपि दुःखपक्ष एव निक्षिपन्तो मोक्षायोत्तिष्ठन्ते । अतो नास्ति

विषयवेदनोपरमे नरस्य चैतन्यम् । अत एवायमहरहस्सुखार्थे सन्मात्रतयावातिष्ठते । न पुनः किञ्चिज्जानाति । तत्र चानुभवे स्वप्नपरिचितानामिवार्थानामुपरिष्टात् स्मरणं भवेत् । नचैतदस्ति । अतो नानवभासमानेषु विषयेषु बोद्धा प्रख्यायते । नच विषयवित्तावस्मत्प्रयोगसम्भेदः इदम्प्रयोगसम्भेदादिति नास्मत्सम्भेदे विषयानवग्रहादात्मग्रहः । नापि विषयवित्तावात्मग्रहे अस्मत्प्रयोगसम्भेद इत्यसमञ्जसमस्मत्प्रयोगसाम्भिन्नेति । अत आह — ज्ञानस्येति । अयमभिप्रायः — अस्मत्प्रयोगसम्भिन्नोऽस्ति बोधो न वा । यदि नास्ति, जितमनुत्तरा गुरवः । सतस्तु किमालम्बनमिति वक्तव्यं शरीरमिन्द्रियाणि वा । न तावच्छरीरं, ज्ञातृगोचरत्वात् । अहं जानामीति ज्ञातारमहंप्रत्ययोऽवलम्बते । नच शरीरं चेतयते भौतिकत्वाद् भूतानां चाचेतनत्वात्, कारणगुणपूर्वकत्वाच्च कार्यगुणानाम् । अत एव नेन्द्रियाणि ज्ञातृणि । नच ज्ञानं, प्रत्यभिज्ञानात् । अयं हि पूर्वेद्युर्दृष्टमर्थमुत्तरेद्युः प्रत्यभिजानानः पूर्वापरसाधारणमात्मानमनुसन्दधाति अहमिदमदर्शमिति । तत्तु ज्ञानगोचरत्वेऽनुपपन्नम् । अन्यो हि तदा यः पूर्वेद्युर्दृष्टवान्, अन्यश्चायं योऽद्य पश्यति, क्षणिकत्वाज् ज्ञानानाम् । अतः —

"बुद्धीन्द्रियशरीरेभ्यो भिन्नोऽहङ्कारगोचरः ।
संवित्सामर्थ्यसिद्धत्वान्न जहात्युक्तरूपताम् ॥"

इति । तदिदमुक्तं — ज्ञानस्यैव च कर्तरीति । ज्ञानकर्तुर्हीयमस्मत्प्रयोगसम्भिन्ना संवित्तिः, न चान्यो ज्ञानस्य कर्तेत्युक्तम् । अतः संविद्बलादेवोभयरूपतात्मनः सिध्यति

"न त्वेवमात्मैवात्मानं ज्ञानं जानाति जातुचित् ।
तद्धीदं नीलमिति यत् सर्वदा परगोचरम् ॥"

यत्तु न कार्यकरणसङ्घातातिरेकिणं प्रतिपद्यामहे इति । किमेवं देहाद्यालम्बनोऽहंप्रत्ययः । तत् तावत् प्रत्युक्तमेव । नचानालम्बनोऽयम्, अत्रत्यसिद्धान्तात् । तदयमनालम्बनमात्मानमलभमानः स्वगोचरं ज्ञातारमाकर्षति । स प्रतीतिबलसिद्धोभयरूपः पुरुषो न नोपपद्यते । देहेन्द्रियादिसङ्कीर्णस्तु न विविच्योपलक्षयितुं शक्यते अयं नामासौ पुरुष इति । न चैतावता न गृहीतो भवति । नहि क्षीरोदकसंसर्गे विवेकेनागृहीते इति

न गृहीतमुभयम् । एवमिहापि संमुग्धबुद्धः पुरुषः प्रत्याहारादिकं योगमभ्यस्यद्भिर्नित्यनैमित्तिकमात्रानुष्ठायिभिरकुर्वद्भिर्निषिद्धं भोगप्रक्षीणाशेषकर्माशयैरयमस्मीति विविच्यापरोक्षीक्रियते । न त्वयं विषयवित्तावप्ययं नामेति विविच्यते । येऽपि विषयवेदनावसर एव नरो गृह्यते इत्यास्थिताः, तैरप्यस्य विवेको दर्शयितुमशक्य एव । अतो नायं दोषः विवेको नावगम्यत इति । न त्वयं विषयवेदनावसरे ज्ञायते । नहि तदा तदतिरेकिणः कस्यचित् प्रतीतिरस्तीत्यनन्तरमेव वक्ष्यते न त्वत्रेत्यनेन । संविदेव तावत् तदा नावभासते, यदायत्तो भावानां भेदः प्रागेव संवेत्ता । यत्त्वेवं स्वपरवेद्ययोरनतिशय इति । तन्न । यस्य हि ज्ञानमुत्पन्नं, तस्य विषया भासन्ते इत्युक्तमेव । अतः कथमुत्पन्नज्ञानेन संविदितमन्योऽनुभवेत् तेन वा ज्ञातं तदन्यः । नहि बोद्धृसंवेदनकृतः स्वपरवेद्ययोर्भेदः, येनैवमापद्येत । एतावतैव ह्येकस्यासौ वेद्यः, नापरस्य, यत् तस्य ज्ञानमुत्पन्नम् । एवमपि भवेदेतद् यद्यसत्यां बोद्धृवित्तौ विषया न विदिता भवेयुः । तद्वित्तिरेव वा विषयवेदनं भवेत् । न त्वेवं, केवलविषयावग्रहात् । अन्यगोचरज्ञानस्यान्यविषयत्वासम्भवात् । एवं चासत्यां विषयवित्तौ पुरुषो न प्रकाशत इत्यपि दुरुक्तम् । एवं ह्युपरतकरणग्रामस्य मोक्षो मरणमेव शब्दान्तरेणानुज्ञातो भवेत् । न खल्वपि ज्ञानात्मनः पुरुषस्य सदसत्त्वयोरस्ति विशेषः । तदयमपवर्गदशायां प्रकाशत एव । केन पुनरयं तदा प्रकाश्यते । न केनचित् । स्वप्रकाश एवेत्येके । नत्वेवं, स्वप्रकाशत्वनिषेधादविभागस्य । तदापि त्वयं धर्मधर्मित्वविभागाश्रयेण प्रत्ययात्मना ग्राहको द्रव्यादिरूपेण ग्राह्य इति वाच्यम् । किमस्ति तदा धर्मधर्मिभेदः । को दोषः । श्रुतिविरोधः । श्रूयते हि 'एकमद्वितीयमि'ति । न । व्यतिरिक्तग्राह्यनिषेधात् । अन्यथा ह्यात्मभेदोऽपि न सिध्येत् । नचासौ नेष्यते, मुक्तेतराविभागापत्तेः । अपिच अर्थावग्रहनिवृत्त्यर्थो एवं विसंवादा इति तत्र तत्रोक्तम् । अतोऽपवर्गेऽपि ग्राह्यग्राहकाकार एवात्मा । श्रूयते च 'जानात्येवायं पुरुषो ज्ञातव्यं तु न वेदे'ति । 'नहि तदा ज्ञातुर्ज्ञातेर्विपरिलोपो विद्यते । नतु विभक्तमस्त्यन्यद् यतो द्वितीयं जानीयादि'ति । तस्माज्जानातिपदप्रयोगादवगच्छामः यदस्ति मोक्षेऽपि कर्मभावः पुरुषस्येति । जानातेरकर्मकस्याप्रयोगात् । इयांस्तु विशेषः यदयं भूतेन्द्रियवशो विषयोपरागात् तच्छ-

याभेदान् प्रतिपद्यमानोऽविभक्तज्ञानशक्तिराभासते । निजैव त्वस्य चिति-शक्तिः । सा असति विषयोपराग आत्मगोचरैवावतिष्ठते । कथमकरणिका ज्ञानोत्पत्तिरिति चेद्, मैवम् । तदानीमपि मनसो भावात् । नित्यं हि तदात्म-वदुपेयते । आह च —

"प्रत्याहारादिकं योगमभ्यस्यन् विहिताक्रियः ।
मनःकरणकेनात्मा प्रत्यक्षेण प्रतीयते ॥"

इति । नचैवं विषयवेदनप्रसङ्गः, मनसो बहिरस्वातन्त्र्यात् । विषयवित्तीनां च सुखदुःखहेतुत्वेन कर्मजन्यत्वादसति कर्मसंस्कारेऽनुपपत्तेः । आत्म-ज्ञानं च न कर्मजन्यमिति विगलितनिखिलकर्माशयस्यैव निष्पद्यते । केवल-ज्ञाननिराकरणेऽपि विषयवेदनान्येव प्रत्युक्तानि नात्मज्ञानम् । आह च —

"निजं यत्त्वात्मचैतन्यमानन्दोऽध्यक्ष्यते च यः ।
यच्च नित्यविभुत्वादि तेनात्मा नैव मोक्ष्यते ॥"

इति । सुस्वापेऽपि त्वात्मसंविदस्त्येवेति केचित् । अत एव सुषुप्तप्रतिबुद्धः सुखमहमस्वाप्समित्यात्मानं प्रतिसन्धत्ते । अथवा तत्र कर्माशयानुवृत्तेस्तत्पर-तन्त्रं मनो न केवलमात्मानं प्रकाशयति, न विषयवित्तिविरहात् । अतो न विषयसंवेदन एवात्मसंवेदनम् । अपिचैवं मेयमातृगोचरायामेकस्यां सं-विदि भासमानयोः किंकृतः कर्मकर्तृभावः । एवं हि तद्विकर्मकं ज्ञानं भवेत् । यत्तूक्तं परसमवायिक्रियाफलभागिता कर्मतेति, तदयुक्तम् । यदेव हि ज्ञानोत्पत्तावाप्यते तत् प्राप्यं कर्म । तथाचात्मेति कथमस्याकर्म-त्वम् । अपिच केयं क्रिया, यत्समवायात् तत्फलभागितया आत्मनः कर्तृ-त्वम् । किंपुनस्तत् । उक्तम् आत्म(म)नोयोग इति । नन्वस्य मनस्यपि समवायात् तस्यापि कर्तृत्वप्रसङ्गः । तत्फलसम्बन्धश्चोभयोरप्यविशेषादा-पद्यते । तत्र चोक्तो मनश्चैतन्यप्रसङ्ग इति सिद्धं न विषयवित्तेरेव त्रयसिद्धि-रिति । यच्चास्मिन् दर्शने दुःखोपरतिरेव मोक्ष इत्युक्तम् । तदप्ययुक्तम् , आनन्दश्रुतेः । श्रूयते हि 'विज्ञानमानन्दं ब्रह्म' 'आनन्दं ब्रह्मणो रूपम्' इति च । 'तदेतत् प्रेयः पुत्रादि'ति च । नच दुःखनिवृत्तिरेवानन्दः, अस्मादौ प्रसङ्गात् । स्यादेतत् । प्रत्यग्वृत्तिरुपलभ्यमाना दुःखाभावात्मना सुखम् । नचात्मा किञ्चित् प्रत्यग् जानाति अचेतनत्वादिति नासौ दुःखायते सुखा-यते वा । मैवम् । एवमपि देहिनो भिन्नावयवसंयोगी सुखदुःखसाधन-

भवन्ती तत्र संवित्तिर्युज्येताप्यात्मकर्तृका ॥ ७० ॥

नत्वत्र करणज्ञानग्राहकाकारवेदनम् ।
ग्राह्यत्वं येन बुद्धेः स्यादभिन्नत्वेऽपि पूर्ववत् ॥ ७१ ॥

अन्याकारापि संवित्तिर्यद्यन्यविषयेष्यते ।
ज्ञानाकारापि संवित्तिः कस्मान्नार्थस्य कल्प्यते ॥

जन्मा युगपत् सुखदुःखभोगो न स्यात् । दुःखायमान एव ह्येकत्र भागे परत्र सुखायते । तद् दुःखनिवृत्तौ सुखेऽनुपपन्नम् । प्रदेशान्तरे दुःखाभावः सुखमिति चेद्, न । स्वसंवेद्यत्वादाह्लादाविशेषस्य, प्रदेशान्तरे दुःखाभावे च सुखे नरकान्तरे दुःखाभावान्नरकान्तरे सुखित्वप्रसङ्गः । तत्तावद् दुःखनिवृत्तिः सुखम् । नचास्यामानन्दवादो गौणः, प्रमाणाभावात् । नह्यानन्दश्रुत्यर्थे मुख्ये गृह्यमाणे किञ्चिदनुपपन्नं, येन गौणतया व्याख्यायते । अतो विज्ञानमानन्दं ब्रह्मेति प्रतिजानीमहे । असच्चेतितस्त्वानन्दोऽप्यसत्कल्प एवेति सिद्धमन्तरेणैव विषयवेदनमस्मत्प्रयोगसम्भिन्नायां संवित्तावात्मा प्रकाशत इति ॥ ७० ॥

यथा चास्मत्प्रयोगसम्भिन्नसंवित्संवेद्य आत्मा द्विरूपो नैवं ज्ञानम् । नहीदं नीलमिति ज्ञाने करणानामिन्द्रियाणां ग्राहकस्यात्मनो ज्ञानस्य वाकार उपलभ्यते, नीलमात्रप्रकाशादिति न पूर्ववदात्मवदभिन्नत्वेऽपि नीलज्ञाने तद्बुद्धेर्ग्राह्यत्वम् । नीलमेव तु तया गृह्यते । सा तु ततो ज्ञातादवगम्यत इत्युपपादितमेव, तदेतदाह — नत्विति । दृष्टान्तार्थं करणग्राहकयोरुपादानम् । यथेदं नीलमित्यत्र करणमिन्द्रियं ग्राहकः पुरुषो न ज्ञायते, एवं ज्ञानमपि । कर्मैव तु केवलमत्रावगम्यते । न च कर्तृकरणक्रियेति ॥ ७१ ॥

स्यादेतत् । ज्ञानसंवित्तिरेवेयमिदं नीलमिति । पररूपनिरूपणाकारत्वं तस्या वासनानिबन्धनम् । अनादिर्हि वासना संसारिणां, तद्वशेन स्वात्मानमपि परमिव निरूपयति परेषामिव परं देहमात्मतया अहमिति । अत आह — अन्याकारेति । अयमभिप्रायः — संविन्निष्ठा हि नो वस्तुव्यव-

अभिन्नत्वं यदा चेष्टं ग्राह्यग्राहकवस्तुनोः ।
तदान्यतरसंवित्तौ ह्याकारं ग्रहणं भवेत् ॥ ७३ ॥
यदा तु ग्राह्यमाकारं नीलादि प्रतिपद्यते ।
न तदा ग्राहकाकारा संवित्तिर्दृश्यते क्वचित् ॥ ७४ ॥
तस्मादभिन्नता चेत् स्यात् तस्याप्यनुभवो भवेत् ।
ग्राह्यो वा नानुभूयेत ग्राहकाननुभूतिवत् ॥ ७५ ॥
ग्राहकग्रहणेऽप्येवं ग्राह्यसंवेदनं भवेत् ।
शुद्धमेव निराकारं ग्राहकं संविदस्ति हि ॥ ७६ ॥
ग्राह्यादभिन्नतायां च सा संवित्तिर्न युज्यते ।
ग्राहको वा न गृह्येत तद्ग्राह्याननुभूतिवत् ॥ ७७ ॥

स्थितयः । संविच्चेदमिति बहिर्विषयप्रकाशात्मा जायमाना दृश्यते । यदि त्वियमेवंरूपाप्यन्यविषया ज्ञानविषयेष्यते, एवं तर्हि ज्ञानाकारा संवित्तिरर्थविषयास्माभिः कस्मान्न कल्प्यते । (नचासति बाधके परगोचरत्वं भ्रान्तिरिति युज्यते कल्पयितुम् । वासना च प्राचीनज्ञानजन्मात्माश्रयः संस्कारोऽभिधीयते । नासावस्ति नास्तिकानां, नैरात्म्यसिद्धान्तात् । नापि ज्ञानमाधारो वासनायाः, क्षणिकत्वात् । नापि समनन्तरप्रत्ययो वासना, तस्य तथात्वेनाप्रसिद्धेः । असावपि स्वगोचरो न परं परगोचरतया दर्शयितुं शक्नोति । अतद्रूपत्वात् तद्रूप्यनिष्पत्त्ययोगात् । इतरथानुभवरूपतापि तस्य न स्यात् । अनुभवाकारतां ह्युत्तरस्य समनन्तरप्रत्ययो वितनुते । तत् कस्य हेतोः । स्वरूपानुरूपकार्यारम्भस्थितेः । अत एव नात्मगोचरादिदमिति परसंवेदनोत्पत्त्युपपत्तिः । परत्राहम्मानकल्पना तु भ्रान्तिः, ज्ञातृगोचरत्वादहङ्कारस्येत्युक्तमेव । न त्विह बाह्यालम्बनत्वे ज्ञानस्य किञ्चिदनुपपन्नं येनात्मगोचरतावश्यं कल्प्यत इति सिद्धं बाह्यालम्बनमेव ज्ञानमिति) ॥ ७७ ॥

यथा च ग्राह्यसंवित्तौ ग्राहकग्रहणेऽपि वा ।
ग्राह्यग्राहकसंवित्तिर्नास्त्येव स्याद् द्वयोरपि ॥ ७८ ॥
स बहिर्देशसम्बद्ध इत्यनेन निरूप्यते ।
ग्राह्याकारस्य संवित्तिर्ग्राहकानुभवादृते ॥ ७९ ॥
परं प्रति न साध्यत्वादर्थस्याकारसिद्धये ।
बहिर्देशेन सम्बन्धो न हेतुत्वाय कल्पते ॥ ८० ॥
तस्माद् बहिरितीहेदं निष्कृष्टं ग्राहकांशतः ।
संवेद्यं नीलपीतादि प्रत्यक्षादेरुदाहृतम् ॥ ८१ ॥

एवं तावदन्यतराग्रहणेऽन्यतरो न गृह्यत इत्युक्तम् । तद्वदेव द्वयोरप्यग्रहणमिति समाहृत्य दर्शयति — **यथा चेति** । अस्यार्थः — यथा ग्राह्यग्रहणे ग्राहको न गृह्यते ग्राहकग्रहणे च ग्राह्यः । एवं च द्वयोरप्यग्रहणं भवेत् । नतु ग्राहकमात्रस्य वा ग्राह्यमात्रस्य वा । पूर्वं त्वन्यतराग्रहणदृष्टान्तेनेतरस्याग्रहणमापादितम् । इदानीं समाहृत्योभयोरुच्यत इति प्रयोगभेद इति ॥ ७८ ॥

एतच्च ग्राह्यमात्रस्य ग्रहणं ग्राहकरहितं 'स बहिर्देशसम्बद्धः' इत्यादिना भाष्येणोक्तमित्याह — **स** इति । अयं च भाष्यार्थः — स एव केवलो बाह्यार्थः प्रत्यक्षमवगम्यते । न पुनर्ग्राहक इति ॥ ७९ ॥

आत्मस्थेन स्वर्थाकारो नीलादिरित्येतत्सिद्धये बहिर्देशसम्बन्धो हेतुतया लक्ष्यते, तन्नानुमन्यामह इत्याह—**परामिति** । नहि परस्य बहिर्देशो नाम कश्चित् सिद्धः योऽर्थसाकारत्वे हेतुतयोपन्यस्येत । सर्वस्य ज्ञानाकारत्वेनाभ्युपगमात् । अतो बहिर्देशस्तत्सम्बन्धश्च बौद्धं प्रति साध्य एव, न हेतुरिति ॥ ८० ॥

तस्माद् यथोक्त एव भाष्यस्यार्थ इत्याह — **तस्मादिति** । अस्यार्थः — बहिरित्यादौ भाष्ये इदंशब्देनेदं नीलमिति विकल्पस्थेन निष्कृष्टं ग्राहकांशात् प्रत्यक्षादेः प्रमाणगणस्य संवेद्यमुदाहृतं नीलादिमात्रम् । एतदुक्तं भवति । न स्वगोचरं ज्ञानं बहिःप्रकाशाद्, इदमिति

न पूर्वं ज्ञायते बुद्धिरित्यत्रैतद् वदिष्यते ।
ग्राहकस्यैव संवित्तिर्लक्ष्यते ग्रहणे क्वचित् ॥ ८२ ॥
न स्मरामि मया कोऽपि गृहीतोऽर्थस्तदेति हि ।
स्मरन्ति ग्राहकोत्पादं ग्राह्यरूपविवर्जितम् ॥ ८३ ॥
तस्मादभिन्नतायां च ग्राह्येऽपि स्मरणं भवेत् ।
ग्राहकस्मृतिनिर्भासात् तत्राप्येषैव गृह्यते ॥ ८४ ॥

परनिरूपणात् । स्वगोचरे हि नेदमिति प्रकाशो भवेत्, किन्त्वहमिति । तदिह बहिर्देशसम्बन्धोपन्यासेन परगोचरतैव संवित्तेरुच्यत इति ॥ ८१ ॥

तथा केवलग्राहकसंवित्तिरपि सत्यम् पूर्वं बुद्धिरुत्पद्यते नतु पूर्वं ज्ञायते इत्यत्रोक्तेत्याह — नेति । अत्र हि पूर्वमुत्पन्नापि बुद्धिर्न प्रागवगम्यते, किन्तु पश्चादिति वदता ग्राह्याकारविनिर्मुक्तस्यैव ग्राहकस्य संवित्तिरुक्तेति ॥ ८२ ॥

प्राग् बुद्धेरग्रहणसिद्ध्यर्थं भाष्यकारेणोक्तं 'भवति हि कदाचिदेतद् यज्ज्ञातोऽर्थः सन्नज्ञात इत्युच्यते' इति । तस्यार्थः —ज्ञातपूर्वोऽर्थः कदाचिदस्मर्यमाणोऽज्ञातवदभिधीयते । ज्ञानमात्रं तु तद्गोचरं स्मर्यते । एवं हि वक्तारो भवन्ति— अस्याः श्रुतेरर्थो मया गुरुणा व्याख्यायमानो ज्ञातः, इदानीं प्रस्मृतवानस्मि । ज्ञानं त्वेतद्गोचरं पूर्वं जातं स्मरामीति । यथा चास्या बुद्धेरग्रहणे हेतुत्वं तत्फलाभिप्रायेण परस्ताद् वक्ष्यति 'फलत्वाद् ग्रन्थवर्णने' इत्यत्र । तस्मादपि केवलं ग्राहकस्मरणाद् ग्राह्याकारविविक्तग्राहकबोधः सेत्स्यतीत्याह — नेति ॥ ८३ ॥

अभेदे तु ग्राह्यग्राहकयोर्ग्राहकवद् ग्राह्यस्यापि स्मरणं भवेदित्याह— तस्मादिति । तस्माद् ग्राहकादित्यर्थः । यतस्तु ग्राहकमात्रस्यैव स्मृत्यात्मको निर्भासो भवति न ग्राह्यस्य, अतोऽवगच्छामः यदनुभवकालेऽप्येषा बुद्धिरेव केवला गृहीता कथमन्यथा केवला स्मर्येत । तदेतदाह — ग्राहकेति । ग्राहकमात्रस्य स्मृतिनिर्भासात् कारणात् तत्र ग्राहकग्रहणकाले केवला बुद्धिर्गृह्यते इत्यर्थः ॥ ८४ ॥

तदत्यन्ताविनाभावान्नैकाकारं हि जायते ।
अन्वयव्यतिरेकाभ्यां सिद्धैवं भिन्नता तयोः ॥ ८५ ॥
ग्राह्यांशो ग्राहकांशेन गृह्यते ग्राहकः पुनः ।
गृह्येतेति न वक्तव्यं ग्राहकान्तरवर्जनात् ॥ ८६ ॥
ग्राह्यांशेनाप्यशक्तत्वान्न तस्य ग्रहणं भवेत् ।
ग्राहकत्वेन चैतस्य हीयेतैव द्विरूपता ॥ ८७ ॥
ग्राहके गृह्यमाणे च ग्राह्यमात्रप्रसञ्जनम् ।
न स्यादाकार एकश्चेदितरस्यापि नास्तिता ॥ ८८ ॥

कस्मादेवमत आह — तदिति । तत् स्मरणम् । अत्यन्ताविनाभावाद् ग्राह्यग्राहकयोरेकाकारं न जायत इत्यर्थः । तदेवमन्यतरांशान्वयेऽन्यतरविवेकात् सिद्धो ग्राह्यग्राहकयोर्भेद इत्याह — अन्वयेति ॥ ८५ ॥

अत्र चोदयति— ग्राह्येति । अयमर्थः— यदेतद् भवता ग्राह्यग्राहकयोरभेदमभ्युपेत्यान्यतरग्रहणेऽन्यतरग्रहणमापाद्यते, तदयुक्तम् । नहि यद् यतो न भिद्यते तदवश्यं तद्ग्रहणे गृह्यते । नहि शब्दादभिन्ना नित्यानित्यादयो धर्माः शब्दग्रहणे गृह्यन्ते । अभेदेऽपितु यस्यांशस्य यदा योग्यता स तदा गृह्यते नेतर इति किमनुपपन्नम् । ग्राह्यांशश्च ग्राहकांशसद्भावाद् ग्रहणयोग्यः, न ग्राहकांशः, तदतिरिक्तग्राहकान्तराभावात् । अतो न ग्राह्यग्रहणे ग्राहकग्रहणप्रसक्तिरिति ॥ ८६ ॥

स्यादेतत् । ग्राह्यांश एवास्य ग्राहको भविष्यतीति । तन्न, कर्मणः कर्तृभावानुपपत्तेरित्यभिप्रायेणाह — ग्राह्येति । अपिच ग्राह्यग्राहकभावमेकस्य ज्ञानस्याभ्युपेत्य भवतोभयग्रहणमापाद्यते । यदि च ग्राह्यांशोऽपि ग्राहको भवेद् द्वैरूप्यमेव हीयेत । ग्राहकैकस्वभावत्वापत्तेरित्याह — ग्राहकेति ॥ ८७ ॥

अथवा ग्राह्यांशस्तावद् ग्राह्य एव, यदि च ग्राहको गृह्येत, ततो ग्राह्यैकात्मत्वं भवेदित्याह — ग्राहक इति । अत्यल्पं चेदमस्माभिरुच्यते उभयग्रहणे एकरूपतेति । सापि तु न सिध्यत्येव । ग्राह्याभावे ग्राहकाभावात् तदभावे ग्राह्याभावादित्याह — न स्यादिति ॥ ८८ ॥

उद्भवाभिभवाभ्यां च ग्राह्याग्राह्यत्वदर्शनम् ।
यथा दीपप्रभादीनां रूपमात्रोपलम्भनम् ॥ ८९ ॥
दिवा चाग्नेः समीपस्थैः स्पर्श एवोपलभ्यते ।
गन्धवद्द्रव्यवृत्तौ च गन्धस्यैवोपलम्भनम् ॥ ९० ॥

एवं तावद् ग्राहकान्तरवर्जनाद् ग्राहको न गृह्यत इत्युक्तम् । अपि चोद्भवाभिभवौ भावानां ग्रहणाग्रहणकारणतया सिद्धौ । अतो य एवांशो यदोद्भूतो भवति, तदा स एव गृह्यत इति न नोपपन्नमित्याह — उद्भवेति । अत्रैव दृष्टान्तमाह — यथेति ॥ ८९ ॥

रात्रौ हि दीपप्रभादीनां रूपमात्रमुपलभ्यते, न स्पर्शः । अभिभूतत्वादित्याह — दिवेति । स्पर्शरूपयोश्च नक्तन्दिवमभिभवे चन्द्रमसः शीतस्पर्शः प्रबलं च तारणं तेजः कारणमिति । एवं तावदभिभवे कारणान्तरसन्निधानादभिभूतस्याग्रहणमुक्तम् । इदानीं स्वयमपि सूक्ष्मत्वादभिभूतं न गृह्यते इत्युदाहरणेन दर्शयति — गन्धवदिति । यदा खलु वायुना प्रेर्यमाणाः सूक्ष्मा द्रव्यभागा घ्राणेन्द्रियगोचरा भवन्ति, तदा तेषु वर्तमानेष्वपि गन्धमात्रमेवोपलभ्यते न द्रव्यमभिभूतत्वात् । सा पुनरियं द्रव्यसङ्क्रान्तिरयुक्तेति मन्यन्ते । यदि खलु तिलादिषु चम्पकादिद्रव्यमेव सङ्क्रामेद् एवं मृद्यमानेषु तेषु चम्पकगन्धो नश्येत् पुष्पस्य इव । चम्पकादिद्रव्येषु मृद्यमानेषु तद्गन्धस्य नाशो दृष्टः । एवं तिलस्थकुसुमावयवमर्दनेऽपि भवेत् । यः खलु स्थूलेष्वेव कुसुमेषु मृद्यमानेषु नश्यति, स कथं सूक्ष्मावयवस्थं न नङ्क्ष्यतीत्युत्प्रेक्ष्यते । अतश्चम्पकादिसान्निधानाद् गन्धान्तरमेव तिलादिषु जायते इति मन्यते । एवमप्स्वग्निसंयोगाद् गुणान्तरागमो वक्तव्यः । नाग्निसङ्क्रान्तिरनुपलम्भनात् । स्पर्शमात्रमेव हि तत्राग्नेर्वयमुपलभामहे, नाग्निम् । अपिचायं तपस्वी द्रव्यसङ्क्रान्तिमातिष्ठमानः सुराघ्राणे पतेत् । सुरात्रसरेणूनां घ्राणोदरेण वक्त्रसञ्चारात् । अत आत्मवधायैवेयं द्रव्यसङ्क्रान्तिराश्रिता भवेत् । अत्राभिधीयते — न तावत् स्वाश्रयपरित्यागेनाश्रयान्तरं गन्धो गच्छतीति सम्भावयामः । गुणानामस्वतन्त्रत्वात् । आश्रयपारतन्त्र्यमेव हि तल्लक्षणम् । गुणान्तरमपि न तावत् सन्निहितेष्वाकाशानिलादिषु कुसुमसम्प-

न गुणान्तरसंवित्तिर्यथाग्राभिभवात् तथा ।
नाकारान्तरसंवित्तिर्ग्राह्यग्राहकबुद्धिषु ॥ ९१ ॥
ग्राह्यादनन्यभूतोऽपि कश्चिद्धर्मो न चोपलभ्यते ।
नित्यानित्यादयो धर्माः शब्दादिग्रहणे यथा ॥ ९२ ॥
अभेदं वाभ्युपेत्यायं प्रसङ्गो यदि गीयते ।

र्काज्जायते इति वाच्यम् । तेषु गन्धस्यात्यन्ताभावात् । नापि नासिकाया-मेव गन्धान्तरं जायत इति वक्तव्यम् । अतिदूरत्वेन कुसुमासंसर्गात् । अतः कुसुमावयवा एव दृष्टतद्गन्धसम्बन्धा वायुना प्रेर्यमाणा घ्राणोदरं यावदागता गृह्यन्त इति प्रमाणवती कल्पना । योऽपि मर्दने गन्धनाश उक्तः, सोऽप्य-युक्तः । सूक्ष्मा हि तत्र कुसुमावयवाः सङ्क्रान्ताः । न ते मृद्यन्ते । अतो गन्धो न नश्यतीत्युक्तम् । योऽपि गन्धाघ्राणे सुरापानदोषोऽभिहितः, नासौ । पानं हि सुराया निषिद्धं, नाघ्राणम् । अल्पस्तु तदाघ्राणे दोषः । नच सुरां जिघ्रन् पिबतीत्युच्यते । अतो न सूक्ष्मावयवानां नासिकासन्नि-धानमात्रात् सुरापानापत्तिरिति सिद्धं गन्धवदेव द्रव्यं तत्र वर्तते सूक्ष्म-त्वात् तु नोपलभ्यत इति ॥ ९० ॥

एवं दृष्टान्तेष्वभिभूतस्याग्रहणमुक्त्वा प्रकृते योजयति — नेति । यथा दीपप्रभादिषु गुणान्तरसंवित्तिर्नास्ति, यथा च गन्धवद्द्रव्यवृत्तौ द्र-व्यस्य, एवं ग्राह्यांशबुद्धौ ग्राहकांशबुद्धौ वाकारान्तरसंवित्तिर्न भविष्यतीति ॥ ९१ ॥

इदं चापरं ग्राह्यादभिन्नमेव न गृह्यत इत्याह — ग्राह्यादिति । अस्ति कश्चिद् धर्मभेदः यो ग्राह्यात् शब्दादभिन्नोऽपि नोपलभ्यते नित्यत्वा-दय इव शब्दग्रहण इति ॥ ९२ ॥

इदं तु चिन्तनीयम—कस्येदं प्रत्यवस्थानं 'ग्राह्यांशो ग्राहकांशेने'-त्यादि । न तावद् बौद्धस्य । स ह्यविभक्तस्यैव बुद्ध्यात्मनो ग्राह्यग्राहक-संवित्तिभेदभिन्नस्य ग्रहणमातिष्ठते । यदाह —

"अविभक्तोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिह लक्ष्यते ॥"

एकस्मिन् गृह्यमाणेऽशे न गृह्येतापरः कथम् ॥ ९३ ॥
तस्मात् यत् स्याद्यदा योग्यं तस्यैव ग्रहणं तदा ।
द्वयं च त्वदुपन्यस्तं शक्त्यभावान्न गृह्यते ॥ ९४ ॥
कुतोऽयमेकवस्तुत्वे योग्यायोग्यत्वसम्भवः ।
उद्भवाभिभवात्मत्वं कथं चैकस्य कल्पितम् ॥ ९५ ॥

इति । अतस्त्याकारस्यैव ज्ञानस्यानुभवात् कथमन्यतरांशाग्रहणेन प्रत्यवतिष्ठते । भ्रान्तिकल्पितं तु ग्राह्यादिविभागं बौद्धा मन्यन्ते, न त्वप्रतिभानमेव तेषाम् । अतः कस्येदं प्रत्यवस्थानमिति । सत्यम् । नात्र बौद्धश्चोदयिता । पार्श्वस्थवचनमिदम् । एवं हि कश्चिदत्र पार्श्वस्थो वदति — किमिदं ग्राह्यग्राहकभावमभ्युपेत्यैव भवता द्विरूपग्रहणमापाद्यते । नहि ग्राहकस्य ग्राहकान्तरं विद्यते तद्ग्रहणे च द्वैरूप्यहानिः तच्चाभ्युपेतमेवेति कथं तद्विपरीताभिधानं मीमांसकस्य । दृष्टा चाभेदेऽप्युद्भवाभिभवादिकृता ग्रहणाग्रहणव्यवस्थेति । स एवेदानीं बौद्धाभिप्रायेणाह — अभेदमिति । ग्राह्यग्राहकयोर्हि पारमार्थिको भेदो नेष्यत एव । एकरूपस्यैव तु बुद्ध्यात्मनस्तथा प्रकाशाभ्युपगमात् । अतो योऽयं बुद्ध्यात्मनः प्रकाशः स एव तयोरिति किमिति तद्ग्रहणे न गृहीतं भवति । अपिच, अभेदमभ्युपेत्यास्मान् प्रति प्रसङ्गो गीयते कथमभेदे ग्राह्यग्राहकव्यवस्थेति । तच्चायुक्तम् । कथं ह्यभिन्नस्य तत्त्वस्य किञ्चिदगृहीतं नाम सम्भवति । यदि त्वभेदो नाभ्युपेयते, नायं प्रसङ्गो गातुं शक्यते । भिन्नत्वादेवाग्रहणोपपत्तेरिति ॥ ९३ ॥

पूर्वपरिचोदनामिदानीमुपसंहरति — तस्मादिति । यद्धि ग्रहणयोग्यं तद् गृह्यते यस्य च ग्राहकसद्भाव उद्भवो वा तद् ग्रहणयोग्यम् । अतः पूर्वोपन्यस्तस्य ग्राह्यग्राहकात्मनो द्वयस्य किञ्चिदेव ग्रहीतुं शक्यं नेतरदिति ग्रहणशक्त्यभावान्नोभयं चोदनीयमिति ॥ ९४ ॥

अत्र परिहारमाह — कुत इति । अयमभिप्रायः — न तावद्भ्रान्तिकल्पितो ग्राहकादिविभागः, बाधविरहात् । तथापि वा भ्रान्तित्वे संविद्रूपेऽपि तत्प्रसङ्गादभावात्मतापत्तिः । तदयं वास्तवो ग्राह्यादिविभागो नैकस्मिन्नद्वितीये ज्ञानात्मनि सम्भवतीति प्रथममुक्तं 'नैतदस्ती'त्यादिना ।

एकांशाभिभवे च स्यादितराभिभवोऽपि ते ।
तथा तस्याभिभूतत्वाद् ग्राह्यत्वं नच युज्यते ॥ ९६ ॥
अयोग्यता विकल्प्यैवं दृष्टान्ता येऽत्र कीर्तिताः ।
रूपादिभेदात् तत्र स्यादुद्भवाभिभवाद्यपि ॥ ९७ ॥
यदाप्येकान्ततो भेदो रूपादेर्न परस्परम् ।
तदापि द्रव्यरूपस्य परिणामस्तथा तथा ॥ ९८ ॥

पुनश्च 'अभिन्नत्वं यदा चेष्टमि'त्यादिना एकस्यैव द्वैरूप्यमङ्गीकृत्योभयग्रहणप्रसक्तिरापादिता । तत्र नैष परिहारो घटते अयोग्यत्वादभिभूतत्वादन्यन्न गृह्यते इति । नह्येकस्मिन् ज्ञानात्मनि योग्यायोग्यत्वविभाग उद्भवाभिभवात्मत्वं वा सम्भवति । अतोऽवश्यमभिन्नत्व इष्टेऽन्यतरसंवित्तौ द्वयाकारग्रहणेन भवितव्यमिति ॥ ९५ ॥

किं पुनरेकस्योद्भवाभिभवात्मत्वं न सम्भवतीत्यत आह — एकेति । एकं हि ग्राह्यग्राहकाभिधानं तत्त्वम् । तत्र यदि ग्राहकांशोऽभिभूतः कथं तदभिन्नो ग्राह्यांशो नाभिभूत इति शक्यते वक्तुं, विरुद्धधर्माध्यासेन भेदापत्तेरिति । एवं चोभयाभिभवे ग्राह्यांशस्यापि ग्राह्यत्वं न स्यादिति न किञ्चित् तत्त्वं सम्भवेदित्याह — तथेति ॥ ९६ ॥

एवमयोग्यतापि विकल्पनीया किमुभयमयोग्यमेकं वा । यद्युभयं न किञ्चिद् गृह्यत इति शून्यतैवापद्येत । यदि त्वेकमयोग्यमितरन्नेत्युच्यते तदेकत्राद्वितीये नोपपन्नमित्याह — अयोग्यतेति । ये पुनरत्र दृष्टान्ता उक्ताः प्रदीपप्रभादिषु रूपादयः, तत्रोद्भवाभिभवाभिधानं युज्यते । रूपादीनां परस्परभेदेन तत्रोद्भवाभिभवोपपत्तेः । भिन्नं हि स्पर्शादूपं, तद्रात्रौ रूपोद्भवेऽभिभूतस्पर्शो न गृह्यत इति किमनुपपन्नम् । तदेतदाह — दृष्टान्ता इति । आदिशब्दाद् योग्यायोग्यभेदोऽपीति । स्वरूपभेदानुविधाय्युद्भवाभिभवादिभेदोऽपीत्यर्थः ॥ ९७ ॥

ननु नास्ति रूपादीनां पारमार्थिको भेदो महान् खल्वयं क्लेशः यद् द्रव्यादेव तेषां भेदोऽभिधीयते । परस्परभेदास्तु क्लेशतरेणोपपाद्यन्ते । अत एकमेव द्रव्यादिरूपं ग्राहकभेदाद् रूपादिभेदभिन्नमाभासते मुखमिवादर्शभेदा-

अभिन्नत्वेऽपि न ग्राह्यमिति यच्चाब्रवीद् भवान् ।
कृतकत्वादिधर्माणां धीभेदेऽनन्यता कथम् ॥ ९९ ॥
नह्यन्यत् प्रत्ययादस्ति भिन्नाद् ग्राह्यस्य भेदकम् ।
नचेयत्तैव भेदस्य देशतो मूर्तितोऽपि वा ॥ १०० ॥

दिति मन्यन्ते । अतस्तत्राप्यभेद एवोद्भवादिव्यवस्था दृष्टेति न कश्चिद् विशेषः । अत आह — अदाचीति । अयमभिप्रायः — यदि तावदस्मत्सिद्धान्तो रूपादावाश्रीयते, ततस्ते द्रव्यात् परस्परतश्च भिद्यन्त एव । अथ मतान्तरेण, तथापि न तावदेकस्योद्भवाभिभवावपि सिध्यतः । अतोऽस्मन्मतेऽपि हि यथैकस्मिन्नेव मृद्रूपं घटशरावादिपरिणामभेदभिन्नमेवमेकमेव द्रव्यरूपं रूपादिभिः परिणामभेदैर्भिद्यत इत्याश्रयणीयम् । यत्तु एकस्यैव द्रव्यरूपस्य ग्राहकभेदाद् भेद इति, तदतिस्थवीयः । युक्तं हि मुखेषु प्रत्यभिज्ञानादौपाधिकभेदाश्रयणमादर्शभेदाश्रयणेन । न त्विह तथेति वरं परिणामवाद एव । तत्र च नैकस्योद्भवादिव्यवस्था लोके दृश्यते । यस्त्वयमाकस्मिको रूपस्य स्पर्शात्मना परिणामः पुनस्तस्यैव रूपात्मना, स निर्निमित्तो न वक्तुमुचितः । एकस्यैव च द्रव्यस्यैकं रूपं हित्वा गुणान्तरोद्भवेनाभिभूतं यद् नक्तं पुनर्बुध्यते, तन्नोपपन्नम् । परिणामे नहि दध्यात्मना परिणतं क्षीरं पुनः क्षीरात्मना परिणतं दृश्यते । अतः स्वभावादेव द्रव्यात् परस्परं च रूपादयो भिद्यन्ते इत्येतदेव साम्प्रतम् । यथा चासत्यपि देशादिभेदे भेदः सिध्यति तथानन्तरमेव वक्ष्यति । तदुपेक्ष्यैव तावत् परिणामवादमभिदध्महे नैवमप्येकस्योद्भवाभिभवाविति ॥ ९८ ॥

यदपीदमपरमुक्तम् ग्राह्यादभिन्नमपि किञ्चिन्नानुभूयते शब्दादौ नित्यत्वादीति, तदनुभाष्य दूषयति — अभिन्नेति । यथा हि बुद्धिभेदनिबन्धनो रूपादीनां भेदः, एवं कृतकत्वादिधर्माणां शब्दाद् धर्मान्तरेभ्यश्च धीभेदकृतं भेदमभिदधाना न दण्डेन वारयितुं शक्या इति ॥ ९९ ॥

किं पुनरेषां भेदे कारणमत आह — नहीति । द्रव्यगुणकर्मण्येव तावद् भिद्यन्त इति किमत्र कारणमन्यदतः प्रत्ययभेदात् । स चायमविशिष्टः कृतकत्वादिधर्मभेदेऽपीति तत्कारणकस्तेषां भेद इति । ननु

कारकाणां हि सम्बन्धः कार्यैः कृतकतोच्यते ।
विभागोऽवयवानां च भवेत् क्वचिदनित्यता ॥ १०१ ॥
बुद्ध्यादेरात्मरूपादिस्थानं नाशित्वमुच्यते ।
नित्यत्वं सर्वदा सत्ता वस्तुत्वं सैव कीर्त्यते ॥ १०२ ॥
प्रमाणज्ञानसम्बन्धः प्रमेयज्ञेयतोच्यते ।
सर्वत्र चात्र भिन्नत्वमस्ति केनचिदात्मना ॥ १०३ ॥

नामीषां देशभेदो वा मूर्तिभेदो वा दृश्यते । अतः कथं ते भिन्नाः, अत आह — नचेति । न नः पारिभाषिको भावानां भेदः । संविदेकशरणा हि वयम् । सा च भिन्ना भेदमभिन्ना चाभेदं व्यवस्थापयति । न तु देशतो मूर्तितो वा भेद इति इयत्तैव परिभाष्यत इति ॥ १०० ॥

कीदृशी पुनरियं कृतकता, या बुद्धिभेदभिन्नावगम्यते अत आह — **कारकाणामिति** । योऽयं कार्यद्रव्याणां घटादीनां कारकैः कुलालादिभिः सम्बन्धः, सा कृतकता । 'कृत्तद्धितसमासेषु सम्बन्धाभिधानं त्वतल्भ्यामि'ति स्मृतेः । सेयमीदृशी कृतकता कथं शब्दादभिन्नेत्युच्यते । अन्यो हि तदा शब्दो गकाराद्याकारः । अन्या चेयं कृतकता तस्य तत्कारकैः सम्बन्ध इति । अनित्यता तु सावयवानां घटादीनां तावदवयवविभागात्मकेत्याह — **विभाग इति** ॥ १०१ ॥

निरवयवानां तु बुद्ध्यादीनामवयवविश्लेषात्मकानित्यत्वासम्भवाद् योऽयमात्मनोऽपरिणामरूपेणावस्थानं तन्नाशित्वमित्याह — **बुद्धीति** । **नाशित्वमनित्यतेति** नित्यतायाः स्वरूपं दर्शयति — **नित्यत्वमिति** । **वस्तुत्वस्य सत्तातः** केचिद् भेदं मन्यन्ते, तत् तु नेष्यत इत्याह — **वस्तुत्वमिति** । **सत्तैव वस्तुत्वं नापरं किञ्चिदित्याकृतिग्रन्थे** वक्ष्यत इति ॥ १०२ ॥

प्रमेयताज्ञेयते अपि प्रमाणज्ञानसम्बन्धात्मिके शब्दाद् भिन्ने एवेत्याह — **प्रमाणेति** । ज्ञानत्वं प्रमाणेतरज्ञानसाधारणमिति भेदेन ज्ञानसम्बन्धप्रभाविता ज्ञेयतोक्तेति । सर्वत्र चात्रासत्यपि देशादिभेदावसाये केनापि **स्वसंवेद्येनात्मना भेदोऽवसीयत** इत्याह — **सर्वत्रेति** ॥ १०३ ॥

तस्माद् यथैव रूपादेर्देशभेदादिभिर्विना ।
बुद्धिभेदेन भेदोऽस्ति तथैवात्र प्रतीयताम् ॥ १०४॥
अत्यन्तभिन्नतास्माभिर्नैव कस्यचिदिष्यते ।
सर्वं हि वस्तुरूपेण भिद्यते न परस्परम् ॥ १०५॥
सर्वं च कृतकत्वादि क्रियाहेत्वाद्यपेक्षया ।
गृह्यते तदसंवित्तावभेदेऽपि न गृह्यते ॥ १०६ ॥
ज्ञाने नैवंविधो भेदो नापेक्षान्यत्र विद्यते ।
परस्परेण चापेक्षा स्याच्चेत् सन्निहितश्च सः॥ १०७॥

अतो यथैवास्मन्मते बुद्धिभेदमात्रप्रभावितो रूपादीनां भेद इष्यते असत्यपि देशादिभेदे, तथैवैतेष्वपि शब्दादिधर्मभेदेषु भेदोऽस्तीत्युपसंहरति — **तस्मादिति** ॥ १०४ ॥

नन्वेवमपि तावदत्यन्तभेदो नैषामिष्यते, कथञ्चिद् भेदात् । अतः सिद्धमभिन्नस्योद्भवादय इति । न सिद्धम् । अत्यन्तभिन्नता हि नास्माभिः कस्यचिदिष्यते, सर्वस्य सदाद्यात्मनाभेदात् । अस्ति तु केनापि रूपेण भेद इति तदाश्रयणेनैव विरुद्धधर्मसम्बन्धः समाधीयते । नचैतद् बौद्धसिद्धान्ते ज्ञानस्य सम्भवतीत्यभिप्रायेणाह — **अत्यन्तेति** ॥ १०५ ॥

किंपुनः कारणमभिन्नस्यापि शब्दात् कृतकत्वादेरग्रहणमिति । भेदस्यापि विद्यमानत्वादितिचेद्, हन्तैवमभेदोऽपि वास्तव इति किन्न शब्दग्रहणे गृह्यते, अत आह— **सर्वं चेति** । यदेतत् कृतकत्वादिधर्मजातमुपन्यस्तं तत् सत्यपि शब्दाभेदे क्रियाहेत्वाद्यपेक्षया गृह्यते । नहि वस्त्वस्तीत्येव ग्रहणं भवति । अपितु ग्रहणेतिकर्तव्यतासापेक्षम् । कृतकत्वस्य च क्रिया कुलालादिव्यापारः । तद्धेतुश्च कुलालादिः । जिघृक्षा च ग्रहणकारणम् । अतस्तदसंवित्तावभेदेऽपि शब्दान्न ग्रहणं कृतकत्वादीनाम् । अत्यन्ताभेदे तु ग्रहणादिव्यवस्था न सिध्येत् । नचासावस्माभिरिष्यत इति ॥ १०६ ॥

नचायं धर्मधर्मिकृतो भेदो ज्ञाने सम्भवति । अद्वितीयत्वात् तस्य । नापि क्रियाहेत्वादितुल्यमपेक्षणीयान्तरमस्ति यत्कृता ग्रहणाग्रहणव्यवस्था

ननु ग्राहकमित्येवं ग्राह्यमित्यपि वा मतिः ।
नीलादिग्रहणे नास्तीत्यपेक्षा कथमुच्यते ॥ १०८ ॥
मा भूदेवं तथाप्यत्र द्व्याकारं ग्रहणं भवेत् ।
एवं चागृह्यमाणे वा ज्ञाने द्व्याकारता कथम् ॥ १०९ ॥
उत्तरोत्तरविज्ञानविशेषाद् वा प्रकल्प्यते ।
ग्राहकाकारसंवित्तिः स्मरणाच्चानुमानिकी ॥ ११० ॥

भवेत् । ज्ञानातिरिक्तवस्त्वन्तराभावादित्याह — ज्ञान इति । अन्यत्रानपेक्षेत्यसहमानः प्रत्यवतिष्ठते — परस्परेणेति । अयमभिप्रायः अपेक्षार्थ एव तावद् दुःप्रतिपादः । अभिन्ने तत्त्वे किं केनापेक्ष्यते । उपेत्यापि ब्रूमः । य एव कश्चिदपेक्षिष्यते ग्राहको वा ग्राह्यो वा, स एव सन्निहितः । अत्यन्ताभेदात् तयोः । अतो नाग्रहणकारणमन्यतरस्यापीति द्व्यात्मकग्रहणप्रसङ्गः ॥ १०७ ॥

अत्र चोदयति — नन्विति । यदेतदपेक्षामभ्युपेत्य भवतोच्यते सन्निहित इति, तदयुक्तम् । नहि नो नीलादिग्रहणे ग्राह्यमिदं ग्राहको वायमिति बुद्धिरुत्पद्यते । अतो ग्राह्यग्राहकत्वेनानवगमात् कथं तयोः सन्निधानमपेक्षा कथमुच्यत इत्यपेक्षाभ्युपगमो न युक्त इत्यर्थः ॥ १०८ ॥

परिहरति — मा भूदिति । यद्यपि ग्राह्योऽयं ग्राहकोऽयमिति वा न विकल्प्यते, तथापि तावदेकात्मनः सर्वेणैवात्मना गृहीतत्वाद् यदेवापेक्षितं तदेव लभ्यत इति युक्तमेव वक्तुम् । अन्योऽयं ग्राह्योऽयं ग्राहकोऽयमिति शब्दविकल्पः । अन्यच्च ज्ञानरूपम् । तच्चेत् समग्रं गृहीतं, किमपरमपेक्षणीयं यदग्रहणादुभयांशबोधो न भवेदिति । एवमपि चेदुभयात्मकं न गृह्यते, कथं द्व्यात्मकं भविष्यति । अतः सिद्धं न द्व्यात्मकं ज्ञानमित्यभिप्रायेणाह — एवमिति ॥ १०९ ॥

एवंतावद् यदुक्तं सत्यपि द्व्यात्मकत्वे न द्व्यात्मकं गृह्यत इति, तन्निराकृतम् । इदानीं द्व्याकारमेव ज्ञानं गृह्यत इति यद् बौद्धैरुक्तं तद् दूषयितुमुपन्यस्यति — उत्तरोत्तरेति । एवं हि बौद्धा मन्यन्त — स्वसंवेद्यज्ञानस्य द्विरूपता । तद्धि जानामि घटमित्येवोत्पद्यते । तत्र जानामीति

एकाकारं किल ज्ञानं प्रथमं यदि कल्प्यते।
ततस्तद्विष्वाप्यन्या तद्वदेव मतिर्भवेत् ॥ १११ ॥
घटविज्ञानतज्ज्ञानविशेषोऽतो न सिध्यति।
ग्राहकाकारसंवित्तौ त्वाकारप्रचयो भवेत् ॥ ११२ ॥
जायते पूर्वविज्ञानं ह्याकारं तत्र यत् परम्।
तस्यात्मीयश्च पूर्वौ च विषयस्थावुपप्लुतौ ॥ ११३ ॥

ग्राहकांशः। घटमिति च ग्राह्यांशः। तदेवं स्वसंवेद्येऽपि ज्ञानस्य द्विरूपत्वे यो नाम मूढो न सम्प्रतिपद्यते, तत्प्रतिबोधनार्थमुत्तरोत्तरविज्ञानविशेषनिर्देशो बौद्धैरभिमतः। एवं हि निर्दिशन्ति घटज्ञानं जानामीति। तदिह पूर्वेण विषयाकारेण ग्राहकाकारेण च रूपितो द्वितीयज्ञानस्य ग्राहकाकारः प्रचितो निर्भासते। तदाद्यस्य द्विरूपत्वे घटते। यदि त्वाद्यं ग्राह्याकारमात्रं वा ग्राहकाकारमात्रं वा भवेत्, ततो द्वितीयाद्यपि तद्गोचरं तदाकारमेव भवेत्। तत्राद्यस्य ग्राह्यमात्रत्वे द्वितीयमपि ज्ञानं घट इत्येवोत्पद्यते। तत्र शब्दत्रयेण निर्देशो नोपपद्येत घटज्ञानं जानामीति। नह्यनातुराणामनर्थको नाम निर्देशो भवति। एवं च तृतीयादिज्ञानेषु चतुष्टयादिभिर्निर्देशो दर्शयितव्यः। तस्मादुत्तरोत्तरज्ञानविशेषादवगम्यते अस्ति ग्राहकाकारसंवित्तिरपीति। यदपि चेदमपरं व्याकारवेदने कारणमुक्तं—

"स्मृतेरुत्तरकालं च नह्यसावविभावितः।"

इति। यथा खल्वयं स घट इति ग्राह्यं स्मरति, एवं घटज्ञानमज्ञासिषमिति जानातिवाच्यं ग्राहकांशमपि। नचानवगतपूर्वार्थविषया स्मृतिः सम्भवतीति पूर्वानुभवप्रतिबन्धात् स्मरणादानुमानिकी पूर्वं ग्राहकाकारसंवित्तिः कल्प्यत इत्याह— स्मरणादिति ॥ ११० ॥

तदेव प्रपञ्चयति— **एकाकारमिति सार्धेन**। इदं च प्रागेव व्याख्यातमिति। यदि तु ग्राहकाकारो गृह्यते इत्याश्रीयते, तदाकारप्रचयदर्शनमुपपन्नं भवेदित्याह— ग्राहकेति ॥ ११२ ॥

कथमुपपन्नमित्यत आह— **जायत** इति। पूर्वं हि घटं जानामीति ज्ञानं ग्राह्यग्राहकाकारम्। तत्र तस्मिन्नेव विषयभूते। यत् परं घटज्ञानं जानामीति ज्ञानम्। तस्यात्मीयश्च ग्राहकाकारः। पूर्वौ च स्वविषयभूतप्राप्य-

परेष्वाकारवृद्ध्यैवं पूर्वेभ्यो भिन्नता तथा ।
ग्राह्यवत्स्मरणात् पश्चात् संवित्तौ ग्राहकः पुरा ॥
न तावदेवमाकारान् पश्यामः प्रचयान्वितान् ।
विषयव्यपदेशाच्च नर्ते ज्ञानान्निरूपणम् ॥ ११५ ॥

ज्ञानस्थौ ग्राह्यग्राहकाकारावुपप्लुतौ भवतः । एवं त्र्याकारवेदनमुपपन्नं भवतीति ॥ ११३ ॥

अनेनैव प्रकारेण तृतीयादिष्वपि ज्ञानेष्वाकारवृद्ध्या पूर्वपूर्वेभ्यो भिन्नता सिध्यति । इतरथा तु पूर्वस्य केवलग्राह्याकारत्वे स्वाकारसमर्पणेन विषयभावादुत्तरमपि तत्सदृशं घटात्मकमेव भवेदित्ययुक्तम् । एवं केवलग्राहकाकारत्वे पूर्वस्योत्तरस्यापि तादृप्यान्न वैलक्षण्यं सिध्येत् ।

"निराकारत्वपक्षेऽपि तुल्यतैव प्रसज्यते ।
निराकारत्वसामान्यात् प्राचीनोत्तरसंविदोः ॥"

इत्यभिप्रायेणाह — परेष्विति । एवं तावदुत्तरोत्तरविज्ञानविशेषादित्येतत् प्रपञ्चितम् । स्मरणाच्चानुमानिकीत्येतदिदानीं प्रपञ्च्यते — ग्राह्येति । इदं च प्रागेव व्याख्यातमिति ॥ ११४ ॥

आकारप्रचये तावत् परिहारमाह — नेति । अयमर्थः — नोत्तरोत्तरविज्ञानेषु प्रचयान्विता आकारा दृश्यन्ते, नीलाद्याकारमात्रप्रतिभानात् । सर्वदा हे नो विषय एवेदमिति बहिर्निर्भासते । कदाचिदेव तूद्भूतजिज्ञासस्यानाकारज्ञानप्रतिभानमिति वर्णितमसकृत् । अतो न ज्ञानारूढमाकारद्वयं दृश्यत इति संवित्प्रमाणकमहं नीलमित्यनवगतेः । कस्तर्हि घटं जानामीति जानात्यर्थः । नावश्यं विषयबोधेषु जानातिः प्रवर्तते । घटोऽयमित्येव प्रतीतेः । यदा तु ज्ञानमेव जिज्ञासितं भवति तदार्थस्य ज्ञाततावशेन ज्ञानमपि प्रतीयेत । तत्र चायं जानातिप्रयोगः । न चैतावता ज्ञानमेव द्व्याकारं भवति, विदिते बहिर्विषयाकारे पृथगेवेदमनाकारज्ञानमिति । यद्यनाकारस्यैव ज्ञानस्य संवेदनं, कथन्तर्हि नीलाकारं पीताकारं ज्ञानमिति व्यपदेशोऽत आह — विषयेति । अयमभिप्रायः — न तावज् ज्ञानमाकारवत्तया दृश्यते, बहिराकारत्ववेदनादित्युक्तम् । यस्तु नीलाकारं ज्ञानमिति व्यपदेशः, न तेनाकारवत्ता ज्ञानस्य सिध्यति । विषयो हे नीलादिर्व्यपदेशभाजनम् । तद्व्यपदेशेनैव च ज्ञानं व्यपदिश्यते न तु तन्नीलम् ।

तस्माज् ज्ञानात्मनैकत्वे ग्राह्यभेदनिबन्धनः ।
संवित्तिभेदः सिद्धोऽत्र किमाकारान्तरेण नः ॥ ११६ ॥

निराकारत्वसाम्येऽपि यथाकारवतां ध्रुवम् ।
भेदः स्वाभाविकस्तद्वज्ज्ञानानां किन्न सिध्यति ॥

स्मृतेरुत्तरकालं चेत्येतन्मिथ्यैव गीयते ।
तदैव ह्यस्य संवित्तिरर्थापत्त्योपजायते ॥ ११८ ॥

कस्य हेतोः परव्यपदेशेन व्यपदिश्यत इति चेद्, न । तं विना व्यपदेष्टुमशक्यत्वात् । नहि तद्व्यपदेशमन्तरेण निरूपयितुं शक्यमीदृशं नामेदं ज्ञानमिति, स्वयमनाकारत्वात् संविदामिति ॥ ११५ ॥

यत्तु निराकारत्वपक्षे सर्वसंविदां तुल्यतैव प्रसज्यत इत्युक्तं, तदयुक्तम् । अनाकारत्वेऽपि ग्राह्यभेदप्रमाणकत्वाद् भेदस्य, ग्राह्या हि विषयाः संवित्तौ प्रमाणम् । ते च भिन्ना दृश्यमाना भिन्ना एव संवित्तीरवस्थापयन्तीति । अतस्तद्भेदसिद्धये तत्समवेताकारान्तराभ्युपगमो न युक्त इत्याह — **तस्मादिति** । ग्राह्यभेदनिबन्धनस्तत्प्रमाणक इत्यर्थः ॥ ११६ ॥

नन्वस्तु ग्राह्यभेदो भेदे प्रमाणम् । अनाकाराणां तु केनात्मना भेद इत्येव दुष्प्रतिपादमत आह — **निराकारत्वेति** । अयमभिप्रायः — किमिदमनाकारत्वं संविदाम् । यदि निस्स्वभावत्वं, तन्नेष्यते विषयवशोन्नीयमानप्रकाशस्वभावत्वात् । अथ नीलाद्याकारविरहः, न । आकाशकालात्मदिक्कर्मसु तदभावेऽपि भेदाभ्युपगमात् । अतो यथा नीलाद्याकारा एव भावा आकारवत्त्वेनाभिन्ना अपि परस्परेण भिन्ना भासन्ते, एवमनाकारत्वेनाभिन्नान्यपि ज्ञानानि ग्राह्यभेदोन्नीयमानेनात्मना भेत्स्यन्ते स्वभावादेवेति ॥ ११७ ॥

'स्मरणाच्चानुमानुकी'ति यदुक्तं तदिदानीमुपन्यस्य दूषयति — **स्मृतेरिति** । मिथ्यैवैतद् बौद्धैर्गीयत इत्यर्थः । कथं मिथ्या अत आह — **तदैवेति** । तदैव खल्विदं ग्राहकाकारं ज्ञानं संवेद्यते । घटो हि तत्र स्मर्यते । तत्स्मरणान्यथानुपपत्त्या च तत्कारणभूतं ज्ञानमर्थापत्त्या कल्प्यते । नूनं मया घटो ज्ञातः, कथमन्यथा स्मर्यते । तत्रैव चार्थापत्तिवेद्ये ज्ञानेऽज्ञासिषमिति पदप्रयोगः, नतु ज्ञानमपि पूर्वं गृहीतमिति ॥ ११८ ॥

गृहीतमिति यच्चोक्तं तद्भेदान्न तद् यतः ।
नास्माभिर्वाक्यवृत्तेस्त्वं निमित्तमनुयुज्यसे ॥ ११९ ॥
ग्राह्यग्राहकतैवास्य केनचिन्नोपलभ्यते ।
प्रत्यक्षज्ञानपक्षे च नैषा स्यादानुमानिकी ॥ १२० ॥
एकाकारे च विज्ञाने यद्यन्योऽप्यत्र कल्प्यते ।
सहस्राकारतैकस्य कस्मान्न परिकल्प्यते ॥ १२१ ॥
ग्राह्यग्राहकयोर्भेदो नन्वस्त्येव परस्परम् ।
सिद्धो नः पक्ष एवं स्यान्न ज्ञानत्वादभेदतः ॥१२२॥

यत् पुनर्ब्याकारवेदने पूर्वमुक्तमभेदं चाभ्युपेत्यायमि'त्र कथमेकस्मिन् गृह्यमाणे परो न गृह्यत इति । तद् दूषयति — गृहीतमितीति । यदस्माभिरंशद्वयाग्रहणे निमित्तमनुयुक्तो भवान् किमुभयात्मकं न गृह्यत इति, नानेनाद्वयाकारं वाक्यप्रवृत्तिमात्रमेव भवतोऽभिमतं यथा तथा वा तावदभ्यधास्त्वमिति । अपि तु अग्रहणकारणं वा त्वया वक्तव्यम् । वास्तवं वाग्रहणं, न त्वभेदाद् द्वयात्मकं गृहीतमिति वाक्प्रवृत्तिमात्रेणास्माभिर्मुच्यस इति ॥ ११९ ॥

परमार्थतस्तु ग्राह्यग्राहकाकारवेदनं नास्तीत्युक्तमेवेत्याह—ग्राह्येति । स्यादेतत् । मा नाम प्रत्यक्षेण द्वयात्मकं गृह्यताम् । अनुमानेन तूभयाकारवेदनं साधयामः । ग्राहकात्मा गृहीतो ग्राह्याभेदात्, तदात्मवदित्यत आह — प्रत्यक्षेति । अयमभिप्रायः — प्रत्यक्षं ज्ञानमिति वः पक्षः । न चास्मिन् पक्षेऽनुमानेन ग्रहणसाधनं युक्तम् । यदि हि द्वयाकारं ज्ञानमुत्पन्नं भवेत्, तथैव प्रकाशेत । अतो नैषा द्वयाकारोपलब्धेरानुमानिकी प्रत्यक्षज्ञानपक्षे स्यात् । नच प्रत्यक्षेण द्वयाकारं ज्ञानं कैश्चिदुपलभ्यत इति न द्वयाकारता ज्ञानस्येति ॥ १२० ॥

यदि त्वेकाकार एव ज्ञाने द्वयाकारता कल्प्यते, एवं सत्यप्रमाणकत्वाविशेषात् सहस्राकारतैव किं न कल्प्यते इत्याह — एकेति ॥ १२१ ॥

अत्र चोदयति — ग्राह्येति । अयमभिप्रायः — यदेतदन्यतरांशग्रहणेऽभिन्नत्वादपरस्यापि ग्रहणमापादितं भवता तदयुक्तं, अभेदे हि सत्ये-

भिन्नाभिन्नत्वमेकस्य कुतोऽत्र परिकल्पितम् ।
त्वया साङ्ख्यमतेनैवमुक्त्वा बुद्धस्य शासनम् ॥
एकं चेद् ग्राहकं ग्राह्यं कुतो भिन्नत्ववागियम् ।
भिन्नं चेत् कथमुच्येत तस्यैकत्वं पुनस्त्वया ॥ १२४ ॥
एकज्ञानादनन्यत्वाद् ग्राह्यग्राहकयोर्मिथः ।
एकत्वेन भवेज्ज्ञानं ग्राह्यं ग्राहकमेव वा ॥ १२५ ॥

तत् स्यात् । नतु ग्राह्यग्राहकांशयोः परस्परमभेदः । ज्ञानं हि तत्राभिन्नमंशौ च परस्परं भिन्नावेव । अतो यथैन्द्रवायवादिग्रहाः परस्परं भिन्ना अपि ज्योतिष्टो(म?माङ्ग)त्वेन न भिद्यन्त इति मीमांसका मन्यन्ते, एवं ज्ञानस्यापि स्वात्मनाभेदेऽप्यंशयोः परस्परं भेदान्न ग्रहणसङ्करपरिचोदनावकाश इति निराकृतस्वपक्षस्य बौद्धस्य प्रत्यवस्थानमिति । सिद्धान्तवादी तु — न तावदयमेकान्तवादी बौद्धो भिन्नाभिन्नत्वमभ्युपेत्य ग्राह्यग्राहकयोर्भेदमभिवक्त इति सम्भवति, तन्नूनमैकान्तिक एवानेन ग्राह्यग्राहकयोर्भेदोऽभिहित इति मत्वान आह — सिद्ध इति । इतरः स्वाभिप्रायमाविष्कर्तुं परपक्षनिषेधं तावदाह — नेति । कारणमाह — ज्ञानत्वादभेदतः । अयमर्थः — नैवमपि भवत्पक्षसिद्धिः, ज्ञानत्वेनांशयोरभेदादित्युक्तमेवेति ॥ १२२ ॥

इतर इदानीं सिद्धान्तहानिमापादयंस्तमेवंवादिनं निगृह्णाति — भिन्नेति । साङ्ख्या हि प्रकृतिविकारयोरत्यन्तभेदमनेच्छन्तो विकारात्मना प्रकृतौ भेदं तदात्मना च विकाराणामभेदं सङ्गिरन्ते । तद् यथा साङ्ख्यमतेन भिन्नाभिन्नात्मकं वस्तु परिकल्प्यते, तथा कथं त्वया भ्रान्तचित्तेन बुद्धशासनमुक्त्वा भिन्नाभिन्नत्वमेकस्य ज्ञानात्मनः परिकल्पितम् । अस्माकं त्वनेकान्तवादिनामुपपन्नो ज्योतिष्टोमे तथाभ्युपगम इति ॥ १२३ ॥

भवतस्तु यदि ग्राह्यग्राहकात्मकं द्वयं ज्ञानात्मनैकं, ततो भिन्नत्ववागनुपपन्ना, नोचेदेकत्वमित्याह — एकमिति ॥ १२४ ॥

एवं चात्र भवन्मताश्रयणेनैकात्म्यमापादयितुं शक्यमित्याह — एकेति । ग्राह्यग्राहकावेकात्मानौ, एकरूपात् ज्ञानात्मनोऽभेदात् । तदात्मवदेव । ग्राह्यग्राहकयोर्मिथः परस्परमेकत्वेन कारणेन ज्ञानं ग्राह्यात्मकं ग्रा-

तत्र चान्यतरापाये द्वितीयापायतः पुनः ।
ज्ञानस्यांशद्वयासत्त्वान्नैरस्वभाव्यादभावता ॥ १२६ ॥
भिन्नाभ्यां वाप्यभिन्नत्वाद्भेदो ज्ञानात्मनो भवेत् ।
ततस्वात्मनस्ततश्चैवं सिद्धं वस्तुद्वयं हि नः ॥ १२७ ॥
तयोश्च यदि संज्ञेयं ज्ञानमित्यस्त्वथापि वा ।
ज्ञानं ज्ञायत इत्यर्थो धीभेदे करणेऽपि वा ॥ १२८ ॥
सर्वथा वस्तुभेदो नः सिद्धः शब्दो यथारुचे ।
प्रवर्ततां न नस्तत्र कश्चिद् विप्रतिपद्यते ॥ १२९ ॥

तत्र चैकात्मकत्व आत्मनि ग्राह्यग्राहकयोरन्यतरापाये जाते परस्यापीतरविधुरस्यानुपपत्तेरंशद्वयासत्त्वमेव ज्ञानस्य भवेत् । एवं च निःस्वभावमभावात्मकं ज्ञानमापन्नमिति शून्यता प्रमाणार्थयोः स्यादित्याह — तत्रेति ॥ १२६ ॥

एवं तावदभिन्नात्मनो ज्ञानादभेदादंशयोरभेद आपादितः । इदानीं भिन्नाभ्यां वांशाभ्यामभिन्नत्वात् ज्ञानात्मनो भेदमापादयति — भिन्नाभ्यामिति । एवं चात्यन्तभेदे ग्राह्यग्राहकयोः सिद्धं द्वैतमित्यभिप्रायेणाह— ततश्चेति ॥ १२७ ॥

एवं द्वैतसिद्धौ यदि ज्ञानमिति संज्ञामात्रमेव ग्राह्यग्राहकयोः कर्तुमभिमतं भवतां, तदभ्युपगच्छाम एवेति सोपहासमाह — तयोरिति । अथवा किं पारिभाषिकेण ज्ञानशब्देन, अस्माकमेवैक एवायं ज्ञानशब्दोऽक्षादिवत् साधारणतयार्थज्ञानयोर्व्युत्पत्तिभेदेन वर्तत इत्याह — अथापि वेति । यदि ज्ञायत इति ज्ञानं कर्मणि ल्युडन्तो ज्ञानशब्दोऽनुशिष्यते, ततोऽर्थो ज्ञानम् । अथ तु ज्ञातेर्ज्ञानं ज्ञायतेऽनेनेति वा भावकरणयोर्व्युत्पाद्यते, ततो धीरेव ज्ञानमित्युभयज्ञानतोपपत्तिरिति ॥ १२८ ॥

सर्वथापि हि ज्ञानशब्दव्युत्पत्तौ वस्तुभेदस्तावत् सिद्ध एव । शब्दस्तु यथारुचि ज्ञानार्थयोरन्यतरत्र प्रवर्तताम् । नात्र नो विप्रतिपत्तिरित्याह — सर्वथेति ॥ १२९ ॥

अथ सत्यपि भिन्नत्वे ग्राह्यं ज्ञानान्तरं भवेत्।
ज्ञानत्वे तस्य का युक्तिः पूर्वोक्ता तस्य सेष्यते॥
ज्ञानं ज्ञानमितीदं तु न द्वयोरनुवर्तते।
व्यतिरिक्तं च सामान्यं त्वया नाभ्युपगम्यते॥ १३१॥
व्यतिरेके तयोर्ज्ञानान्न ज्ञानात्मकता भवेत्।
तद्रूपरहितत्वे च ज्ञानाभावः प्रसज्यते॥ १३२॥

अत्रापरे बौद्धा वदन्ति — सत्यमस्ति ग्राह्यग्राहकयोर्भेदः। नैवमपि बहिरर्थः सिध्यतीति, ज्ञानस्यैवातीतस्योत्तरज्ञानग्राह्यत्वात्। अत एवेदम्भावः, परगोचरत्वात् संविदः। कथमतीतं ग्राह्यमिति चेद्, न। हेतुत्वस्यैव ग्राह्यत्वात्। यदेतदुत्तरज्ञानजनने स्वाकारसमर्पणेन पूर्वस्य हेतुत्वं तदेव तस्य ग्राह्यत्वम्। यथाहुः —

"भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम्॥"

इति। अयं च सौत्रान्तिकवैभाषिकयोः साधारणः श्लोकः। तदेतदुपन्यस्यति — अथेति। यद्यपि ग्राहकाद् भिन्नं ग्राह्यं, तथापि ज्ञानान्तरमेव तदतीतं न त्वर्थ इति। एतदपि दूषयति — ज्ञानत्व इति। तस्य ग्राह्यत्वाभिमतस्य ज्ञानस्य ज्ञानत्वे युक्तिर्न काचिदस्तीति भाव इति। यदि तु पूर्वोक्तया कर्मव्युत्पत्त्या ज्ञानं तदिष्यते तदस्माभिरिष्यते इत्याह — पूर्वेति॥ १३०॥

ज्ञानं ज्ञानमित्यनुगतं तु रूपं न द्वयोर्ग्राह्यग्राहकयोरवगम्यत इत्याह — ज्ञानमिति। अक्षादिवत् साधारणशब्दतामभ्युपगच्छामः नत्वाकृतिशब्दतामिति। उपेत्यापि ब्रूमः। तत् खलु सामान्यं पूर्वोत्तरयोरनुयायि ताभ्यां भिन्नमभिन्नं वा। न तावद् भिन्नं तैरुपेयत इत्याह — व्यतिरिक्तमिति॥ १३१॥

अयं चापरो व्यतिरेके दोष इत्याह — व्यतिरेक इति। तयोः पूर्वोत्तरयोर्ग्राह्यग्राहकयोः। ज्ञानसामान्याद् व्यतिरेके इष्टे, तस्मिंस्ताभ्यां भिन्न इति यावत्। तयोर्ज्ञानात्मकता न स्यात्, तेनैव रूपेण ज्ञानत्वाभ्युपगमा-

ताभ्यां च तस्य सम्बन्धे प्रत्येकं व्यतिषज्य वा ।
भेदे सावयवत्वादिदोषो वैशेषिकादिवत् ॥ १३३ ॥
यथा हि तेषां जात्यादौ दोषा ह्युक्ताः परैरमी ।
तथैवैषां प्रसज्यन्ते भिन्नाभिन्नार्थसङ्गतौ ॥ १३४ ॥
ताभ्यामव्यतिरेके वा भेदः पूर्वोक्त एव ते ।
सादृश्यापोहसामान्यकल्पना वारयिष्यते ॥ १३५ ॥
वस्त्वन्तरस्य चाभावात् त्वयापोहोऽपि दुष्करः ।
नाज्ञानं नाम किञ्चित् स्यादपोह्यं ज्ञानवादिनः ॥

दिति । किमतो यद्येवमत आह — तद्रूपेति । ज्ञानरूपरहितत्वे सत्यज्ञानात्मनो वस्तुनोऽभावात् पूर्वोत्तरयोर्ज्ञानयोरभाव एवापद्यत इति ॥ १३२ ॥

अपिच तत्सामान्यं ताभ्यां सम्बध्यमानं प्रत्येकं कात्स्न्येन सम्बध्यते भूतकर्मगुणवत्, व्यतिषज्य वा मालागुणवत् । पूर्वस्मिन् कल्पे भेदः । उत्तरस्मिन् सावयवत्वमिति वैशेषिकादिवद् दोषप्रसञ्जनं कर्तव्यमित्याह — **ताभ्यामिति** ॥ १३३ ॥

वैशेषिकादिवादेत्येतद् विवृणोति — **यथेति** । यथैव वैशेषिकादीनां परैर्बौद्धैरेव जात्यादावेते दोषा उक्ताः, तथैवैषां बौद्धादीनामपि भिन्नयोः पूर्वोत्तरज्ञानयोरभिन्नस्य ज्ञानसामान्यस्य सङ्गतौ सम्बन्धे एते दोषा इति ॥ १३४ ॥

यदि तु ताभ्यामव्यतिरिक्तं सामान्यमिष्यते, ततो योऽसौ भिन्नाभ्यामभिन्नत्वात् प्राग् भेद आपादितः स एवापद्यत इत्याह — **ताभ्यामिति** । अपिच किमात्मकं तत् सामान्यमित्यपि चिन्तनीयमेव । तत्रास्मदभिमतसामान्याश्रयणे तावदुक्तः प्रसङ्गः । सादृश्यरूपमपोहरूपं च सामान्यं परस्तान्निराकरिष्यत इत्याह — **सादृश्येति** ॥ १३५ ॥

अपिचात्रापोहरूपसामान्याभ्युपगमेऽधिको दोष इत्याह — **वस्त्वन्तरस्येति** । एतदेव विवृणोति — **नेति** । अज्ञाननिवृत्त्या ज्ञानं ग्रहीतव्यम् । नच ज्ञानमात्रवादिनोऽज्ञानं नाम किञ्चिदपोह्यमस्तीति ॥ १३६ ॥

अपोहो नह्यभावस्य कथञ्चिदुपपद्यते ।
वस्त्वन्तरमभावः स्यादपोह्यत्वाच्च वस्तुता ॥ १३७॥
तेनाज्ञाननिवृत्तौ हि ज्ञानेऽन्यार्थः प्रसज्यते ।
कल्पितं स्यादपोहं चेन्नात्यन्तासत्कल्पना ॥ १३८॥
बुद्धिरज्ञाननिर्भासा तयाज्ञानं प्रकल्पितम् ।
ततश्च ज्ञानमेवैकमपोह्यत्वेन सम्मतम् ॥ १३९ ॥
नचात्मापोह एवास्ति कश्चित् सामान्यकल्पने ।
वृक्षस्य नह्यपोह्यत्वं वृक्षेणेव कदाचन ॥ १४० ॥

नचात्यन्तासत एवापोहो घटते इत्याह — अपोह इति । अयमभिप्रायः — यदि ज्ञानाभावमात्रमज्ञानं तत्तर्ह्यवस्तुरूपं कथमपोहक्रियाकर्म भविष्यतीति । अपोह्यत्वाभ्युपगमे वा अभावस्यापि वस्वन्त(रा ? रता)पत्तिरित्याह — वस्त्वन्तरमिति । कारणमाह — अपोह्यत्वाच्च वस्तुतेति । चशब्दो हेताविति ॥ १३७ ॥

अतोऽवश्यं ज्ञानाभावस्यानपोह्यत्वादज्ञाननिवृत्तौ ज्ञाने इष्यमाणे ज्ञानादन्यदज्ञानमर्थ एव ते प्रसज्यत इत्याह — तेनेति । अत्र किञ्चिदाशङ्कते — कथमिति । ज्ञेयादिशब्देषु हि बौद्धैरुक्तम् —

"अज्ञेयं कल्पितं कृत्वा ज्ञेयशब्दः प्रवर्तते ।"

इति । तदिहापि समानम् । अज्ञानकल्पनया तदपोहेन ज्ञानशब्दो वर्तिष्यते । तेन नापोह्याभावो नच वस्त्वन्तरतापत्तिरिति । एतदपि दूषयति — नेति । यदेव हि क्वचिद् दृष्टं तदेवान्यत्र कल्प्यते । अत्यन्तासतस्तु ज्ञानादन्यस्याबुद्धिविषयस्य कल्पना केति ॥ १३८ ॥

तदेवं कल्पनीयान्तराभावादज्ञानाकारा बुद्धिरेवाज्ञानतया कल्पनीयापन्नेत्याह — बुद्धिरिति । तत्र चायं दोष इत्याह — ततश्चेति ॥१३९॥

किञ्चतो यद्येवमत आह — नचेति । न ज्ञानान्तरापोहेन ज्ञानमेव ग्रहीतुं शक्यत इति । अत्रैव दृष्टान्तमाह — वृक्ष इति । नहि वृक्षार्थो वृक्षापोहेन प्रत्येतुं शक्यत इति ॥ १४० ॥

अपोह्ये चैव विज्ञाने ज्ञानत्वं न भवेत् तव ।
वृक्षत्वं नह्यपोह्येषु घटत्वादिषु युज्यते(?) ॥ १४१ ॥
ततश्चाज्ञानमेवार्थ इत्यभिन्नार्थता भवेत् ।
अज्ञानप्रत्ययश्चायं किमालम्बन इष्यते ॥ १४२ ॥
न तावज्ज्ञाननिर्मुक्तमज्ञानं ग्राह्यमस्ति ते ।
ननु वस्तु निषिद्धं तदभावः किं न गृह्यते ॥ १४३ ॥
भावो न गृह्यते येन तस्याभावेषु का कथा ।
स्वांशपर्यवसानं च तुल्यमत्रापि कारणम् ॥ १४४ ॥

अपिच यासावज्ञाननिर्भासा बुद्धिरज्ञानतया कल्पिता, तस्या ज्ञानत्वं न भवेत् । नहि यद्रूपं यदपोहेन प्रतीयते तत्रैव तद् भवति । वृक्षत्वस्या-वृक्षेष्वपोह्येषु घटादिष्वभावादित्याह — **अपोह्य** इति ॥ १४१ ॥

एवञ्च तस्याज्ञानत्वाभिमतस्य ज्ञानत्वाभावादर्थत्वमेवापन्नम् । अतो-ऽज्ञानवाचोयुक्त्यार्थ एवाभिमत इत्यभिन्नार्थत्वमित्याह — **ततश्चेति** । किञ्चैवमपिचायमज्ञानापोहवादी वक्तव्यः किमालम्बनोऽयमज्ञानप्रत्यय इति । न तावद् बाह्यालम्बनं किञ्चिद् भवद्भिर्ज्ञानमिष्यते । नचास्य स्वांशा-लम्बनत्वं ज्ञानान्तरालम्बनत्वं वा सम्भवतीत्यनन्तरमेव वक्ष्यतीत्यभिप्राये-णाह — **अज्ञानेति** । तत्र तावद् ज्ञानमात्रवादिनामज्ञानं नाम किञ्चिदस्ति यदस्यालम्बनं स्यादित्याह — **नेति** । अत्र चोदयति — **नन्विति** । अ-स्यार्थः — वस्त्वात्मकं हि ज्ञानातिरिक्तमस्माभिर्निषिद्धम् । अभावात्मकं त्व-ज्ञानं किमज्ञानप्रत्ययेन नावलम्ब्यत इति ॥ १४३ ॥

परिहरति — **भाव** इति । अयमभिप्रायः — येन तावदाबाल-मास्थविरं च प्रसिद्धा महीमहीधरोदधिप्रभृतयो ग्राह्या अपलपिताः, तस्य किमिति सूक्ष्मन्यायवेदनीयो भावो ग्राह्यो भविष्यति तन्मते च सर्वो-पाख्यानविरहलक्षण इति । अपिच यद् भावधियां स्वांशपर्यवसाने कारण-मुक्तं, तदभावबुद्धेरप्यविशिष्टम् । अतः कथमसौ बाह्याभावालम्बनं स्यादि-त्याह — **स्वांशेति** ॥ १४४ ॥

तेन ज्ञानान्तरं वा स्याद् ग्राह्यमात्मांश एव वा ।
स्वरूपविपरीतं च कथं ग्राह्यं प्रतीयते ॥ १४५ ॥
यथोष्णेऽनुष्णधीर्नास्ति ज्ञानेऽप्यज्ञानधीस्तथा ।
तेन न ज्ञानमात्रत्वे स्यादपोह्यं कथञ्चन ॥ १४६ ॥
ग्राह्यग्राहकयोश्चातो न ज्ञानात्मसमानता ।
तस्मादन्यतरत्रेदं ज्ञानत्वं संप्रतीयते ॥ १४७ ॥
अत्राप्युभयसिद्धत्वाद् ग्राहकस्येति गम्यते ।
वस्तुभेदे प्रसिद्धे च व्यपदेशो यथारुचि ॥ १४८ ॥
ज्ञानमस्तूभयं वार्थो ग्राहको वार्थ उच्यताम् ।

तदवश्यं पारिशेष्यादज्ञानप्रत्ययस्यापि ज्ञानान्तरं वा स्वांशो वा ग्राह्योऽभ्युपगन्तव्य इत्याह — तेनेति । अस्तु तदेव ग्राह्यं, को दोषोऽत आह — स्वरूपेति । ज्ञानान्तरं स्वात्मा वा ज्ञानस्य ज्ञानस्वभावत्वान्नाज्ञानप्रत्ययेन विषयीकर्तुं शक्यते । स्वरूपविपरीतस्याग्राह्यत्वाद् यदाकारो हि प्रत्ययस्तदाकारमेव ग्राह्यमवस्थापयति । अज्ञानाकारश्च प्रत्ययः कथं ज्ञानमालम्बनीकर्तुं शक्नोति । स्वरूपविपरीतं न ग्राह्यमिति ॥ १४५ ॥

एतदेव दर्शयति — यथेति । अतः सिद्धं न ज्ञानमात्रत्वेऽपोह्यमस्तीत्याह — तेनेति । एवंचासत्यपोह्येऽपोहस्वरूपस्याप्यभावान्न तेनात्मनापि ग्राह्यग्राहकयोर्ज्ञानयोर्ज्ञानात्मना समानत्वमित्याह — ग्राह्यग्राहकयोरिति । एवञ्चोभयोः साधारणरूपाभावाद् ग्राह्यग्राहकयोरन्यतरत्र ग्राह्ये ग्राहके वा ज्ञानत्वमभ्युपगन्तुं युक्तमित्याह — तस्मादिति ॥ १४७ ॥

तथापि को निश्चयः ग्राहकं ज्ञानं नतु ग्राह्यमित्यत आह — अत्रेति । उभयसिद्धं हि ग्राहकस्य ज्ञानत्वं ग्राह्यस्य त्वस्माकमसिद्धमिति । एवं तावद् ज्ञानं ग्राहकमर्थो ग्राह्य इति साधितम् । अथवा किं नोऽनेन व्यसनेन । तत्त्वभेदो हि नो द्वैतानुगुणतया साध्यः । स तावत् सिद्धः । सिद्धे च तस्मिन् यथारुचि व्यपदेशोऽस्तु नामेत्याह — वस्त्विति ॥१४८॥

यथारुचि व्यपदेशमेव दर्शयति — ज्ञानमिति । उभयं वा ज्ञानशब्दे वाच्यमस्तु अर्थो ज्ञानं च । अर्थ एव वा ज्ञानशब्दवाच्यः न ज्ञान-

बुद्ध्योरयुगपद्भावान्न द्वयोर्मेयमानता ॥ १४९ ॥
क्षणिका हीत्यनेनोक्तमर्थो ह्येकः प्रसज्यते ।
अन्योन्यनिरपेक्षत्वाद् युगपच्चापि जन्मनि ॥ १५० ॥
मानमेयत्वनास्तित्वं क्रियाकारकवर्जनात् ।
अर्थविज्ञानयोरत्र या मितिं प्रति सङ्गतिः ॥ १५१ ॥

मित्यर्थः । ग्राहक एव वार्थशब्दवाच्योऽभिधीयताम् । नैवमपि काचित् पक्षक्षतिः । सिद्धत्वाद् द्वैतस्येत्यभिप्रायेणाह — ग्राहक इति । भाष्यकारेण त्वतीतबुद्धेर्ग्राह्यत्वनिराकरणार्थं क्षणिकत्वं कारणमुक्तं येनैवमाह — 'अर्थविषया हि प्रत्यक्षबुद्धिः, न बुद्धिविषया । क्षणिका हि सा, न बुद्ध्यन्तरकालमवस्थास्यते' इति । तदुपन्यस्यति — बुद्ध्योरिति । अतीता हि पूर्वा बुद्धिर्नासावुत्तरया ग्रहीतुं शक्यते । तत्कालेऽसत्या वर्तमानवद् ग्रहीतुमशक्यत्वाद् ग्राह्यस्य चेदं नीलमिति वर्तमानवद्भासादिति । अतः क्षणिकत्वात् कारणाद् बुद्धेः ग्रहीतुमशक्यत्वात् अस्मन्मताश्रयणेनार्थात्मकतैव बुद्धेरुपेयेत्याह — अर्थ इति । यदि तूच्यते मा भूदतीताया बुद्धेर्ग्राह्यत्वं, सहभाविनोस्तु ज्ञानयोर्ग्राह्यग्राहकत्वं न नोपपन्नमिति । तदयुक्तं सहभावानुपपत्तेः । कथं हि समनन्तरप्रत्ययाधीनात्मलाभमुत्तरं तेन सहोत्पद्यत इति सम्भावयामः । सहत्वेऽपेक्षानुपपत्तेः । अस्तु वा जन्मयौगपद्यं ज्ञानयोः । एवमपि न मानमेयता सम्भवति । हेतुत्वमेव हि ग्राह्यत्वमुक्तम् । नचासति पौर्वापर्ये तत् सम्भवति, सहजन्मनोरन्योन्यनिरपेक्षत्वात् । तदिदमाह — अन्योन्येति । कथं निरपेक्षमत आह — क्रियेति । यदि हि ज्ञानयोः कश्चित् क्रियाकारकसम्बन्धो भवेत्, एवमपेक्षा भवेत् । नचासौ सहोत्पत्तौ सम्भवति । स्वाकारार्पणेन हेतुत्वं निराकृतमेवेति । ननु तवाप्यर्थज्ञानयोः कार्यकारणभावे क्रियाकारकसम्बन्धः कः, अत आह — अर्थेति । येन व्यापारेण बुद्धेः प्रमाणत्वं सा मितिः कश्चासौ । यदेतद् बुद्धिजन्मेति प्रत्यक्ष उक्तम् । तदस्यां मितौ यार्थविज्ञानयोः सङ्गतिः । सानयोः कार्यकारणभावः । सा हि बुद्ध्यर्थाभ्यां सहिताभ्यां भाव्यते । यावद्धि नार्थो धीविषयः, तत्कर्म भवति । बुद्धिश्च जन्मनि कर्त्री । न तावन्निर्विषया अक-

कार्यकारणभावोऽयं नान्यत्रैवं च दृश्यते ।
नियमश्च न लभ्येत सव्यदक्षिणशृङ्गवत् ॥ १५२॥
इदं कार्यमयं हेतुर्द्वयं नान्योन्यसंश्रयात् ।
तद्भावभावितामात्रं हेतुः केनैव कल्प्यते ॥ १५३ ॥
पौर्वापर्यविनिर्मुक्तं कार्यकारणलक्षणम् ।
गवाश्वस्य यथा नास्ति पौर्वापर्येऽपि तत् तथा॥१५४॥
युगपज्जायमानेऽपि सन्तत्यन्तरजे क्षणे ।

र्तृका चोत्पत्तिः सम्भवति । तदनेन क्रियाकारकसम्बन्धेनास्ति ज्ञानार्थयोः कार्यकारणभावः । तदेतदर्थस्य बुद्धेरुत्पत्तौ कर्मकारकत्वमेतदेवास्य ज्ञानकारणत्वम् । अत्रेति । मीमांसकसिद्धान्त इत्यर्थः । नचैष प्रकारो बौद्धमते सम्भवति, युगपज्जन्मनोर्ज्ञानयोर्जन्मन एवाभावाद् ज्ञानातिरिक्तस्य यौगपद्ये चान्यतरोक्तावन्यतरस्य कारणत्वासम्भवादित्यभिप्रायेणाह — नेति । अपिच, इदं कार्यमयं हेतुरित्यपि नियमो यौगपद्ये दुरधिगमः अनपेक्षत्वाविशेषात् । नखलु सव्येतरविषाणयोर्युगपज्जन्मनोः शक्यमवगन्तुमिदं कार्यमिदं कारणमित्यगृह्यमाणे विशेषे, तदेतदाह — नियम इति । नन्वगृह्यमाणे विशेषे उभयस्योभयं कारणं भविष्यतीत्यत आह — द्वयमिति । यदि पूर्वमुत्तराधीनात्मलाभम्, उत्तरं च पूर्वाधीनं, ततो दुरुत्तरमितरेतराश्रयमिति ॥ १५२$\frac{1}{2}$ ॥

नन्वत्रापि तद्भावभावितैव कार्यकारणभावे चिह्नम् । अस्ति च युगपज्जन्मनोरपि विज्ञानयोस्तद्भावभावः, पूर्वज्ञानसम्भवक्षण एवोत्तरस्य भावात् । अतः कुतो यौगपद्ये न हेतुहेतुमत्ता, अत आह — तद्भावेति । सत्यम् । तद्भावभाविता कार्यकारणत्वे लक्षणं न पुनः पौर्वापर्यरहिता । तन्नियमसहितमेव तु तद्भावभावहेतुकं कार्यकारणभावे लक्षणमाहुः । नच यौगपद्ये पौर्वापर्यं, नतरां नियम इत्यकार्यकारणतेति ॥ १५३$\frac{1}{2}$ ॥

परस्परसहितमुभयं कार्यकारणलक्षणं न त्वनपेक्षितमित्यत्रैव निदर्शनमुपन्यस्यति — गवाश्वस्येति । नखलु कदाचिदश्वात् पूर्वं गवि जाते

रूपादिषु घटे यद्वत् तस्मात् पूर्वमवस्थिते ॥ १५५ ॥
यो यस्माज्जायते पश्चात् स तत्कार्यमितीष्यते ।
हेतुहेतुमतां सिद्धं यौगपद्यनिदर्शनम् ॥ १५६ ॥
यत् प्रदीपप्रभायुक्तं सूक्ष्मः कालोऽस्ति तत्र नः ।
दुर्लक्षस्तु यथा वेधः पद्मपत्रशते तथा ॥ १५७ ॥

पश्चाज्जायमानोऽश्वः पौर्वापर्यात् तत्कारणको भवति । तथैकसन्तानक्षणभाविनः सन्तत्यन्तरजस्य क्षणस्य न तद्भावमात्रात् तत्कार्यत्वमसति पौर्वापर्ये । एवं घटेन सहोत्पद्यमानेषु रूपादिषु नान्योन्यं कार्यकारणभाव इष्यते । नह्यवयविद्रव्यस्य रूपेऽवयवी कारणम्, अश्वादिरूपाणामेव प्राक् सतां क्रमेण तत्र कारणत्वात् । एतौ च स्वमतपरमतभेदेन व्याख्येयौ दृष्टान्तौ । आवयोरेव तद्भावभावितामात्रं न कार्यकारणत्वे लक्षणमित्युक्तं भवतीति । तस्माद् यो यस्मिन् नियमेन पूर्वमवस्थिते जायते, स तत्कारणको नान्य इत्याह — तस्मादिति ॥ १५५½ ॥

यत् पुनरत्र परैर्यौगपद्येऽपि कार्यकारणभावो दृश्यत इति प्रदीपप्रभादिसिद्धवन्निदर्शनमुक्तं, तन्न । न सिद्धं, तत्रापि सूक्ष्मस्य कालभेदस्य विद्यमानत्वात् । प्रदीपकार्या हि प्रभा नासौ प्रदीपेन सहैव निष्पद्यते । एकदा प्रदीपे जातेऽनन्तरमेव निष्पद्यते प्रभा। तस्माद् न क्वचिदपि यौगपद्ये कार्यकारणभाव इत्याह — हेत्विति । यद्यस्ति कालभेदः कस्मान्न लक्ष्यते, अत आह — दुर्लक्ष इति । यथा निरन्तरमुपर्युपरिभावेन स्थिते पद्मपत्रशते भिद्यमाने कालभेदो दुर्लक्षः, एवं प्रदीपप्रभयोरपि । यथाच तत्र ना-(न)न्तरिता सूची भिनत्तीति तत्र कालभेदे प्रमाणम्, एवं नानिष्पन्ने प्रदीपे तत्तेजो विसरतीति समानमुभयत्रापि प्रमाणं कालभेदे । तुलान्तनमनोन्नमनयोस्तु न परस्परं कार्यकारणभावो द्वयोरप्येकहेतुत्वात् । तोलयिता हि तत्र सहभुवोर्द्वयोरपि कारणम् । कक्ष्यासूत्रसन्निवेशविशेषो वा । सूत्रं हि तत्र मध्ये भवत् समं तौ धारयति । एकतरत्र भवद् विषमं प्रवर्तयति । नच पुनरुन्नामहेतुर्नामः नच नामहेतुरुन्नाम इति न क्वचित् सहजन्मनोः कार्यकारणभाव इति ॥ १५७ ॥

भागयोर्यौगपद्येन तथैव स्यान्निराक्रिया ।
नच शक्त्यर्पणद्वारं क्रमेणालम्बनं भवेत् ॥ १५८ ॥
ग्राह्यं तदा ह्यतीतं स्यात् तादूप्यं चाप्रमाणकम् ।
अतीतत्वानुविद्धो हि स्मृत्या ग्राह्योऽनुभूयते ॥१५९॥

यथा च पूर्वोत्तरज्ञानयोर्यौगपद्येन कार्यकारणभावः एवं ज्ञानभागयोरपि ग्राह्यग्राहकात्मनोः कार्यकारणभावो निराकार्यः । नचाकारणभूतस्य ग्राह्यता सम्भवतीति यौगपद्ये प्रसङ्गेन भागावुपसङ्क्रम्य दर्शयति —**भागयोरिति** । मानमेयत्वनिराक्रियेत्यर्थः । यदि तूच्यते मा भूद् यौगपद्ये पूर्वमालम्बनमुत्तरस्य, क्रमेणैव तु भविष्यति । कथमसतोऽतीतस्यालम्बनत्वमिति चेद्, न । शक्त्यर्पणद्वारेणोपपत्तेः । पूर्वं हि ज्ञानमुत्तरस्मिन् वासनापरनामानं शक्तिमर्पयति । ततस्तद्रूपं तज्जायमानं तदालम्बनमित्याख्यायते, अत आह — **नचेति** ॥ १५८ ॥

किमिति न भ(वः ? वेत् ।) अत आह — **ग्राह्यमिति** । शक्त्यर्पणेन हि पूर्वस्य ग्राह्यत्वे ग्राह्यमतीतं भवेत् । अतीतमेव हि तद्वासनावशादुत्तरेणालम्ब्यते स्मृत्येव पूर्वज्ञानमिति । भवत्वतीतं ग्राह्यं को दोषः अत आह—**तादूप्यमिति** । तादूप्यमतीतरूपत्वं वर्तमानावभासिनो ग्राह्यस्य संविद्विरुद्धमप्रमाणकं भवेत् । कथं ह्यतीतमबाधितया बुद्ध्या वर्तमानतया गृह्येत । तथावागृह्यमाणमतीतं भवेदिति । कथं तादूप्यमप्रमाणकमत आह — **अतीतेति** । अयमभिप्रायः — पूर्वज्ञानाहितवासनावशेन जायमानमुत्तरं स्मृतिरूपमेव भवेत् । स्मृत्या च स इत्यतीतत्वानुविद्ध एव स्वगोचरोऽनुभूयते । नचेह तथानुभूयते, प्रत्युत्पन्नवदिदमिति संवेदनात् । अतः कथमसंवेद्यमेव तादूप्यं प्रमाणवद् भविष्यति । एतच्च ज्ञानातिरिक्तवासनाभ्युपगमेनोक्तम् । नतु ज्ञानमात्रवादिनां तदतिरिक्ता वासना च काचिदस्ति । नचोपपद्यते, अनाधारवा(सना)नुपपत्तेः । न चातीतमसद् वासनाधारः सम्भवति । न चोत्तरमनागतम्, असत्त्वादेव । नच परस्य जन्मकालं यावत् पूर्वमवतिष्ठते येन तस्मिन् वासनामाधाय नश्यतीति शक्यतेऽवगन्तुम् । क्षणिकत्वात् । नच सन्तानिभ्योऽतिरिक्तः सन्तानो नाम कश्चिदस्ति यो वासनाधारो भवेत् । नचानाधारैव शक्तिरात्मानं लभेत ।

तद्वदेव भवेत् तत्र स्वप्ने न स्याद् विपर्ययात् ।
तत्र ह्यवर्तमानोऽपि गृह्यते वर्तमानवत् ॥ १६० ॥
बाधज्ञानादिदं भ्रान्तं न त्वत्रैवं विपर्ययः ।
तस्मात् प्रत्यक्षबुद्धीनां नातीतो विषयो भवेत् ॥
अतीतत्वाद् यथैवासां वृत्तौ जन्मान्तरेषु यः ।
तद्रूपत्वेन वा ज्ञानं हेतुर्भावि वदुच्यते ॥ १६२ ॥

भणितश्चायं वासनाभङ्गो निरालम्बनानुमाननिराकरणावसर इत्यलमनेनेति । अत्र चोदयति — स्वप्ने न स्यादिति । यदुक्तं भवतातीतत्वानुविद्धस्मृत्यानुभूयत इति । तन्न । स्वप्ने प्रत्युत्पन्ननिर्भासात् । नच न स्मृतिः स्वप्न इति साम्प्रतं प्रत्युत्पन्नकारणान्तराग्रहणात् । नहि तत्रेन्द्रियलिङ्गादि ज्ञानकारणं किञ्चिदुपलभ्यते । नचाकारणिका ज्ञानोत्पत्तिः सम्भवति । अतोऽवश्यं स्मृतिरेव सेति वक्तव्यम् । स्मृतिरपिच वर्तमानवन्निर्भासत इति तद्वदिहापि भविष्यतीति । परिहरति — विपर्ययादिति । सत्यम् । अतीतत्वेन स्वप्ने बोधो न भवति । किन्तु विपर्ययादसौ तथावभासः । (विपर्ययज्ञानं हि ?) तद्विपर्ययश्चान्याकारवस्तुगोचरोऽन्याकारो युक्त एवेति नानेन प्रमाणज्ञानानां तुल्यत्वमवगन्तुं शक्यत इति । कीदृशः पुनः स्वप्ने विपर्ययः । तद् दर्शयति — तत्रेति ॥ १६० ॥

कथं पुनरिदमवगम्यते विपर्ययोऽसाविति । अत आह—**बाधेति** । बाधकं हि तत्र ज्ञानमुत्पद्यते नैतदेवमिति । तज्ज्ञानीमोऽवर्तमानमेव तत्र वर्तमानतया भासत इति । एतावच्च विपर्ययस्य तत्त्वं यदन्यादृशस्यान्यथाप्रकाशनमिति सूक्तं विपर्ययादिति । नचायमेवम्प्रकारो विपर्ययो जाग्रज्ज्ञानेषु शक्यवचनः । 'सुपरिनिश्चिता हि तत्र जाग्रद्धियः' इत्युक्तमित्यभिप्रायेणाह — नेति । एवमुपपादितमतीतविषया न प्रत्यक्षबुद्धय इति । इदानीं प्रयोगेण दर्शयति — तस्मादिति । अतीतो न प्रत्यक्षविषयः, अतीतत्वात् । जन्मान्तरानुवृत्तवदिति । नच योगिप्रत्यक्षेणानैकान्तिकत्वं, तन्निराकरणादिति । तस्मिन्नेव साध्ये हेतुदृष्टान्तान्तरमाह — तद्रूपेति । अतीतोऽर्थो न प्रत्यक्षबुद्धिविषयः, तद्रूपत्वेनाज्ञानात् । यन्न स्वरूपेण संवेद्यते तन्न प्रत्यक्षधीविषयः यथा भाव्यर्थ इति ॥ १६२ ॥

अतीतत्वेऽपि नार्थोऽयं धीरेषेत्यत्र का प्रमा ।
अतीतं यच्च विज्ञानं ग्राह्यत्वेन प्रकल्पितम् ॥ १६३ ॥
तत् स्याद् ग्राहकरूपं वा ग्राह्यं वोभयथापि वा ।
ग्राह्याकारत्वमात्रे स्यादर्थः शब्दान्तरेण ते ॥ १६४ ॥
स्वकाले चाथ संवित्तेर्न स्याच्छक्त्यर्पणं ततः ।
यथैवानागताज्ज्ञानात् सन्तत्यन्तरजादपि ॥ १६५ ॥
दृढत्वेनाप्यविज्ञातात् तथोत्पन्नाद् विनश्यतः ।
केवलग्राहकत्वे तु विषयत्वं न युज्यते ॥ १६६ ॥

अस्तु वातीतस्य ग्राह्यत्वं, तथापि सौत्रान्तिकान् पराजित्य तद् वक्तुं युक्तं यज्ज्ञानमेवातीतं ज्ञानेनालम्ब्यते नत्वर्थ इति । ते हि सदृशापरापरोत्पत्तिरूपेण सन्तन्यमानेषु भावेष्वतीतक्षणालम्बनमेव ज्ञानमास्थिताः । वरं तदेव युक्तमाश्रयितुम् । तथाहि — न तावदत्यन्तमलौकिकी ग्राह्यग्राहकसिद्धिरुक्ता भवतीत्यभिप्रायेणाह — अतीतेति । किञ्च, एतदप्यतीतगोचरत्वे ज्ञानस्य विकल्पनीयं यत्तच्छक्त्यर्पणद्वारेण ग्राह्यतया कल्पितमतीतं ज्ञानं, तत् किं ग्राह्यैकस्वभावमाहोस्विद् ग्राहकैकस्वभावमुभयस्वभावं वेति । सर्वथा नोपपद्यत इत्यभिप्रायेणाह — अतीतमिति । तत्र ग्राह्यैकस्वभावत्वे तावदर्थ एव शब्दान्तरेणाभ्युपगतो भवतीत्यभिप्रायेणाह— ग्राह्येति । ग्राह्यैकस्वभावं हि ज्ञानं जडात्मकमर्थ एव शब्दान्तरेणोपपादितो भवतीति ॥ १६४ ॥

अपिच शक्त्यर्पणे नोत्तरग्राह्यतेष्यते । नच ग्राह्यमात्रात्मनोऽसंचेतितस्य शक्त्यर्पणं सम्भवति । अननुभूयमानस्य स्मृतिबीजाधानानुपपत्तेरित्यभिप्रायेणाह — स्वेति । शक्त्यर्पणाभावमेव प्रयोगेण दर्शयति — यथेति । नोत्पद्यविनष्टाद् दृष्टासंविदिताच्छक्त्यर्पणं, दृढत्वेनाज्ञानादेव पटुतरमननुभवादिति यावत् । पठन्ति हि 'वस्तुधर्मो ह्येषः यदनुभवः पटीयान् स्मृतिबीजमाधत्ते' इति । यदनेवंविधं न तेन शक्त्यर्पणं, यथानागतादननुभूतपूर्वात् तथाविधादेव तु सन्तानान्तरजादिति । उक्तो ग्राह्यमात्रे प्रसङ्गः ।

किमपेक्ष्य च तस्येदं ग्राहकत्वं प्रकल्प्यते ।
द्व्याकारता निरस्तैव संवेद्येत तदैव च॥ १६७॥
ततश्चोत्तरविज्ञानं न प्रतीक्षेत बोधकम् ।
द्व्याकारकल्पनायां च परस्यात्मांश एव ते॥ १६८॥
प्रमापर्यवसानेन नातीतो विषयो भवेत् ।
पूर्वग्राह्यसरूपत्वे ग्राहकत्वं प्रहीयते ॥ १६९ ॥
ग्राहकाकारमात्रे स्याद् विषयो नासरूपतः ।
नच शक्त्यर्पणस्यात्र व्यापार उपलभ्यते ॥ १७० ॥

ग्राहकैकस्वभाव इदानीं दर्शयति — केवलेति । यत् खलु ग्राहकैकस्वभावं तत् खलु कथमुत्तरस्य ग्राह्यं भविष्यति । तथा सति स्वभावनाशादभावापत्तेरित्यभिप्रायः ॥ १६६ ॥

किञ्चेदं ग्राहकैकस्वभावत्वं दुरधिगममित्याह — किमिति । ग्राह्यापेक्षं हि ग्राहकत्वं तदेकस्वभावस्य । न तावत् स्वात्मा ग्राह्यो न ज्ञानान्तरं, तस्याप्येवमेव ग्राहकैकस्वभावत्वादिति । उभयाकारतायां दूषणमाह — द्व्याकारता निरस्तैवेति । नैतदस्तीत्यादिना निषिद्ध इत्यर्थः । अपिच, द्व्याकारत्वे पूर्वज्ञानं तदैव स्वकाल एव संवेद्येत । तत्रास्य स्वसंवित्तये बोधकान्तरज्ञानापेक्षा न युक्तेत्याह — संवेद्येतेति ॥ १६७½ ॥

अपिच यदि पूर्वज्ञानं द्व्याकारम्, एवं सति परस्यापि तद्भुवस्तथात्वादात्मांश एव प्रमा पर्यवसितेति किमतीतविषयतयेत्याह— द्व्याकारेति । ग्राह्यैकस्वभावत्वे च पूर्वस्यायमपरो दोष इत्याह — पूर्वेति ।

'तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः' ।

इति स्थितिः ॥ १६९ ॥

अथ कथं पूर्वस्य ग्राह्यमात्ररूपत्वे तज्जन्मनश्चोत्तरस्य ग्राहकत्वं भविष्यतीति । यदि तु पूर्वं ग्राहकाकारमात्रम् एवं सति नोत्तरस्य विषयो भवेत्, सारूप्यनिबन्धनत्वाद् विषयविषयिभावस्य । पूर्वोत्तरयोश्च पूर्वं ग्राहकाकारमात्रमुत्तरं तु द्व्याकारमिति वैरूप्यमिति न पूर्वविषयतोत्तरस्य(न?)

शक्त्यर्पणस्य चाभावो युष्मत्पक्षे प्रसाधितः ।
सन्तानान्तरवच्चैषां निषेध्या हेतुसाध्यता ॥ १७१ ॥

वास्यवासकभावश्च ज्ञानत्वादेकसन्ततौ ।
तस्माद् यद् ग्राहकं रूपं तद्ग्राह्यात् तस्य भिन्नता ॥
तत्संवित्तावसंवित्ते रसादिग्राहकं यथा ।

सिध्येत् । तदेतदाह— ग्राह्यकेति । पूर्वं च केवलग्राहकत्वे ग्रहणकतया विषयभावो निराकृतः । इह तु वैरूप्यादिति विशेष इति । यच्छक्त्यर्पणद्वारेण पूर्वस्यालम्बनत्वमुक्तं, तत्तावत् प्रत्युक्तमेव । तत्रैव स्मृत्वा पुनरपि किञ्चिद् वदति — नचेति । केनचिद् व्यापारेण कश्चित् कञ्चिदर्पयति । नच विज्ञानस्य शक्त्यर्पणं प्रति कश्चिद् व्यापारो दृश्यते । क्षणिकत्वाद् व्यापारकालं यावदनवस्थानाद्, व्यापारान्तरानभ्युपगमाच्चेति ॥ १७० ॥

किञ्चायं शक्त्यर्पणस्याभावो बौद्धपक्षे निरालम्बनवाद एव प्रपञ्चेन साधित इत्याह— शक्त्यर्पणस्येति । इदानीं यत्तत् पूर्वमुक्तं न पूर्वोत्तरज्ञानयोर्हेतुसाध्यत्वमिति, यच्च वास्यवासकभावनिराकरणम्, उभयत्र प्रयोगमाह— सन्तानेति । क्वचिदेकस्यां सन्ततौ विमतिपदास्पदीभूतायां न ज्ञानयोर्हेतुहेतुमत्ता, ज्ञानत्वात्, सन्तानान्तरज्ञानवत् । सन्तानान्तरज्ञानानि न सन्तानान्तरहेतुभन्ति, तेषां तत्रानारम्भकत्वात् । एवमेव वास्यवासकभावनिराकरणेऽपि प्रयोगो दर्शयितव्यः । इह च ज्ञानान्येव धर्मीणि समानायां सन्ततावहेतुभूतानीति साध्यो धर्मः । ज्ञानत्वादिति हेतुः । सन्तानान्तरज्ञानवदिति दृष्टान्त इति ॥ १७१$\frac{1}{2}$ ॥

ग्राह्यग्राहकयोरुपपादितं भेदं प्रयोगेणेदानीं दर्शयति — तस्मादिति । यत एव न कथञ्चिद् ज्ञानस्य स्वगोचरत्वं, तस्मात् । यद् रूपस्य ग्राहकं तत् तु अतो ग्राह्याद् भिन्नं, तत्संवित्तावसंवित्तेः । यन्न तत्संवित्तौ संवेद्यते तत् ततो भिन्नं, रसादिग्राहकवत् । तत्संवित्तावसंवित्तिश्च प्रागेव साधितेति नासिद्ध्याशङ्का । रसादिग्राहकं यथेति चास्य भिन्नमिति वक्ष्यमाणेन सम्बन्ध इति ॥ १७२$\frac{1}{2}$ ॥

ग्राह्यं तद् ग्राहकाच्चैव तत्परामृशता यतः ॥ १७३ ॥
न परामृश्यतेऽवश्यं रसादिग्राहकं यथा ।
द्वयं परस्परेणैवं भिन्नं साध्यं रसादिवत् ॥ १७४ ॥
ऐकरूप्येण विज्ञानात् सन्तानान्तरबुद्धिवत् ।
ज्ञानं स्वांशं न गृह्णाति ज्ञानोत्पत्तेः स्वशक्तिवत् ॥
ग्राह्यत्वप्रतिषेधश्च द्वयहीना द्विवासना ।

एवमेव ग्राह्यं पक्षीकृत्य ग्राहकाद् भेदो दर्शयितव्य इत्याह — ग्राह्यमिति । अत्रापि रसादिग्राहकमेव दृष्टान्तः । यथा हि तद्रूपग्राहकानुभवेऽननुभूयमानं ततो भिद्यते, एवं तद्ग्राह्यमपि रूपं, तदपि स्वग्राहकपरामर्शे न परामृश्यत एव । तदपि 'न स्मरामी'त्यत्र दर्शितमिति । एवमेकैकस्येन ग्राह्यग्राहकयोर्भेदं प्रसाध्येदानीमुभयोरपि समाहृत्य दर्शयति — द्वयमिति । ग्राह्यग्राहकद्वयं परस्परभिन्नम् । इतरेतरपरामर्शे इतरेतरापरामर्शाद् रसादिवत् । यथा रूपरसादयोऽन्योन्यपरामर्शेऽपरामृश्यमानाः परस्परेण भिद्यन्ते, एवमेतदपि द्वयमिति ॥ १७४ ॥

प्रकारान्तरेणेदानीं ग्राह्यग्राहकयोर्भेदं दर्शयति — ऐकेति । ग्राह्यं ग्राहकाद् भिन्नं तेन सहैकरूप्येणाज्ञानात् । यद् येन सहैकरूप्येण न ज्ञायते तत् ततो भिद्यते यथा सन्तानान्तरबुद्धिः । नचासिद्धो हेतुः, नीलादिरूपत्वाद् ग्राह्यस्यानाकारस्य च ग्राहकस्य संवेदनात् । एवमेव ग्राहकं पक्षीकृत्य हेतुर्दर्शयितव्य इति । प्रयोगान्तरमाह — ज्ञानमिति । ज्ञानं धर्मि, न स्वांशं गृह्णातीति साध्यं, ज्ञानोत्पत्तेरिति हेतुः । तद्धि समनन्तरप्रत्ययादुत्पद्यत इति बौद्धा मन्यन्ते । यद् ज्ञानादुत्पद्यते न तत्(पा?स्वां)शं गृह्णाति । यथा ज्ञानस्य स्वशक्तिः । स्वशक्तिरिति ज्ञानज(न्याद्?न्यां) वासनामपदिशतीति ॥ १७५ ॥

एवमेव ग्राह्यत्वप्रतिषेधप्रयोगो दर्शयितव्य इत्याह — ग्राह्येति । ज्ञानं स्वांशेन न गृह्यत इति दर्शयितव्यम् । तावेव हेतुदृष्टान्ताविति । नच साध्यविकलो दृष्टान्तः । द्वयहीनवासनाभ्युपगमात् । बौद्धानां हि स्वांशं न गृह्णाति । नच तेन गृह्यते । एतच्च चिरन्तनबौद्धाभिप्रायेण ज्ञानातिरिक्त-

चैत्रज्ञानं तदुद्भूतज्ञानांशग्राह्यबोधकम् ॥ १७६ ॥
ज्ञानत्वान्न भवेद् यद्वत् तस्य देहान्तरोद्भवम् ।
एतयैव दिशा वाच्या शक्तिद्वयनिराक्रिया ॥ १७७ ॥
प्रमाणान्तरसिद्धत्वादन्यत्रानेकशक्तिता ।
नत्वत्र कारणं तादृक्छक्तिभेदकृदस्ति ते ॥ १७८ ॥
तस्मादुभयसिद्धत्वाल्लाघवाद्यपरिग्रहः ।

वासनापक्षे स्थित्वोक्तमिति द्रष्टव्यम् । नतूपादानापरनाम्नो विशिष्टात् समनन्तरज्ञानादन्यां काञ्चिद् वासनामर्वाचीना मन्यन्ते । तन्निरासोऽपि चास्माभिरुक्त एवेति । अन्यथा ग्राह्यग्राहकयोर्भेदं दर्शयति — चैत्रेति । चैत्रज्ञानं धर्मि । तच्चैत्रोद्भूतो यो ज्ञानांशो ग्राह्यस्तस्य बोधकं न भवतीति साध्यम् । ज्ञानत्वात् । यद् यद् ज्ञानं न तत् तद्बोधनं यथा देहान्तरोद्भवमिति । ग्राह्यग्राहकशक्तिनिराकरणं चैतेनैव प्रकारेण दर्शयितव्यमित्याह — एतयैवेति । एषा चात्र दिक् । न ज्ञानं द्विशक्तिकं, ज्ञानोत्पत्तेः, स्वशक्तिवत् । तथा न ज्ञानं द्विशक्तिकं, ज्ञानत्वादन्यतरांशवत् । अन्यतरांशो हि ज्ञानमेव । नचासौ द्विशक्तिकः, द्वैविध्याभ्युपगमात् । इतरथा चातुर्विध्यप्रसङ्ग इति ॥ १७७ ॥

ननु शक्यमनेनैव प्रकारेण (ना ? आ)त्मनोऽपि वस्तुत्वाद् घटवद् द्विशक्तिकत्वं वारयितुमत आह— **प्रमाणे**ति । दर्शितं ह्यस्मत्प्रयोगसाम्भिन्नबोधबोध्यत्वादात्मनो द्विरूपत्वम् । न तदनुमानेन वारयितुं शक्यते, प्रत्यक्षबाधकप्रसङ्गादिति भावः । ज्ञाने तु नात्मवद् द्विशक्तिकत्वं शक्यते कल्पयितुं, प्रमाणान्तराभावादिति । एतदप्युक्तमित्याह— नत्वत्रेति । यत एवमेकस्य द्विरूपत्वमनुपपन्नम्, अतोऽवश्यमेव ज्ञानाद् भिन्नं नीलादि ग्राह्यमेष्टव्यम्, एवञ्च प्रमाणबलादापद्यमानो वस्तुभेदो न कल्पनागौरवमापादयतीति ॥ १७८ ॥

यदुक्तमनेककल्पनाया एककल्पना ज्यायसीति, तत् परिहृतं, नखलु प्रत्यक्षसिद्धोऽर्थः कल्पनीयः । नच तद्बलभाविनी ज्ञानकल्पना शक्यते वारयितुम् । प्रमाणवन्ति सुबहून्यप्यदृष्टानि कल्पनीयान्येव । अत एवोभय

उपायत्वाच्च यत् तस्य पूर्वग्रहणकल्पनम् ॥ १७९ ॥
चक्षुरादीन्द्रियैरत्र तदनैकान्तिकं भवेत् ।
यदप्यप्रतिबद्धत्वादुत्पत्तौ गृह्यतामिति ॥ १८० ॥
तत्रात्मना न शक्यं तन्नान्योत्पत्तिस्तदस्ति वा ।
तेनैतत् कारणाभावात् तदानीं नानुभूयते ॥ १८१ ॥

सिद्धत्वाद् ज्ञानस्याकारकल्पना न्याय्येति यदुक्तं तदपि प्रत्याख्यातम् । यदि हि वयमाकारं दृष्ट्वा कस्यायमिति तदाश्रयमन्विच्छेम तदोभयसिद्धत्वाद् ज्ञानाकारोऽयमित्युच्येतापि । प्रतिष्ठिताश्रयमेव तु प्रत्यक्षसामर्थ्यादाकारमवगच्छन्तो नास्याश्रयान्तरमीहामहे । नचैवास्माकमसिद्धेऽर्थाकारे ज्ञानमपि सिद्धं येनोभयसिद्धं भवेत् । नहि तन्निराकारमनुभूयते । प्रत्यक्षेणार्थ एव हि ज्ञातस्तस्य प्रमाणं भविष्यति । स चेदनिष्टो नास्य कल्पनायां प्रमाणमस्तीति कथमुभयसिद्धत्वं, तदेतदाह — **तस्मादिति**। आदिशब्देन शक्तिमात्रस्य भेद इति यदुक्तं तदुपादत्त इति । उक्तदोषपरिहारप्रपञ्चम् अतः परमारभमाणः यत्तावदुक्तमुपायत्वाद् ज्ञानमेव प्रथममवगन्तव्यमुपायाधीनसिद्धित्वादुपेयानाम्, नच तदाकारमन्तरेण प्रतीयत इति ज्ञानाकार एवायमिति, तत् तावत् परिहरति — उपायेति । सत्यम् अर्थसिद्धावुपायो ज्ञानं, न त्ववश्यमुपायग्रहणाधीनमुपेयावधारणम् । नहि चक्षू रूपपरिच्छेदोपाय इति ततः पूर्वमनुभूयते । यत्तूपायत्वात् प्रथममवगन्तव्यमिति, तत् तैरेव चक्षुरादिभिरनैकान्तिकमिति नोपायस्य सतो ज्ञानस्य पूर्वानुभवं साधयितुमलमिति ॥ १७९½ ॥

यत्पुनरुक्तम् — उत्पन्नस्य सतोऽप्रतिबद्धस्य ज्ञानस्य नाग्रहणकारणमस्ति अतो ग्रहीतव्यमिति, तदनुभाष्य परिहरति — **यदपीति** । अयमभिप्रायः — सत्यं ज्ञानमुत्पन्नमप्रतिबद्धं केनचित् । नत्वेतावतैव ग्रहीतव्यं भवति, ग्राहकाभावेनाग्रहणोपपत्तेः । न तावदिदमात्मनात्मानं ग्रहीतुं शक्यमित्युक्तम् । अन्यच्च, ज्ञानं तदा नोत्पन्नमेव अर्थापत्तिर्हि सा । सा च पश्चादेव भविष्यतीत्यतः सतोऽपि ज्ञानस्य ग्रहणकारणाभावादग्रहणं युक्तमेवेत्याह — **तेनेति** ॥ १८१ ॥

नान्यथा ह्यर्थसद्भावो दृष्टः सन्नुपपद्यते ।
ज्ञानं चेन्नेत्यतः पश्चात् प्रमाणमुपजायते ॥ १८२ ॥
नचापि प्रतिबन्धेन केवलेनाग्रहो भवेत् ।
विशिष्टकारणाभावेऽप्यर्थो नैवानुभूयते ॥ १८३ ॥
व्यापृतं चार्थसंवित्तौ ज्ञानं नात्मानमृच्छति ।
तेन प्रकाशकत्वेऽपि बोधायान्यत् प्रतीयते ॥ १८४ ॥
ईदृशं वा प्रकाशत्वं तस्यार्थानुभवात्मकम् ।

यदि स्वकाले नावगतं, कथं तर्हि पश्चादवगम्यते । अत आह— **नान्यथेति** । अस्ति हि खलु पश्चाद् ज्ञानावधारणे प्रमाणमर्थापत्तिः । ज्ञातार्थान्यथानुपपत्तिप्रभवा सा प्रागज्ञातेऽर्थे न जायते, पश्चादुपजायत इति युक्तमेव प्रमाणसद्भावादुत्तरकालमेव ग्रहणम् । परिचोदनापरिहारश्चोक्त एवेति नेह प्रतन्यत इति ॥ १८२ ॥

नन्वस्तु तावत् परस्तात् प्रमाणसद्भावः, पूर्वमपि त्वप्रतिबन्धस्य कस्मादग्रहणमत आह— **नचेति** । नह्यप्रतिबन्धमित्येव वस्तूपलभ्यते । अप्रतिबन्धस्याप्यनुपलम्भनात् । कारणसामग्रीविशेषसमवधानसम्पादितं हि भावानां ग्रहणम् । तदप्रतिबन्धानामपि तदभावे न भवति । किमनुपपन्नमिति ॥ १८३ ॥

का पुनर्ज्ञानग्रहणे सामग्री । यदि ज्ञानं, किम(न्य? स्य)ज्ञानान्तरेण । नन्विदमेव स्वभावतो ज्ञानं प्रकाशात्मकम्, अप्रकाशात्मनां तु भावान्तराणामप्रतिबद्धानामप्यस्तु प्रकाशान्तरापेक्षा । अत एवोक्तं 'नचाप्रकाशरूपत्वम्' इति । अतो नोत्पन्नस्य ज्ञानस्याग्रहणे कारणमुपलभामहे — अत आह — **व्यापृतमिति** । सत्यम् प्रकाशकं ज्ञानं, तथापि नात्मानं प्रकाशयति अर्थसंवित्तौ व्यापृतत्वात् । नहि बहिर्विषयप्रकाशने व्यापृतः प्रदीपः आत्मानमपि प्रकाशयति । तत्प्रकाशने चक्षुषोऽपेक्षणात् । अतो युक्तमेव प्रकाशात्मनोऽपि स्वबोधायान्यापेक्षणमिति ॥ १८४ ॥

अथवा प्रकाशकं ज्ञानमित्येव कुतः, अर्थापरोक्षीभावो हि तस्य तथात्वे प्रमाणम् । ततश्चार्थानुभवस्वभावमेव तत् सिध्यतीति न स्वात्मानमपि प्रकाशयतीत्याह — **ईदृशमिति** । एवमपि स्वात्मानं प्रकाशयेद्

नचात्मानुभवोऽस्त्यस्येत्यात्मनो न प्रकाशकम् ॥
सति प्रकाशकत्वे च व्यवस्था दृश्यते यथा ।
रूपादौ चक्षुरादीनां तथात्रापि भविष्यति ॥ १८६ ॥
प्रकाशकत्वं बाह्येऽर्थे शक्त्यभावात् तु नात्मनि ।
अन्येन वानुभावेऽसावनवस्था प्रसज्यते ॥ १८७ ॥
तत्र तत्र स्मृतिं दृष्ट्वा सर्वानुभवकल्पना ।
एकेन त्वनुभूतत्वे सर्वं तत्रैव सम्भवेत् ॥ १८८ ॥
तत्रापि स्मृतिरित्येतन्न लोकानुमतं वचः ।
नहि विज्ञानसन्तानं कश्चित् स्मरति लौकिकः ॥

यद्यर्थवद् ज्ञानात्मापि ज्ञानजन्मन्यनुभूयते, न त्वसावनुभूयते इत्युक्तमेवेत्यभिप्रायेणाह — नचेति । नच यदेकस्य प्रकाशकं तेन सर्वस्यैव प्रकाशकेन भवितव्यम् । नहि चक्षुरादीनीन्द्रियाणि प्रकाशकान्यपि विषयतः सङ्कीर्यन्ते, व्यवस्थाया उक्तत्वात् । एवमिहापि बाह्यस्य प्रकाशकं ज्ञानं, नात्मन इति न नोपपन्नमित्याह — सतीति सार्धेन । प्रकाशकपदोपचारस्तु कथञ्चित् प्रकाशे कर्तृभावमाश्रित्य वक्तव्यः । अन्यथा हि प्रकाशानन्त्यं भवेदित्युक्तमेवेति ॥ १८६½ ॥

यत्तूक्तं —

"तस्य तस्यापि चान्येन संवित्तावस्थितिर्भवेत् ।"

इति, तद् दूषयितुमनुभाषते—अन्येनेति सार्धेन । एवं हि परैरुक्तं—यदि किल ज्ञानान्तरेण ज्ञानं ज्ञायते, ततस्तस्य तस्य ज्ञानस्य स्मरणात् पूर्वानुभवकल्पनायामनवस्था भवेत् । एकेन तु ज्ञानेन विषयाकारे स्वाकारे च प्रवेदिते सर्वमेव ग्राह्यग्राहकाकारस्मरणं तत्रैव स्यात् । तथाचानवस्था परिहृता भवति । तस्मान्न ज्ञानान्तरेण वेद्यं ज्ञानमिति ॥ १८८ ॥

एवमनुभाषिते दूषणमाह — तत्रापीति । यदेतदुच्यते तत्र तत्र स्मरणदर्शनेन सर्वत्रानुभवकल्पनायामनवस्थेति, तदयुक्तम् । स्मृत्यसिद्धेः । गृहीतविषया हि स्मृतिर्भवतीति नागृहीतं ज्ञानं स्मर्तुं शक्यम् । गृहीतस्मरणे तु यावद्ग्रहणमेव स्मरणव्यवस्थानान्नानवस्थेति वक्ष्यते । भवति हि

घटादावगृहीतेऽर्थे यदि तावदनन्तरम् ।
अर्थापत्त्यावबुध्यन्ते विज्ञानानि पुनः पुनः ॥ १९० ॥
यावच्छ्रमं ततः पश्चात् ताव(त्ये ? न्त्ये)व स्मरिष्यति ।
तदा त्वकल्पितेऽप्येवं स्मृतिर्वन्ध्यासुतादिवत् ॥
स्मृतिभ्रान्तिश्च याप्यत्र पश्चाज्ज्ञानेषु जायते ।
तदैवार्थस्मृतेरेषां तज्ज्ञानादिप्रमाणता ॥ १९२ ॥
यावच्छ्रमं च तद्बुद्धिस्तत्प्रबन्धे महत्यपि ।
श्रमाद् रुच्यान्यसम्पर्काद् विच्छेदो विषयेष्विव ॥

कदाचिदेतद् द्वित्राणि ज्ञानान्यनुभूतपूर्वाणि स्मर्यन्त इति । विज्ञानसन्तान-स्मरणं त्वलौकिकमेवेति ॥ १८९ ॥

यदि त्वर्थज्ञाततान्यथानुपपत्त्या ज्ञानमवगम्य पुनस्तज्ज्ञाततावशेन तद्विषयं ज्ञानान्तरं कल्पयति, पुनश्चानेनैव क्रमेण यावच्छ्रमं ज्ञानानि ज्ञातानि । ततो यावज्ज्ञातस्मरणाद् नानवस्थेत्याह—घटादाविति सार्धेन । यत्तु प्रागनवगतानामेव ज्ञानानां स्मरणमुच्यते, तद् वन्ध्यासुतादिस्मरण-तुल्यमशक्यमेव वक्तुमित्याह — तदेति ॥ १९१ ॥

यत्तु भिक्षुणा सिद्धवत् तत्रापि स्मृतिरित्युक्तं, तद् भ्रान्तभाषित-मेव । अस्ति च भ्रान्तौ निबन्धनम् । अर्थो हि तत्र स्मर्यते । तत्स्मरणान्यथा-नुपपत्त्या च तस्य प्राग् ज्ञाततैव कल्प्यते । ततोऽपि प्राचीनज्ञानकल्पना । तदिह संसर्गमोहेतावियां ज्ञानेऽपि स्मृतिविभ्रमः । न त्वाद्यज्ञानस्मरणम-प्याशङ्क्यम् । प्रागेव सन्तानस्मरणं, तदेतदाह — स्मृतिभ्रान्तिरिति । अर्थस्मृतेः खल्वियं तज्ज्ञानादिप्रमाणता विलसति, यदेतज्ज्ञानेऽपि स्मृतिभ्रमो भवति । अर्थस्मृत्या हि ज्ञाने प्रमीयमाणे स्मृतिविषयार्थसन्निकर्षाद् ज्ञानेऽपि स्मरणमिति भ्राम्यति । आदिशब्देन चात्र ज्ञानज्ञानमुपादीयत इति ॥ १९२ ॥

स्मृत्यापि ज्ञानप्रमायां यावच्छ्रमं तद्ग्रहणाद् विषयान्तरसञ्चारोप-पत्तिरित्याभिप्रायेणाह — यावदिति । अयमभिप्रायः— न तावन्ति ज्ञा-नानि जायन्ते यदि तु ज्ञातुमिष्यन्ते यावच्छ्रमं तद्बुद्धिर्भविष्यति या-वन्ति ज्ञानानि बुध्यमानो न श्राम्यति । स्मृत्यनुसारेणापि तावद् भोत्स्यते

तत्रापि स्मृतिरित्येषा प्रथमे प्रत्यये यदि ।
तन्मात्रग्रहणादेवं नानवस्था प्रसज्यते ॥ १९४ ॥
स्मरणं त्वथ सर्वेषु तत्सिद्ध्यै ग्रहणं तथा ।
प्रमाणवत्त्वादायातः प्रवाहः केन वार्यते ॥ १९५ ॥
अथ तान्याद्यविज्ञानविषयाणीति कल्प्यते ।

इत्यभिप्रायं विवृणोति — तत्प्रबन्ध इति । यावच्छ्रमं तावद् बुद्धयो ज्ञायन्ते, ततो महत्यपि बुद्धिप्रबन्धे ज्ञाते श्रमाद् वा विषयान्तराभिलाषेण वान्यसम्पर्काद् बुद्धिज्ञानाद् विच्छेदो भवति । यथा विषयेष्वेव रमणीयेषु गीतादिष्वनुभूयमानेषु विषयान्तराभिलाषात् पूर्वविषयविच्छेदो भवतीत्यनुपपन्नं विषयान्तरसञ्चारो न स्यादिति ॥ १९३ ॥

किञ्च यदेतदुक्तं तत्रापि च स्मृतिरिति, तत् किं प्रथमज्ञानाभिप्रायेण, उत तत्रतत्रेति वीप्सामभिप्रेत्य । पूर्वस्मिन् कल्पे नानवस्था । एको हि प्रथमः प्रत्ययः । अतः का तद्ग्रहणेऽनवस्था, तदेतदाह — तत्रेति ॥ १९४ ॥

यदितु संवित्प्रवाहमेवाभिप्रेत्य तत्रापि स्मृतिरित्युच्यते, तन्न तावदस्तीत्युक्तम् । उपेत्यापि ब्रूमः । यदि बहून्येव परस्ताद् ज्ञानानि स्मर्यन्ते, ततो ग्रहणकारणत्वात् स्मृतेस्तत्सिद्धये ग्रहणान्यपि कल्पयिष्यामः । कथमपरथा गृहीतविषया स्मृतिर्भविष्यति । न त्वेवमपि ज्ञानान्तरनिरपेक्षमेव ज्ञानमवसीयत इति युक्ता कल्पना, स्वसंवित्तिप्रतिषेधात् । अतो वरं प्रमाणबलादायातः संवित्प्रवाहः, नपुनः स्वसंवित्तिकल्पनेत्यभिप्रायेणाह — स्मरणमिति । पूर्वं च घटादौ गृहीत इत्यत्र यद्येवं स्याद्, एवं सति तत्रापि स्मृतिरित्युपपद्येत । तथा नानवस्था, यावदवगतस्मरणात् । न त्वेतदप्यस्तीति तद् दर्शितम् । इदानीं तु यद्युत्तरोत्तरविषयाः स्मृतयो दृश्यन्ते ततस्तद्दर्शनाद् ग्रहणप्रवाहकल्पनैव प्रमाणवती, न स्वसंवित्तिकल्पनेति विवेक इति ॥ १९५ ॥

यदि तूच्यते, सत्यम् अस्त्ययं ग्रहणप्रवाहः । किन्त्वाद्यज्ञानगोचराण्येव तानि ग्रहणानि । ज्ञानमेव हि तत्राद्यं नार्थः । ज्ञानमेव विषयाकारेण

नोत्तरोत्तरबुद्धीनां विशेष उपपद्यते ॥ १९६ ॥
विज्ञानविषयत्वं च यस्य सर्वासु बुद्धिषु ।
घटविज्ञानतज्ज्ञानविशेषस्तेन दुर्लभः ॥ १९७ ॥
स्मरन् यथैव विज्ञानं निराकारं स्मरत्ययम् ।
तथा स्मरन् गृहीतार्थं निराकारतया स्मरेत् ॥

स्वाकारेण च निरूप्यते । तद्विषयं च तत्स्मरणमन्यत् । एवमेवापरमिति न किञ्चिदर्थविषयज्ञानमित्याशङ्क्या सहाह — अर्थेति । अयमभिप्रायः — सारूप्येण हि विषयभावः । तद् यदाद्यविज्ञानविषयमेकम्, एवं सति तत्तावत् ततोऽविलक्षणं प्रथमवद् घट इत्येव भवेत् । एवं तृतीयाद्यपीति नोत्तरोत्तरबुद्धयो भिद्येरन् । अर्थवादिनस्तु प्रथममर्थविषयं घट इति ज्ञानं, द्वितीयं तु ज्ञानविषयं, तृतीयज्ञानं तु ज्ञानज्ञानविषयम् । अनाकारत्वेऽपि चाकारवतामिव स्वाभाविकः संविदां भेद इत्युक्तमेवेत्याकारप्रचयदर्शनमुपपद्यते ज्ञानेषु जिज्ञासितेषु, नतु बौद्धस्येति विपरीतप्रसङ्गोऽभिहितः । एतच्च प्रथमज्ञानस्य स्वसंवित्तिमभ्युपेत्योच्यते । प्राङ् निराकृतोऽप्ययं ज्ञानविषयत्वपक्ष इदानीं दूषणान्तराभिधित्सया पुनरुपक्षिप्त इति ॥ १९६ ॥

अयं चापरो विज्ञायते न विषये बुद्धीनां दोष इत्याह — **विज्ञानेति** । अयमर्थः—यस्य सर्वा बुद्धयो विज्ञानविषयाः, तस्य घटज्ञानं घटज्ञानज्ञानं वा विज्ञानविषयत्वान्न भिद्यत इति ॥ १९७ ॥

अविशेषमेव दर्शयति—**स्मरन्निति** । एष हि ज्ञातपूर्वमर्थं कदाचित् प्रस्मृतवान् विज्ञानमनाकारं स्मरति अर्थं च सर्वदा साकारं घट इति, तन्नोपपद्यते । प्रस्मृतार्थविषयविज्ञानस्मरणं ह्यनाकारमेव द्रष्टम् । एवं स घट इत्यपि स्मृतिविज्ञानं विज्ञानविषयमेवेति तदप्यनाकारमेव भवेत् । साकारत्वे वा प्रस्मृतार्थविज्ञानस्मृतेरपि साकारत्वप्रसङ्गोऽविशेषात् । अतो योऽयं घटविषयस्य स्मृतिविज्ञानस्य प्रस्मृतघटविज्ञानविषयस्य च स्मृतिविज्ञानस्य विशेषः, स विज्ञानविषयत्वे बुद्धीनां न भवेत् । अतः काचिद् विज्ञानविषया काचिदर्थविषयेति साकारानाकारभेदसिद्धिरिति ॥ १९८ ॥

ज्ञानप्रष्ठेन योऽप्यूर्ध्वं परामर्शो भवत्यसौ ।
तस्यार्थेष्वभ्युपायत्वान्न तु ग्राह्यत्वकारितः ॥ १९९ ॥

प्रत्यासन्नत्वसम्बन्धौ ग्राह्यत्वासम्भवाच्च्युतौ ।
विषयत्वेन वाप्येतौ स्तः किं देशाविभागतः ॥ २०० ॥

यदपि प्राग् ज्ञानस्य संवेदनमित्यत्र कारणमुक्तं ज्ञानप्रष्ठेनैं परामर्शदर्शनं, तदपि न युक्तम्। न ह्ययं ज्ञानप्रष्ठेन परामर्शो ज्ञानस्य ग्राह्यताकृतः। किन्त्वर्थस्थितौ ज्ञानमभ्युपाय इति तदनुसार्यर्थकथनं ज्ञातोऽसावर्थो मयेति। तदिदानीमेव च स्मृतेस्तत्र ज्ञानानुमानम् । न तु प्रागेव ज्ञानपुरस्सरमसौ ज्ञातः । यदा तु कश्चित् तथाविधार्थसदसद्भावयोः पर्यनुयुङ्क्ते, तदा ज्ञानोपायत्वादर्थस्य ज्ञानपुरस्सरमर्थस्थापनं भवत्यासीदसावर्थः यस्मान्मया पूर्वमवगत इति । अतो नानेन ज्ञानस्य पूर्वोपलब्धिः शक्या कल्पयितुम् । तदेतदाह — **ज्ञानप्रष्ठेनेति** ॥ १९९ ॥

यत्तूक्तं ज्ञानाकारपक्षे प्रत्यासन्नं सम्बद्धं ग्राह्यं भवति, इतरथासम्बन्धमतिदूरवर्ति च ग्राह्यमभ्युपगतं भवतीति । तत् परिहरति — **प्रत्यासन्नेति** । अयमभिप्रायः — यथाकथञ्चिन्नैकात्म्ये ग्राह्यग्राहकभावः सम्भवतीत्युक्तम् । तदा किं कुर्मोऽसम्बन्धमसन्निहितं च ग्राह्यमनुजानीमो न खलु दूरदेशा(न्दी ? दि)वार्ताभ्यो हृदयमनुविपरिवर्तमाना भावा न गृह्यन्त इति शक्यते वक्तुं संविद्विरोधादिति । एवं तावदसम्भवादासत्तिसम्बन्धौ न स्यातामित्युक्तम्। न वा हीयेत । नहि देशाविभाग एव सर्वत्र सम्बन्धः। विषयविषयिभावोऽपि हि सम्बन्ध एव । अस्ति चासौ ज्ञानार्थयोः । ज्ञानोत्पत्तौ तदवष्टेरिदमेव च तस्य सन्निधानमर्थेन यदुत्पन्ने तस्मिन्नर्थो भासत इत्यभिप्रायेणाह — विषयेति । किं पुनरिदमर्थो भासत इति । न ज्ञानादन्यदर्थस्य भासनम् । संवित्तौ वा कथं विषयाकारो भासते । एवंतर्हि नास्ति तदभावे चान्यानवभासनादभाववाद एव । तदवश्यास्थेयमिदं ज्ञानोत्पत्तावभूतपूर्वो भावानां कोऽपि भेदः सकलप्रमातृप्रत्यात्मवेदनीयः । ते तु भावा ज्ञानाकारा बहिर्वेत्यन्यदेतत् । येऽपि फलभूतामर्थसंविदं स्वप्रकाशामाहुः, तैरपि कोऽप्यनिर्वचनीयोऽर्थगतो विकारो दर्शयितव्य एव। कथ-

अर्थाकारस्य योऽप्युक्तो मिथ्याज्ञानेष्वसम्भवः ।
देशकालान्यथामात्रसम्भवः केषुचित् कृतः ॥२०१॥
प्रत्यक्षादन्यविज्ञानमतीतानागतैरपि ।

मन्यथा संवित्प्रकाशेऽर्थः सिध्येत् । न ह्यन्यप्रकाशेऽन्यत् सिध्येद्, अतिप्रसङ्गात् । अन्या च संविदान्तरा, अन्यो बहिरर्थः । सोऽपि भासत इति चेत्, तद्वदेव तर्हि सोऽपि स्वप्रकाश एव । संविदायत्तो न स्वप्रकाश इति चेद्, नन्विदमेवास्माभिर्जिज्ञास्यते किमस्य संविदायत्तत्वमिति । स्वरूपं तावत् स्वकारणसामग्र्यायत्तमेव । प्रकाशोऽपि तस्य संविदेव न तदायत्तः । तदवश्यमप्राप्तपूर्वस्य काचित् फलोत्पत्तावस्ति प्राप्तिरित्यास्थेयं यदायत्तोऽस्य संवेदनं नान्यस्येति विवेकः । सैव चास्माभिर्ज्ञाततादिपदैरभिधीयते । अतः सिद्धं विषयत्वेनापि प्रत्यासत्तिसम्बन्धौ स्त इति ॥ २०० ॥

योऽपि मिथ्याज्ञानेष्वर्थाकारसम्भव उक्तः, तमनुभाष्य परिहरति — अर्थेति । अयमर्थः — योऽयं द्विचन्द्रादिबोधेष्वर्थाकारासम्भव उक्तः, सोऽयुक्तः । तथाहि । सम्यग्ज्ञानेषु तावन्नार्थाकारासम्भवः । केषुचित्तु मिथ्याज्ञानेषु देशान्यथात्वमात्रेण कालान्यथात्वमात्रेण वार्थाकारसम्भवोऽस्माभिः कृतः निरालम्बनवादे वर्णित इति यावत् । अतो न क्वचिदर्थाकारासम्भवः तत् पुनरिदं प्रतिभासविपरीतमभिधीयते । देशान्तरादिस्थोऽर्थो भासते, अन्यत्र स्थितश्चार्थोऽन्यत्रालम्ब्यत इति संविदनुसारेण हि भवन्तो बहिरर्थमवस्थापयन्ति । सा च देशान्तरादिगोचरा कथमन्यत्रार्थमालम्बत इति शक्यते वक्तुम् । एवं हि स्वांशालम्बनत्वेन किमपराद्धं येन तन्निराक्रियते । मैवम् । उक्तमस्माभिर्निरालम्बनवाद एव बाधकानुसारिणी हि मिथ्यात्वकल्पना । बाधकं च देशादिसंसर्गमेव वारयति, नहि बहिर्वस्तुसत्ताम् । तद्धि न द्वौ चन्द्राविति चन्द्रद्वित्वं निषेधति, न द्वित्वं चन्द्रं वेति कथं तौ बहिर्भासमानावपहास्यामः । अतो नेह संविद्विपरीतं किञ्चिदिति ॥ २०१ ॥

स्यादेतत् । कथमतीता अर्था असन्तो ज्ञानावलम्बनमिति । उक्तपरिहारत्वात् । उक्तं हि प्रत्यक्षधर्मो वर्तमानसन्निहितविषयता ज्ञानान्तराणां

जन्यतेऽर्थे भवन्तीषु वासनास्वसतीषु वा ॥ २०२
यः पुनर्नानुभूतोऽर्थो न चाप्यनुभविष्यते ।
वासनाभावतस्तत्र तवाप्यनुभवः कथम् ॥ २०३ ॥
विनापि वासनातश्चेद् बुद्धिरुत्पद्यते ततः ।

नेति निरालम्बन एव, तदेतदाह — प्रत्यक्षादिति । यत्तावल्लैङ्गिकमतीतादिगोचरं ज्ञानं तत् प्रत्युत्पन्नलिङ्गादिजनकमसतीष्वेव वासनासु भवति । यत्त्वन्यज्जाग्रत्स्मृति ज्ञानं स्वप्नज्ञानं वा, तद् भवन्तीषु वासनासु भवति प्रत्युत्पन्नकारणान्तराभावादिति ॥ २०२ ॥

ये ह्यत्यन्तानुभूता अर्था अनुभूयन्ते, तत्र वासनादिकारणान्तरासम्भवान्नास्ति ज्ञानाकारत्वादन्या गतिरत आह — य इति । अयमभिप्रायः — तवापि तथाविधानुभवे किं कारणं, बौद्धोऽपि वासनामेव ज्ञानकारणं मन्यते । नचात्यन्तानुभूतपूर्वेऽर्थे वासना सम्भवति, अर्थज्ञानाहितसंस्काराभिधानत्वाद् वासनाशब्दस्य । स्यादेतत् । न ज्ञानजन्मा संस्कारो वासना । किन्तु ज्ञानमेव किञ्चिदनवगतपूर्वार्थसंवेदनकार्योन्नेयशक्तिभेदमिति । तन्न । लोके तथानवगमात् । ज्ञानयोनिरेव संस्कारो वासनेति लौकिका मन्यन्ते, न ज्ञानमेव । अपिच, समनन्तरज्ञानमतदाकारं, तत् कथं तदाकारां धियमुपजनयितुमलं

"तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः ।"

इति वैः सिद्धान्तः । यदि त्वयमपि कार्यकारणभावो नेष्यते, अस्तु तर्हि कादाचित्कमप्यनपेक्षमेव ज्ञानम् । किं समनन्तरप्रत्ययाधीनव्यसनेन । अतोऽवश्याश्रयणीया काचिज्ज्ञानाद् भिन्ना वासना, योद्भूता सती विसदृशसन्तानतिरोधानेन सदृशमेव ज्ञानमारभत इति भवद्भिरप्यास्थेयम् । नचात्यन्तानुभूतेषु सा सम्भवतीति तुल्यत्वमावयोः । नचाप्यनुभविष्यत इत्यात्यन्तिकवासनासम्भवप्रकटनार्थं, नतु भविष्यतोऽनुभवस्य कश्चिद् वासनायामुपयोग इति ॥ २०३ ॥

यदि तु अनादेत्यैव वासनां ज्ञानोत्पत्तिराश्रीयते, एवन्तर्हि यच्चिरन्तनै-

वासनायां निमित्तत्वमभ्युपेतं विरुध्यते ॥ २०४ ॥
वासना चेद् भवेत् तत्र सा च संवित्तिपूर्विका ।
तथा सति च पूर्वत्र गृहीतः क्वाप्यसौ ध्रुवम् ॥ २०५ ॥
एवं च नैव वक्तव्यमत्यन्ताभवनं क्वचित् ।
अन्यथानुपपत्त्या हि सिद्धा जन्मान्तरेऽस्तिता ॥२०६॥
दुष्टत्वेन च विज्ञानमन्यथापि व्यवस्थितम् ।
पृथिव्यादिषु गृह्णीयादाकारं तन्निबन्धनम् ॥ २०७॥

बौद्धैर्वासनायां निमित्तत्वमाश्रितं तद् विरुध्यत इत्याह— **विनेति** ॥२०४॥

तत्रापि तु वासनाभ्युपगमे तस्याः संवित्कारणत्वादसावननुभूतोऽप्यर्थ इह जन्मनि क्वापि जन्मान्तरादावनुभूत इत्यभ्युपेय इत्याह— **वासनेति** ॥ २०५ ॥

किमतो यद्येवमत आह — **एवं चेति** । अभवनमभावः । दुःस्वप्नेऽनुभूयमानस्य संसर्गस्य न कस्यचिदत्यन्ताभाव इति । किं पुनस्तद्भावे प्रमाणमत आह — अन्यथेति । ज्ञानं हि कार्यं न तावदकारणकं निष्पद्यते । न चास्य प्रत्युत्पन्नेन्द्रियादिकारणं किञ्चिदुपलभ्यते । स्वप्ने न चेद् वासनापि कारणं न स्यादेव । न चासौ पूर्वज्ञानमन्तरेण भवति । तद् यदि नेहासावर्थो ज्ञातः, नूनं जन्मान्तरेऽनुभूत इति ॥ २०६ ॥

ये तर्ह्यत्यन्तासम्भावनीयज्ञानार्थाः स्वशिरश्छेदादयः, तेऽसम्भवद्वासनाः कथमवसीयन्ते । अतस्तत्र ज्ञाना(कार)कल्पनैव साधीयसी नार्थाकारकल्पना, अत आह — **दुष्टत्वेनेति** । अयमभिप्रायः — यदा न कथञ्चित् स्वसंवेदनं ज्ञानमित्युक्तं तदा य एवैते पृथिव्यादयोऽर्था बहिरवस्थिता गृह्यन्ते, तेष्वेव कुतश्चित् कारणदोषाद् दुष्टं विज्ञानमन्यथास्थितमाकारं गृह्णाति । अदुष्टं तु यथावस्थितम् । न क्वचिदपि ज्ञानाकारानुभवः । **तन्निबन्धनमिति** । पृथिव्यादिनिबन्धनमित्यर्थः । पृथिव्यादिसूक्ष्माण्येव हि स्थूलारम्भे कारणम् । एतेन कल्पनानिबन्धनत्वं प्रधाननिबन्धनत्वं च निराकरोति । न तावत् कल्पनानिबन्धनत्वमबाधितत्वात् । न प्रधाननिबन्धनत्वमप्रमाणकत्वात् । दृश्यते तु सूक्ष्मतरादिक्रमेण पृथिव्यादीनामेव कार्यद्रव्येष्वारम्भ-

तानपास्य तु नैवार्थे क्वचिदाकारकल्पना ।
न ज्ञानं ह्यनवष्टम्भमात्मानं लब्धुमर्हति ॥ २०८ ॥
विज्ञानस्यैव वाकारो यद्येषोऽन्ये च कल्पिताः ।
विशेषः कोऽत्र येनायमत्यन्तासन्निती‌ष्यते ॥ २०९ ॥
तस्माद् भ्रान्तिरपि त्वेषां कल्पयन्त्यर्थमेव नः ।
कल्पयत्यन्यथा सन्तं न त्वात्मानं व्यवस्यति ॥ २१० ॥
ततश्च बाधकज्ञानाद् वाचोयुक्तिरियं भवेत् ।
अर्थेऽन्यथापि सत्येव धियाकारः प्रतीयते ॥ २११ ॥

कत्वमिति तदेव द्व्यणुकादिक्रमेणाश्रीयते । शिरश्छेदश्चान्यगोचरोऽवगतः स्वसम्बन्धितयावगम्यत इत्यन्यथा व्यवस्थानमिति ॥ २०७ ॥

तांस्तु पृथिव्याद्यर्थानपास्य न क्वचिदर्थान्तरे शब्दात्मके ज्ञानात्मके वाकारकल्पना युक्तेत्याह — **तानिति** । कारणमाह — **नेति** । पृथिव्याद्युपष्टम्भशून्यं न किञ्चिज्ज्ञानमात्मानं लभते । किञ्चिद्धि पृथिव्यादिद्रव्यगोचरं, किञ्चिद्धि रूपादिगुणविषयं, किञ्चिद् गवादिसामान्यगोचरम्, अन्यच्चोत्क्षेपणादिकर्मगोचरमवगतमिति ॥ २०८ ॥

अपिच यदि सर्वोऽयं ज्ञानमनुभासमान आकारो ज्ञानस्यैवान्ये च पृथिव्यादयो भावाः कल्पिताः, एवन्तर्हि सर्वसंविदामेवात्यन्तासन्नर्थ इति केन विशेषेणायं स्वप्नादिभ्रमाणामत्यन्तासन्नर्थ इष्यते येनैवमुपालभ्येमहि कथमत्यन्तासन्नर्थः स्वप्नादिविज्ञानेऽवसीयते इति तदेतदाह — **विज्ञानस्येति** । अत्र स्वप्नादिज्ञान इत्यर्थः ॥ २०९ ॥

अतः सिद्धं भ्रान्तिज्ञानान्यप्यर्थमेवान्यथा स्थितमन्यथा कल्पयन्ति, न पुनरात्मानमवस्यन्तीत्याह — **तस्मादिति** ॥ २१० ॥

यदितर्हि सर्वसंविदामेव बाह्यालम्बनत्वं, किं तर्हि बाधकेन बाध्यते अत आह — **ततश्चेति** । बाधकेन न बाह्यं प्रतिक्षिप्यते, किन्तु बाधके सतीयं वाचोयुक्तिर्भवति यदन्यथा सत्यप्यर्थेऽयमाकारो दुष्टकारणजनितया धिया प्रतीयते न त्वनर्थिकेयं धीरिति ॥ २११ ॥

द्विचन्द्रादावपि त्वेवं तारकादिमतौ तथा ।
स्त्रीत्वाद्यन्यत्र दृष्टं स्यात् कथञ्चिद् वेह सम्भवेत् ॥
शब्दमात्रप्रतीत्या वा दृष्टैर्वा कैश्चिदिङ्गनात् ।
संस्त्यानप्रसवस्थानैर्यथा पातञ्जले मते ॥२१३॥

एवं तावद् वासनानिबन्धनेषु स्वप्नादिविभ्रमेषु अर्थाकारो दर्शितः । बाधकप्रत्ययार्थश्च व्याख्यातः । एतदेवेन्द्रियविभ्रमेषु द्विचन्द्रादिविषयेष्वतिदिशति — द्विचन्द्रादावपित्वेवमिति । यत्तूक्तं नैकत्रार्थे लिङ्गानेकत्वं सम्भवतीति । तत्र परिहारमाह — तारकादीति स्यादन्तेन । अयमभिप्रायः — तारकादिमतावपि स्त्रीत्वादिप्रत्ययो भ्रान्तिरेव । प्राणिधर्मत्वाल्लिङ्गभेदानामप्राणिष्वसम्भवाद् भ्रान्त्यैवान्यत्र दृष्टमन्यत्रारोप्यते । अतोऽन्यत्र दृष्टमेव स्त्रीत्वादि तारकादिमतावालम्बनमिति । कथं पुनस्तारकादिषु स्त्रीत्वादिप्रत्ययो भ्रान्तिरित्युच्यते । न ह्यत्र द्विचन्द्रादिबोधेष्विव बाधको दृश्यते । तमन्तरेण तु भ्रान्तिवादिनामेव भ्रान्तिरापाद्येत, अत आह— कथमिति । अयमभिप्रायः — सत्यम् । न भ्रमस्तारकादिषु, वास्तवानामेव स्त्रीत्वादीनां सम्भवात् । ते हि स्त्रीपुन्नपुंसकलिङ्गेभ्यस्तारका तिष्यो नक्षत्रमिति शब्देभ्यः प्रतीयन्ते । नच प्रतीयमाना न सन्तीति युक्तं वक्तुम् । यत्तु प्रमाणान्तरान्नावगम्यते, नायं दोषः । शब्दैकप्रमाणकत्वात् । नचैकप्रमाणावगतोऽर्थः प्रमाणान्तरेणानवसीयमानोऽसन् भवति । अतो येयं शब्दमात्रादुपजाता प्रतीतिस्तयैव स्त्रीत्वादयः संविदिता इति पारमार्थिका एवेति । अयमपि तु शब्दैकप्रमाणकत्वपक्षोऽतितुच्छ एव । न खलु पदतद्धागानाम गृहीतसम्बन्धानां प्रतिपादकत्वमस्ति । नच प्रमाणान्तरावेद्येन वस्तुना सम्बन्धो ग्रहीतुं शक्यः । अतो मन्द एवायमपि पक्ष इत्यपरितुष्यन् परिहारान्तरमाह— दृष्टैरिति । न तारकादावदृष्टपूर्वं लिङ्गं, दृष्टैरेव कैश्चिद्रूपैरिङ्गनात् । वक्ष्यमाणान्येव दृष्टानि रूपाणि लिङ्गमिति यावदिति । किं पुनर्दृष्टं रूपं येनात्मना स्त्रीत्वादीनीष्यन्ते अत आह— संस्त्यानप्रसवस्थानै(रिति ।) सत्त्वरजस्तमसां गुणानां यथोत्तरमुपचयः संस्त्यानप्रसवस्थानानि । ते च गुणाः प्राण्यप्राणिसद्भावसाधारणा एव सर्वेषु तद्रूपप्रत्यभिज्ञानात् । सुख-

तेन लिङ्गत्रयस्यात्र सद्भावः स्यात् प्रमाणवत् ।
अपेक्षाभेदतश्चात्र विरोधोऽपि न विद्यते ॥ २१४ ॥

दुःखमोहादिभेदवन्तो हि सर्वे भावाः आश्रयतया जनकत्वेन च प्राणिनः आश्रयतयाप्राणिनः जनकतया रमणीयादिभावव्यवस्थिता हि विषया अप्रार्थिनोऽपि सुखयन्ति दुःखयन्ति मोहयन्ति च । सुखादयश्च सत्त्वादिधर्माः, तद्दर्शनात् त्रैगुण्यं सर्वभावानामवसीयते । तद् यदा सत्त्वोपचयः संस्त्यानाभिधानोऽवगम्यते तदा पुंस्त्वं प्रतीयते । रजसस्तूपचये प्रसवे गम्यमाने स्त्रीत्वं, तमस उपचये स्थाने नपुंसकत्वम् । सा चोदासीनावस्था भावानां न कस्यचित् कार्यस्य सवित्री स्वरूपावस्थानमात्रं, तच्चैतद्रूपं दृष्टमेव सर्वभावेषु । प्राणिनो हि पुमांसः सत्त्वोत्कटा दृश्यन्ते । रजोमय्यो नार्यः । तमोमयाः षण्डाः संमुग्धनिरुद्धाखिलचेष्टाः । एवं तिष्यादीनामप्यापेक्षिकः सत्त्वादीनामुपचयो दर्शयितव्यः । अल्पप्रकाशनक्षत्रान्तरापेक्षया हि पटुप्रकाशः पुमानिति तिष्यो लक्ष्यते । यदा तु तस्यैव रजस उद्भवो लक्ष्यते तदा स्त्रीत्वेन तारकेति । तमसस्तूपचये नक्षत्रमिति नपुंसकत्वेन । एवमेव तटस्तटी तटमित्यादिष्वपि गुणोपचयापचयात्मा लिङ्गभेदोऽनुसन्धातव्यः । एवञ्च सर्वत्रैव पारमार्थिकं लिङ्गत्रयमुपपन्नं भवति । बाधविरहोऽप्यत एवेति सिद्धं नानर्थकास्तारकादिषु लिङ्गप्रत्यया इति । अत्रैव वृद्धानुमतिं दर्शयति— यथेति । पतञ्जलिना हि किं पुनरिदं लिङ्गमिति पृष्ट्वा बहुधा विकल्प्य प्राण्यप्राणिषु दर्शनादविपर्ययाच्चो ? च्चो)भयत्र यथोक्तमेव लिङ्गमुपवर्णितमिति ॥ २१३ ॥

एवञ्चोपपन्नं लिङ्गत्रयमपीत्याह — तेनेति । नन्वस्त्वेवमात्मको भिन्नाधिकरणो लिङ्गभेदः, एकाधिकरणं तु लिङ्गभेदं न मृष्यामहे यस्य हि यत् स्वरूपमुचितं तेनैव तन्नित्यं व्यपदिश्येत । अत आह — अपेक्षेति । तत्तद्भावभेदापेक्षया हि तस्य तस्य गुणस्योपचये लक्ष्यमाणे नैकत्रापि लिङ्गभेदावसायोऽनुपपन्नः पुत्रादिभाव इवैकस्य पुंस इति ।

तत् पुनरिदमुक्तप्रकारं लिङ्गस्वरूपं नानुमन्यामहे पारमार्थिकमप्राणिषु लिङ्गमनुपलभमानाः । प्राण्यवान्तरजातिमेव तु लिङ्गं सञ्जिघृक्षामहे । पश्यामो हि वयं नराश्वमहिषगोवराहादिभेदभिन्नानेकप्राणिगणसाधारणं

स्त्रीत्वादिभेदभिन्नं विविधमवान्तराकारमप्राणिभ्यो व्यावृत्तं यमानन्दसाध-(ना?न)स्तनवदनादिसन्निवेशविशेषा दर्शयन्ति । नच ते अप्राणिष्विति न लिङ्गभेदं प्रतिपद्यामहे । किमिदानीमप्राणिषु लिङ्गावगमो भ्रान्तिरेव । ननु साप्यसति बाधकोदये दुर्भणैव । सत्यम् । गौण त्वप्राणिषु लिङ्गवादः प्रस्तरे-ककपालयोरिव यजमानवादो माणवक इव ज्वलनवादः । नह्यसौ भ्रान्तिः, अभ्राम्यतामेव तथावभासात् । कः पुनर्गुणः यतोऽप्राणिषु गौणो लिङ्ग-वादः । पङ्गल्यादयो ह्यग्निगुणा माणवके वर्तमाना गुणवादहेतवः । नत्विह तथा प्राणिगुणाः कश्चिदप्राणिषु दृश्यन्ते यद्वशेन गुणवादः समाश्रीयते । मैवम् । इहापि गुणावगतेः । उपचयापचयधर्माणो हि स्त्रीपुमांसौ, अतस्त-द्धर्मविवक्षया स्त्रीलिङ्गादिशब्दप्रयोगोऽप्राणिष्वपि यथैवेह प्रकृते वर्णितम् । अपेक्षाभेदतश्चाविरोधः समान एव । अत्यन्तापचयविवक्षया च नपुंसक-लिङ्गशब्दप्रयोगः, तद्रूपत्वात् तज्जातेः । स्यादेतत् — नाप्राणिषु गौणाव-गतिरतः कथं गौणत्वमिति । अस्ति वा प्राण्यप्राणिनोः समानाकारा बुद्धिरायु-ष्मताम् । शब्दसंलापमात्रादेव हि नो वाक्सुगादिषु स्त्रीत्वादिमतिरावि-रास्ति । नतु प्राणिष्विव तेष्वप्यनुस्यूत आकारो दृश्यते । अतः शब्द-संव्यवहारमात्रसिद्ध्यर्थमप्राणिषु लिङ्गानुशासनम् । किं पुनर्लिङ्गानां वाच-कम् । न तावदेतदुपपद्यते, तत्सद्भावमात्रस्य प्रकृतोपयोगिकत्वात् । यदि तु प्रयोजनमभिधीयते श्रूयताम् । ये तावदप्राणिवाचिनः स्त्रीलिङ्ग-तया स्मर्यन्ते, तेष्वनुशासनकारैरेवेयं स्त्री अयं पुमानिदं नपुंसकमिति गुण-वादेनैव स्त्र्यादिशब्दाः प्रयुक्तास्तद्वचनपदान्तरसमभिव्याहारसिद्ध्यर्थम् । ते तु स्वभावतः स्वार्थमात्रमभिदधति । गुणवाद एव स्मर्तृणामत्यन्तं निरू-ढतया लिङ्गेऽपि वाचकभ्रान्तिमेव जनयति । एषा च निर्भागपदेषु स्थितिः वाक्सुवादिषु । सभागेषु तु तारकादिशब्देषु प्रत्ययभागः स्त्रीत्वमभिधाय प्रकृत्यर्थं तदसम्भवाद् गौण्या वृत्त्या तत्समभिव्याहारं लभते । गुणवाद-समाधानं चोक्तमेव । येऽपि नक्षत्रमित्यादिषु प्रत्ययविकारविशेषास्तेष्व-पीयमेव स्थितिः । विकाराणां नपुंसकलिङ्गेऽनुशासनादम्भावादीनाम्, 'अतोऽम्' (७. १. २४) इति यथा । ये प्राणिवाचिनोऽश्वोऽश्वेत्येवमा-दयः, तेषां स्त्रीप्रत्ययान्तेषु तावत् स एव प्रत्ययः स्त्रीत्वमभिदधाति । स च

कुणपादिमतौ चैवं सार्वरूप्ये व्यवस्थिते ।
वासनाः सहकारिण्यो व्यवस्थाकारदर्शने ॥ २१५ ॥
स्वप्रत्ययानुकारो हि बह्वाकारेषु वस्तुषु ।

सम्भवत्स्वार्थो मुख्ययैव वृत्त्या प्रकृत्या समभिव्याहियते । अश्व इत्यादावपि प्रत्ययविकारादेव लिङ्गविशेषावगतिः । प्रातिपदिकवाच्या एव स्त्रीत्वादयः प्रत्ययेन द्योत्यन्ते इति नानुज्ञायते । प्रत्ययोपजनापाययोरेव लिङ्गावगतेः सदसद्भावदर्शनात् । प्रकृतेश्चान्वयव्यतिरेकनिर्धारितस्वार्थमात्रवचनत्वात् । अतः स्त्रियामभिधेयायां (धात्वा ? टाबा)दयः इत्येतदेव साम्प्रतम् । वार्त्तिककारेण च 'स्त्रीत्वादन्यत्र दृष्टं स्यादि'ति वदता प्राणिषु दृष्टं लिङ्गमभिदधतां शब्दानां गौण्यैव वृत्त्याप्राणिवाचिप्रकृतिसमभिव्याहारोऽभिहित इति वेदितव्यम् । न पुनरन्यत्र दृष्टारोपेण भ्रान्तिरुक्ता । अतो बाधकाभावोऽपि न परिचोदनीयः । गौणे तद्दर्शनात् । अतस्तारकादिमतौ तथा 'स्त्रीत्वादन्यत्र दृष्टं स्यादि'त्ययमेव परिहारः साधीयान् । परयोस्तु कथञ्चिच्छब्दपरमतत्वोपन्यासाभ्यामेवासाधुता प्रकटितेत्यवधातव्यमिति ॥ २१४ ॥

यत् पुनरुक्तम् — एकस्यामेव प्रमदातनौ कथं परिव्राजकादीनां कुणपादिप्रत्ययाः सदर्था भविष्यन्तीति । तत् परिहरति — कुणपादीति । अस्यार्थः — नानाकारं वस्तु नानाकारमेवानुभूयत इति नानुपपन्नम् । यस्तु कश्चिदेव व्यवस्थया कञ्चिदाकारं प्रतिपद्यते न सर्वं सर्वः, तत्र सहकारिवासनासदसद्भावो निबन्धनम् । परिव्राजकादीनां हि कस्यचिदेव काचिद् वासना कुतश्चिदभ्यासाद् हृदयमनुविष्टोद्भूता सती काञ्चिदेवाकारमेकस्यामेव प्रमदातनौ दर्शयति । परिव्राजको हि देहाद् विविक्तमात्मानमभ्यस्यंस्तद्वासनावासितान्तःकरणो मृतशरीरवत् कुणप इत्येवं कामिनीं चिन्तयति । कामुकस्तु कामाभ्यासाहितवासनासहायो देहात्मनोर्विवेकमपश्यन् देह एवाहङ्कृतः कामिनीति । श्वानस्तु जात्यनुबन्धिपिशिताशनाभ्यासातिशयाहितवासनासनाथाः पृथुलनितम्बोरुस्थलप्रस्तनशालिनीं कबलयितुमभिलषन्ति कामिनीमिति वासनाव्यवस्थानुसारिणी संविद्व्यवस्थैकविषया परिव्राजकादीनामिति ॥ २१५ ॥

आह — किमपराद्धमस्माभिर्वासनानिबन्धनं नीलाद्याकारोपप्लवं विज्ञाने वदद्भिः । भवद्भिरपि वासनैवाकारदर्शनहेतुतया वर्णिता । अत आह —

निर्धारणे भवेद्धेतुर्नापूर्वाकारकल्पने ॥ २१६॥
तथा दीर्घघटत्वादौ भिन्नापेक्षानिबन्धना ।
आकारभेदसंवित्तिरविरुद्धा भविष्यति ॥ २१७ ॥
नानेकाकारसंवित्तेर्निराकारत्वकल्पना ।
युक्ता प्रतीतिभेदात् तु बह्वाकारत्वसम्भवः ॥ २१८॥
संवित्तेश्चाविरुद्धानामेकस्मिन्नप्यसम्भवः ।
एकाकारं भवेदेकमिति नेश्वरभाषितम् ॥ २१९ ॥

स्वेति । अयमभिप्रायः — न वासना (ना)मान्या काचित् समनन्तर-प्रत्ययरूपेति भणितमसकृत्, यस्यैव च प्राचीनप्रत्ययजनितस्य संस्कारस्य तेनैव प्रत्ययेनानुकारः सादृश्यं स एव वासनेति चौरिका मन्यन्ते, स च संस्कारो बह्वाकारे वस्तुन्येकस्याकारस्याभ्यस्तपूर्वस्य निर्धारणे कारणं भवति इति युक्तम् । न त्वननुभूतमेवाकारमसन्तं वासना दर्शयतीति साम्प्रतम् । यथा भवन्तो मन्यन्त इत्यस्ति महानावयोर्विशेष इति ॥ २१६ ॥

दीर्घादिप्रत्ययोऽप्येकगोचरोऽपेक्षाभेदादेव परिहर्तव्य इत्याह — तथेति । दीर्घह्रस्वबोधे भिन्नोपाध्यपेक्षा । घटपार्थिवादिभेदे तु कालाद्यपेक्षा-एकोऽपि हि कदाचिद् घट इति तमर्थं बुद्ध्यते कदाचित् पार्थिवोऽय-मिति । भिन्नकालाद्यपेक्षया बोधवैचित्र्योपपत्तिरिति ॥ २१७ ॥

अपिच, इयमपूर्वा युक्तिः यत् किलानेकाकारात्मकं भासते, तस्मा-दनाकारमेव वस्तु ज्ञानाकार एवायमिति । एवं हि प्रतीतिभेददर्शनादनेका-कारकल्पनैवाश्रयितुमुचिता । न त्वनाकारकल्पनेत्याह—नेति ॥ २१८ ॥

स्यादेतत् । सन्त्वेकस्मिन्नप्यविरुद्धानेकाकाराः, कथं तु विरुद्धा-नामनेकेषां सम्भवोऽत आह — संवित्तेरिति । इदमनेन विरुध्यत इति संवित्साक्षिकं तद् यत्रैव भवतो विरुद्धाभिमानः तत्र संविद्बलादविरोधमेव वक्ष्याम इत्यभिप्रायः । एतच्चान्वारुह्यवचनमपेक्ष्य, भेदात् त्वविरोधो दर्शित एवेति । भवेदप्यनेकाकारदर्शनादेकस्यानाकारकल्पना यद्येकमेकाकारमित्यत्र

तथाहि तदुपेतव्यं यद् यथैवोपलभ्यते ।
न चाप्यैकान्तिकं तस्य स्यादेकत्वं च वस्तुनः ॥
तस्माद् देशादिसद्भावनिमित्तैः प्रत्ययैः पृथक् ।
वस्त्वाकाराः प्रतीयेरन्नुद्भवाभिभवात्मकाः ॥ २२१ ॥
युगपद् ग्राहकाणां च यो यदाकारवाचिनम् ।
शब्दं स्मरति तेनासावाकारः सम्प्रतीयते ॥ २२२ ॥
नित्यं सत्सु तथा लोके रूपादिषु घटे पृथक् ।
चक्षुराद्यनुरोधेन संवित्तिर्व्यवतिष्ठते ॥ २२३ ॥

युक्तिर्भवेत् । तामन्तरेण त्विदमीश्वराज्ञातुल्यमेव भाषितं भवेत् । तच्चायुक्तमित्यभिप्रायेणाह— एकाकारमिति ॥ २१९ ॥

संविदेकाधीनता हि वस्तूनां व्यवस्थितिः । अतो यदेव येनात्मना संविदा व्यवस्थाप्यते तत् तेनैव रूपेणाभ्युपेतव्यमित्याह — **तथाहीति** । किञ्चैकत्वेऽपि वस्तुनो नास्माकमेकान्तवादः येनैवमुपालभ्येमहि कथमेकमनेकाकारमिति । तदपि ह्येकानेकात्मकमेवानेकान्तवादिनामस्माकमित्याह— न चेति ॥ २२० ॥

अतः सिद्धं देशकालावस्थोपाधिसद्भावनिमित्तैः प्रत्ययैर्विद्यमाना एव वस्त्वाकारा उद्भवाभिभवात्मकाः पृथग् भेदेन गृह्यन्त इत्युपसंहरति — **तस्मादिति** । देशादयश्चाकारोद्भवाभिभवद्वारेण प्रत्ययानां निमित्तमिति ॥ २२१ ॥

ये तर्हि युगपदेव ग्रहीतृणां घटत्वाद्याकारा निर्भासन्ते तत्र कथम् । न हि त आपेक्षिकाः, स्वाभाविकत्वाभ्युपगमात् । उक्तं च 'घटत्वपार्थिवद्रव्ये'ति । तत्र कः परिहारः अत आह — **युगपदिति** । यद्यप्यत्र नौपाधिकत्वान्न चोद्भवाभिभवौ, तथापि नानाकारे वस्तुनि यो यस्य वस्तु-(नि ? नः) (यो ?) यस्य वस्तुभागस्य शब्दं स्मरति, स तं विकल्प्यामुकोऽयमिति जानाति नेतर इति व्यवस्थासिद्धिरिति ॥ २२२ ॥

अत्रैव दृष्टान्तमाह — **नित्यमिति** । रूपादयो हि घटे नित्यं सन्त

एवमेव घटत्वादौ सर्वान् प्रति भवत्यपि ।
वाचकस्मृतिभेदेन संवित्तिर्व्यवतिष्ठते ॥ २२४ ॥
तस्माद् बहिः स्थितोऽप्यात्मा नराणां चक्षुरादिभिः ।
प्राप्य वाप्राप्य वा बुद्धेर्विषयत्वेन कल्प्यते ॥ २२५ ॥
वदन्ति लौकिका यच्च यादृग् ज्ञानं तथा बहिः ।
तेऽपि न ज्ञानसंवित्त्या तथार्थं प्रतिजानते ॥ २२६ ॥
ग्राहकत्वेन विज्ञानं यथार्थं नः समर्पयेत् ।
तादृगर्थः स इत्येव तेषां वा तदुपायतः ॥ २२७ ॥

एव, तथापि न सर्वे सर्वैरनुभूयन्ते ग्राहकाणां चक्षुरादीनां विषयव्यवस्थानादिति ॥ २२३ ॥

एवं दृष्टान्ते दर्शयित्वा दार्ष्टान्तिके योजयति — एवमिति ॥ २२४ ॥

ननु बहिर्देशमर्थं तावादिन्द्रियाणि न प्राप्नुवन्ति अप्राप्यप्रकाशे नैवानवस्था । अतो न बहिस्सतोऽर्थस्य कथञ्चिदवगतिरुपपद्यते, अत आह— **तस्मादिति** । अयमभिप्रायः — सिद्धं तावत् प्रतीतिबलाद् बाह्यालम्बनं ज्ञानमिति, स बाह्योऽर्थात्मा प्राप्यैवेन्द्रियैः प्रकाश्यत इत्युक्तम् । प्राप्यकारिता चोपपादिता यदि कृतं न निर्वहति कामं, तथापि नानालम्बनं ज्ञानं, संविद्विरोधात् । अप्राप्यकारिणामेवेन्द्रियाणां कञ्चित् कार्यवशोन्नीयमानमतिशयं वक्ष्यामः, यद्बलेनाप्राप्तमपि बाह्यमर्थं प्रकाशयन्ति, न पुनः स्वांशालम्बनं ज्ञानमिति कल्पना प्रमाणवतीति ॥ २२५ ॥

यदप्युक्तं 'वक्तारश्चापि दृश्यन्ते' इति, तत् परिहरति — **वदन्तीति** । यदेतल्लौकिका वदन्ति नीलोऽयमर्थो यतस्तद्रूपा मतिरुत्पद्यते इति, तेऽपि न ज्ञानाकारपरिचयपुरस्सरोऽर्थसम्बोध इति तथा वदन्तीति ॥ २२६ ॥

कथंनाम वदन्ति अत आह — **ग्राहकत्वेनेति** । विदिते खलु नीलेऽन्येनोत्थापिताशङ्कः स्वयं वा जातविचिकित्सः प्रमाणतथात्वनिश्चयपुरस्सरमर्थतथात्वं निश्चिनोति, नेदमन्यादृशं हि ज्ञानं नोऽर्थानां ग्राहकं तद् यथार्थं समर्पयति तथासौ तदुपाधिकत्वात् तस्य । इह च प्रथमं ताव-

लैङ्गिकासत्त्वमप्राप्तैरेतैर्बाह्यार्थवादिभिः ।
ज्ञानानुभवमुत्क्रम्यबाह्य एव प्रयत्यते ॥ २२८ ॥

यथा लोके च तद्बुद्धिर्वाच्यमेवं परीक्षकैः ।
न यादृगन्तराकारस्तादृग् बाह्योऽवकल्पते ॥ २२९ ॥

उत्पद्यमाना गृह्येत धीरर्थग्रहणे यदि ।
पूर्वपक्षस्य किं सिद्धं कथं चार्थान्तरं वदेत् ॥ २३० ॥

ज्ज्ञानेन नीलं समर्पितम् । तथैव चाद्ययावदनुवर्तमानं ज्ञानमस्ति यन्नीलमेव प्रकाशते । तस्मान्नीलमेवेदमित्युपायतया पश्चादपि ज्ञातं ज्ञानं पुरस्सरीकरोतीति नानेन ज्ञानस्य पूर्वग्रहणमापादयितुं शक्यत इति ॥ २२७ ॥

एवं तावत् परीक्षिता प्रत्यक्षशक्तिः । निर्णीतं च यथा बाह्य एव प्रवर्तितुं शक्तमिति । एवं चानुमानस्य प्रत्यक्षबाधे सिद्धे लैङ्गिकं तावद् बाह्यासत्त्वमप्राप्तं बाह्यार्थवादिभिः । अतश्च तदभावद्वारिकां ज्ञानानुभवकल्पनामतिक्रम्य तैर्बाह्य एव यत् प्रयत्यते तद् युक्तमित्याह — लैङ्गिकेति ॥ २२८ ॥

स्यादेतत् — बहिस्सन्तमेवार्थं लौकिका बुध्यन्ते, परीक्षकास्तु युक्तितोऽवस्थापयितुमशक्नुवन्तः स्वांशालम्बनत्वं संविदां प्रतिपद्यन्ते अत आह — यथेति । अयमर्थः — यथा तस्यार्थस्य लोके बुद्धिरुत्पद्यते, परीक्षकैरपि तथैव वाच्यम् । अयथार्थं ज्ञानं हि वदन्तो न परीक्षका एव भवेयुः । इदं तु परीक्षकाणां तत्त्वं यत् प्रमाणशरणत्वम्, असति तस्मिंस्तत्त्वहानिरेव तेषामिति । लौकिकाश्च नान्तराकारवद् बाह्यं वस्तु बुध्यन्त इति । प्रतीतिमेवानु(सा ? स्मा)रयति — न यादृगिति । अन्तराकारो यादृगवगम्यते न तादृशो बाह्यार्थः स ह्ययमिदमिति पररूपेण निरूप्यत इत्युक्तम् । अन्तराकारस्य त्वहमिति निरूपणं भवेदस्माकमिवात्मन इति ॥ २२९ ॥

अत्र भाष्यं 'ननूत्पद्यमानैवासौ ज्ञायते ज्ञापयति चार्थान्तरं प्रदीपवदिति यद्युच्येते'त्येवमादि, तदाक्षिपति — उत्पद्येति । अयमभिप्रायः —

बाह्यार्थवादिनं ब्रूते भवान् किं नैवमिच्छति ।
प्रतिबन्धो न तस्यास्ति गृह्णात्यर्थान्तरं यदा ॥ २३१॥
उत्तरं ग्राहकाभावाल्लिङ्गाभावाच्च नास्ति नः ।
तदा ग्रहणमित्येतदन्यतर्केषु चोच्यते ॥ २३२ ॥
तेषु तर्केषु विज्ञानमर्थकालेऽवगम्यते ।

तद् बाह्यापलापवादिना वक्तव्यं यत् तदभावानुगुणम्, इह चोत्पद्यमानाया बुद्धेरर्थस्य च ग्रहणमाचक्षाणो नार्थाभावं दर्शयतीति नेदं पूर्वपक्षवादिनो वक्तुमुचितमिति । स्यादेतत् । नेदं पूर्वपक्षानुगुणतयोच्यते, किन्त्वेदमर्थान्तरभूतमपरमेव बुद्धावागतं सिद्धान्तिनोऽसम्मतमित्येतावतैवोच्यते सिद्धान्तान्तरमस्य दूषयितुमत आह — कथमिति । पूर्वपक्षानौपयिकमर्थान्तरं ब्रुवाणस्य सिद्धान्तान्तरदूषणं निग्रहस्थानमिति भावः ॥ २३० ॥

एवमाक्षिप्य समादधाति — बाह्येति । इदमनेन ग्रन्थेन बाह्यार्थवादिनं पूर्वपक्षवादी मीमांसकं ब्रूते — किं भवान् बाह्यार्थग्रहणसमये ज्ञानस्य प्रतिबन्धाभावं नेच्छति येनार्थाकारोऽयमिति ब्रवीति । कथं ह्यप्रतिबन्धस्याग्रहणं भविष्यति । कथंचानाकारस्य ग्रहणम् । अतो ज्ञानाकारकल्पनैव साधीयसीत्यभिप्रायः ॥ २३१ ॥

अत्रोत्तरं भाष्यं 'तन्न । न ह्यज्ञातेऽर्थे कश्चिद् बुद्धिमुपलभते । ज्ञाते त्वनुमानादवगच्छती'त्यादि । तस्यामभिप्रायमाह — उत्तरमिति । अस्यार्थः — विदितपूर्वपक्षवाद्यभिप्रायः सिद्धान्तवादी वदति । सत्यमुत्पत्तौ बुद्धेरप्रतिबन्धः, ग्राहकाभावात् तु तदानीमग्रहणं, तदभावश्च तत्कारणस्य लिङ्गस्य ज्ञाततादिपदास्पदस्याभावादिति । अन्यथोत्पद्यमानैवेत्यादिभाष्याभिप्रायमाह — अन्येति । अन्यतर्केषु स्थित्वेदं भाष्यकारेणोच्यते उत्पद्यमानैवेत्यादि । एतदुक्तं भवति — बाह्यार्थवाद्येकदेशिमतोपन्यासोऽयं भाष्यकारेण कृतस्तन्निराकरणार्थमिति ॥ २३२ ॥

एकदेशिमतमेवोपन्यस्यति — तेष्विति । तर्कान्तरेष्वर्थज्ञानकाल एव ज्ञानमवगम्यत इतीष्यते । एवं हि मन्यन्ते स्वप्रकाशमेव विज्ञान-

तथा सत्यर्थनाशः स्यादित्येतदुपदिश्यते ॥ २३३ ॥
नन्वित्येतदसम्बद्धं परेष्टस्यैव चोदनात् ।
पौर्वापर्यविभागोऽपि प्रागुक्तेन विरुध्यते ॥ २३४ ॥
क्षणिकत्वेन युक्तं स्याज्ज्ञातत्वमथ चेत् तदा ।
भूतकालाश्रयाद् ब्रूयाद् वृथोक्तस्य पुनर्वचः ॥ २३५॥

मात्मानं विषयं च व्यवस्थापयतीति । एतच्चास्माभिः प्रागेव प्रपञ्चितमिति । यद्येवं किमस्य निराकरणे प्रयोजनम् । एवमपि द्वैतं सिध्यत्येवात आह — तथेति । यदि हि समसमयमुभयमुपलभ्यत इत्याश्रीयते, ततो बुद्धेरनाकाराया बोद्धुमशक्यत्वादेकाकारोपलम्भाच्च एकमेव साकारं भवेत् सहोपलम्भनियमाच्चाभेदः परोक्तो नापाकर्तुं शक्यते । तत्रार्थनाश एवापद्येत । नह्यभ्युपगममात्रेणार्थः सिध्यतीत्येतन्मतनिराकरणं भाष्यकारेणोपदिश्यत इति ॥ २३३ ॥

अपरमपि — 'ननूत्पन्नायामेव बुद्धावर्थो ज्ञात इत्युच्यते नानुत्पन्नायाम् । अतः पूर्वं बुद्धिरुत्पद्यते पश्चाद् ज्ञातोऽर्थ' इति भाष्यं, तदाक्षिपति — नन्वित्येति । परिचोदना हि नामानिष्टापादनेन भवति । न चेदमनिष्टं मीमांसकस्य यदुत्पन्नायां बुद्धावर्थो ज्ञात इति । तस्मादनुपपन्ना परिचोदनेति । पूर्वं बुद्धिर्भवति पश्चाद् ज्ञातोऽर्थ इति च पौर्वापर्याभिधानं पूर्वोक्तेन युगपदुपलम्भेन विरुध्यते इत्याह — पौर्वापर्येति । 'उत्पद्यमानैवासावि'त्यादिना भाष्येण युगपद् ज्ञानार्थयोरुपलम्भोऽभिहितः । तत् कथमिदानीं पौर्वापर्यमभिधीयते इति ॥ २३४ ॥

यदि तूच्यते — पूर्वमुत्पद्यमानैव बुद्धिर्ज्ञायते ज्ञापयति चार्थमित्युक्तम्, इह च बुद्ध्युत्पत्तिसमयेऽर्थो ज्ञायते इत्युच्यते । उत्पन्नायां त्वसौ ज्ञातः सहैव ज्ञानेनातिक्रान्त इति यावत् । क्षणिकत्वेन हि धर्मेणासौ युक्तः कथमद्य यावदवस्था(प्य?स्य)ते । अयं चार्थो ज्ञात इति निष्ठार्थभूतकालाश्रयणेन भाष्यकारेणोक्तः । अतो न कश्चित् पूर्वापरविरोध इति, तथाप्युक्तस्यार्थस्य पुनर्वचनमनर्थकं भवेत् । एवमपि प्रकारान्तरेण स एवार्थज्ञा-

अत्रापि न स्वसिद्धान्तमूचे वाक्यात् परस्य तु ।
भ्रान्तत्वादन्यथा पक्षं गृहीत्वेति स्म पृच्छति ॥२३६॥
सहोत्पत्त्युपलब्धा हि ज्ञानस्यैकान्ततः स्थितिः ।
प्रागूर्ध्वं वार्थसंवित्तेर्युगपद् वेति चिन्त्यते ॥ २३७ ॥
एष चार्थस्य संवित्तेः पश्चाद् ज्ञानावबोधनम् ।
ब्रवीति नूनमेतस्य पश्चादुत्पद्यतेऽपि तत् ॥ २३८ ॥
नचैतच्छक्यते तस्मादुत्पत्तेरपकर्षणम् ।

नयोर्युगपदुपलम्भोऽभिधीयते । स चोक्त एव । न चास्य प्रकारान्तरवचनस्य स्वरूपेण कश्चिदुपयोगः तदेतदाह — क्षणिकत्वेनेति ॥ २३५ ॥

एवमाक्षिप्य समादधाति — अत्रापीति । अयमर्थः — यथोत्पद्यमानैवासावित्यत्र न पूर्वपक्षिणा स्वसिद्धान्तस्थित्या पूर्वपक्षितम्, एवमिहापि न बौद्धः स्वसिद्धान्तमुक्तवान् यदुत्पन्नायां बुद्धावर्थस्य ज्ञाततामाह । एवं हि परमतमेवाभ्युपगतं भवेदिति । केनाभिप्रायेण तर्हीदमुक्तमत आह — वाक्यादिति । अयमर्थः — यदा परेण सिद्धान्तिना इदमुक्तं न पूर्वं बुद्धिर्ज्ञायत इति, तदास्य तद्वाक्यश्राविणो भ्रान्तिर्जाता यदयं सिद्धान्ती बुद्धेः पूर्वं ज्ञानं प्रतिषेधति, तदस्य मन्ये बुद्ध्युत्पत्तिरपि न प्रागनुमता । नहि भवति स्वप्रकाशं सूत्पन्नमपि न गृह्यते । तदेवं परस्य सिद्धान्तिनो वाक्याज्जातविभ्रमः सिद्धान्तिमतमेवान्यथा बुद्ध्वा ननूत्पन्नायां बुद्धावितीदृशं पृच्छति स्म । श्रुतं मया प्राग् वो मीमांसकानां बुद्ध्युत्पत्तिः सम्मता । तत् किमित्येवं यन्न प्राग् बुद्धमिति ॥ २३६ ॥

पूर्वपक्षवाद्यभिप्रायमेव विवृणोति — सहेत्यदर्शनमन्तेन । इयं किलास्य बौद्धस्य मृष्टाशा सहैव ज्ञानस्योत्पत्त्युपलम्भो, उत्पन्नानुपलब्धस्यासम्भावनीयत्वात् । तदिहैतावदेव विमतिपदं किं नो बुद्धेरुत्पत्त्युपलम्भावर्थवित्तेः प्रागूर्ध्वं वा आहोस्वित् सहैवार्थवित्त्येति । एष च मीमांसकः पश्चादर्थवित्तेर्ज्ञानस्यावबोधमाह । तन्नूनमेतस्य ज्ञानं पश्चादेवोत्पद्यते । कथमपरथा प्रकाशस्वभावस्याग्रहणम् । तदेनमितः पक्षाभासाद् व्यावर्तयामीति प्राक् तावदुत्पत्तेरपकर्षणं करोति । नहीदं शक्यते वक्तुं

करोमि तावत् तत्काला संवित्तिरपि सेत्स्यति॥२३९॥
प्राक् च तद्ग्रहणे सिद्धे बाह्याभ्यन्तरयोर्ध्रुवम् ।
विवेकादर्शनं तस्मादिदं पूर्वं च चोदितम्॥ २४० ॥
युगपद् गृह्यमाणेऽपि नाकारोऽर्थस्य लक्ष्यते ।
तस्मादर्थस्य संवित्तिः पूर्वं यत्नेन साध्यते ॥ २४१ ॥
यस्त्वेतस्योत्तरो ग्रन्थः प्रागेवासौ निरूपितः ।

यदनुत्पन्नायामेव बुद्धावर्थो ज्ञातो भवतीति, अतिप्रसङ्गात् । एवं च प्रागुत्पन्नस्य तदैव संवित्तिरिति सुसाधमेव । प्राक् च तत्संवित्तौ सिद्धायां ध्रुवमापन्नं बाह्याभ्यन्तराभिमतयोस्तत्त्वयोर्विवेकादर्शनम् । अर्थ एव हि प्राग् बुद्धेः साकारे तत्सामर्थ्यादनाकारा संवित्तिः । अतो विविक्ताकारता सिध्यति । इतरथा त्वाकारविवेकस्यानुपलब्धत्वाद्द्वैतं सिद्धमेवेति । युगपद्ग्रहणपरिचोदनाप्येवमभिप्राया शक्या वर्णयितुमित्याह — तस्मादिति ॥ २४० ॥

एतदेव विवृणोति — युगपदिति । ज्ञानेन सह युगपद् गृह्यमाणेऽप्यर्थे नार्थस्याकारो लक्ष्यते । उक्तं हि 'नाकारविवेको लक्ष्यते' इति । अपिचैवं सहोपलम्भनियमो बौद्धस्यानिवारितप्रसरो ज्ञानाद् भिन्नं साकारमर्थं निराकरोतीत्युक्तमेवेति । यत एव प्राक् समकालं वा ज्ञानानुभवेऽर्थनाशो भवति, तस्मादर्थसंविद एव प्राग्भाविता भाष्यकारेण सिद्धान्तावसरे यत्नेन साध्यत इत्याह — तस्मादिति ॥ २४१ ॥

एवं तावद् 'ननूत्पन्नायामि'त्यादिभाष्याक्षेपपरिहारौ वर्णितौ । अयमपरोऽस्योत्तरग्रन्थः — 'सत्यम् । पूर्वं बुद्धिरुत्पद्यते न पूर्वं ज्ञायते । भवति हि कदाचिदेतद् यज्ज्ञातोऽर्थः सन्नज्ञात इत्युच्यते' इति । तस्य यथाश्रुतगृहीतस्य तावदर्थमाह — यस्त्विति । योऽस्याः परिचोदनायाः सिद्धान्तग्रन्थः स प्रागेव निरूपितः केवलग्राहकग्रहणप्रतिपादनावसरे । एवं हि तत्रोक्तं—

"न पूर्वं ज्ञायते बुद्धिरित्यत्रैतद् वदिष्यते ।
ग्राहकस्यैव संवित्तिर्लक्ष्यते ग्रहणे क्वचित् ॥"

न त्वेतत् साधनं साक्षात् पूर्वं बुद्धेरबोधने ॥ २४२ ॥
न परामृश्यतेऽर्थात्मा ज्ञातोऽप्यज्ञातवद् यतः ।
तस्मान्न ग्रहणं पूर्वं बुद्धेः किं केन सङ्गतम् ॥ २४३ ॥
अतः पूर्वोपलब्ध्या यो बुद्ध्याकारोऽत्र वाञ्छितः ।
तन्निराकरणेनैव फलत्वाद् ग्रन्थवर्णना ॥ २४४ ॥
कामं बुद्धेरिति त्वेतदर्थाधीनत्वमुच्यते ।

इति । तदिदमुक्तं 'भवति हि कदाचिदेतद् यद् ज्ञातोऽर्थः सन्नज्ञात इत्युच्यत' इति । अर्थाकारविविक्तं ज्ञानमात्रमेव स्मर्यत इति यावत् । उक्तं च 'न स्मरामी'ति । एवमुक्तार्थं भाष्यमाक्षिपति — न त्वेतदितिसार्धेन । 'सत्यम् । पूर्वं बुद्धिरुत्पद्यते नतु पूर्वं ज्ञायते' इति प्रतिज्ञायामयं हेतुरुक्तः 'यत् किल ज्ञातोऽप्यर्थः कदाचिदज्ञातवन्न स्मर्यते, तस्मान्न पूर्वं बुद्धिर्ज्ञायते' इति । इदं च बालप्रलपितप्रायम् । किं खल्वत्र केन सम्बध्यते यज्ज्ञातो न स्मर्यते तत्र पूर्वं बुद्धिर्न ज्ञायत इति, तस्मान्न तावदेतस्यां प्रतिज्ञायां साक्षात् साधनमिति ॥ २४३ ॥

तत् किं हेयमेवेदं भाष्यं, नेत्याह—अत इति । सत्यम् । नेदमस्यां प्रतिज्ञायां साक्षात् साधनं, किन्त्वनेन ग्रन्थेन फलद्वारेण प्रतिज्ञानिराकरणमुक्तम् । पूर्वपक्षवादिनाप्यत्र ज्ञानस्य पूर्वोपलब्ध्या बुद्ध्याकारो वाञ्छितः । तदनेन निराक्रियते । यदि बुद्धिः साकारा भवेत् सा तर्हि तथैव स्मर्येत । नचैवं केषुचिदवसरेषु , केवलग्राहकस्मरणात् । अतः किं मुधा मुग्धैः प्रागुपलब्धौ प्रयस्यते । एवमपि हि धीरनाकारैव यदसावाकारवियुक्ता स्मर्यते न पूर्वं ज्ञायत इति । किमुक्तं भवति । नानेन प्रकारेण सिसाधयिषितं बुद्धेः साकारत्वं सिध्यति, अनाकारस्मरणात् कदाचिदिति ॥ २४४ ॥

अत्रापरं भाष्यम् 'अपिच काममेक(रूप)त्वे बुद्धेरेवाभावो न त्वर्थस्य प्रत्यक्षस्ये'ति । तदयुक्तम् । कथं हि द्वैतासिद्धान्ती ज्ञानापलापमाह । एवमपि हि न तस्य पक्षः सिध्यति । न चासति ज्ञाने निष्प्रमाणिका अर्थसिद्धिरवसातुं शक्यते । अतो व्याख्येयमेतदत आह — काममिति । नात्र

न चार्थरूपाद् भेदेन धियामस्ति निरूपणम् ॥२४५॥
पररूपनिरूप्यं च न मेयं मृगतोयवत् ।
असद्ग्राह्यानुसारेण ज्ञानसंवेद्यता तव ॥ २४६ ॥
स्वच्छत्वात् तु स्वरूपस्य कल्पिता ग्राह्यता धियाम् ।
वासनोपप्लवात् तेन न मेयं पारमार्थिकम् ॥ २४७॥
निमित्तनियतत्वं तु समानमुभयोरपि ।

बुद्ध्यभावे तात्पर्यं, किन्तु नासत्यर्थे बुद्धिः सिध्यतीत्येवंपरमिदम् । वरमेकरूपत्वे बुद्धिरपह्नुता यदसौ प्रत्यक्षार्थसामर्थ्यसमधिगम्या । यदधीना बुद्धिर्न तस्यैव प्रत्यक्षसिद्धस्यार्थस्य तामादायाभाववर्णनमिति । अपरमपि 'न चार्थव्यपदेशमन्तरेण बुद्धेः रूपोपलम्भनम् । तस्मान्नाव्यपदेश्या बुद्धिः । अव्यपदेश्यं च नः प्रत्यक्षं तस्मादप्रत्यक्षा बुद्धिरि'ति भाष्यम् । तद् व्याचष्टे — नचेति । बुद्धयो हि नार्थरूपाद् विना निरूप्यन्ते । नहि जातु नीलरूपादियं नामेति विविच्य बुद्धिरुपलभ्यते । अर्थाकारेणैव तु नीलादिना व्यपदिश्यते नीलज्ञानं पीतज्ञानमिति । एवञ्च नित्यपररूपनिरूप्या बुद्धिः कथं प्रत्यक्षप्रमेयं भविष्यतीति । नहि मृगजलज्ञाने ऊषरं जलत्वेन ज्ञायमानं प्रत्यक्षप्रमेयमिष्यते, भ्रान्तिविषयत्वात् । तस्याश्चाप्रत्यक्षत्वात् । अर्थस्तु नित्यं स्वरूपेण संवेद्यमानः प्रत्यक्ष इति युक्तमव्यपदेश्यं च नः प्रत्यक्षमिति पररूपाव्यपदेश्यमिति भाष्यार्थ इति ॥ २४५½ ॥

एवं तावत् सतापि पररूपेण निरूप्यमाणं न प्रत्यक्षमित्युक्तम् । त्वन्मते चायमपरो दोषः, यदसद्ग्राह्यानुसारेणैव तद् ज्ञानं संवेद्यते, स्वभावस्वच्छत्वात् ज्ञानस्य, नीलाद्याकारेण ग्राह्यता वासनोपप्लवात् कल्पितैव यतस्तदेतदाह — असदित्युपप्लवादन्तेन । अतो न कथञ्चिज्ज्ञानमेव प्रत्यक्षप्रमेयं पारमार्थिकं वक्तुं शक्यत इत्याह — तेनेति ॥ २४७ ॥

अत्रापरम् 'अपि च, नियतनिमित्तस्तन्तुष्वेवोपादीयमानेषु पटप्रत्ययः इतरथा तन्तूपादानेऽपि कदाचिद् घटबुद्धिरविकलेन्द्रियस्य स्यादि'ति भाष्यं, तदाक्षिपति — निमित्तेति । यदेतन्निमित्तानां तन्त्वादीनां नियतत्वं कार्येषु

निजशक्त्यनुसारित्वाज् ज्ञानबाह्यार्थवादिनोः॥२४८॥

तन्त्वर्थैरपि कस्माद् वः क्रियते केवलः पटः ।
नारभ्येत घटः किं तैर्मृत्पिण्डार्थेन वा पटः॥ २४९॥

तन्तुमृत्पिण्डविज्ञाने ह्यनुयोज्ये मते यदि ।
अर्थपर्यनुयोगोऽपि तद्वदेव प्रसज्यते ॥ २५० ॥

अर्थारम्भव्यवस्था चेत् सामर्थ्यनियमाश्रया ।
ज्ञानारम्भव्यवस्थायां सामर्थ्यं केन वार्यते ॥ २५१॥

तस्माद् यत्रोभयोर्दोषः परिहारोऽपि वा समः ।
नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारणे ॥ २५२ ॥

देशकालनिमित्तानि व्यञ्जकान्यर्थवादिनः ।

किञ्चिदेव निमित्तं किञ्चिदेव कार्यमुपजनयति नापरमिति, तदुभयोरपि ज्ञानबाह्यार्थवादिनोः समानम्, उभयोरपि निजशक्त्यनुसारित्वात् कार्यसिद्धेः । निजयैव हि शक्त्या किञ्चिद् विज्ञानं तन्त्वाद्याकारं किञ्चिदेव तु पटाद्याकारं ज्ञानं जनयति तन्तव इव पटम् । नचात्रान्यतरः शक्योऽनुयोक्तुमिति भावः ॥ २४८ ॥

तुल्यतामेवानुयोगस्य विवृणोति — तन्त्वर्थैरितिद्वयेन । निगदव्याख्यानौ ग्रन्थाविति ॥ २५० ॥

यदि तु सामर्थ्यनियममाश्रित्यार्थानां तन्त्वादीनां कार्यव्यवस्थोच्यत इति, तज्ज्ञानानामपि ज्ञानान्तरारम्भे न दण्डवारितमित्याह — **अर्थेति** ॥ २५१ ॥

अतो दोषपरिहारसाम्ये नान्यतरः शक्योऽनुयोक्तुमित्याह — **तस्मादिति** ॥ २५२ ॥

अत्र परिहारमाह — **देशेति** । अयमभिप्रायः—यदपि यस्य कारणं तदपि कदाचिदेव कार्यमारभमाणं दृष्टं न सर्वदा बीजमिवाङ्कुरम् । नहि तत् कुसूलाधिकरणमङ्कुरमारभते, किन्तु देशविशेषं क्षेत्रादिं कालविशेषं च ग्रीष्मादिं निमित्तविशेषमुदकादिमासाद्य कदाचिदेव देशादिव्यङ्ग्यत्वात्

शक्तीनां कारणस्थानां स्वकार्यनियमं प्रति ॥ २५३ ॥
शक्तयोऽपि च भावानां कार्यार्थापत्तिकल्पिताः ।
प्रसिद्धाः पारमार्थिक्यः प्रतिकार्यं व्यवस्थिताः ॥
भवतस्तु न विज्ञानाद् भिन्नाभिन्ना निरूप्यते ।
शक्तिः संवृतिसद्भावमुत्सृज्य परमार्थतः ॥ २५५ ॥
वासनैव च युष्माभिः शक्तिशब्देन गीयते ।
निमित्तनियतत्वं च वासनाया यदुच्यते ॥ २५६ ॥

कारणशक्तीनाम् । नैतद् ज्ञानवादिनां सम्भवतीति वक्ष्यते । अतः कस्य-हेतोरुत्पन्नमृत्पिण्डविज्ञानस्यापि कदाचिदेव घटप्रत्ययो न सर्वदा । कस्मा-च्चोत्पन्नव्रीहिबीजपरिचयस्यापि ज्ञातुर्भाव्यङ्कुराकारपरिचयः । नहि तत्र दण्डोदकादि किञ्चिदस्ति कारणशक्तीनां व्यञ्जकं, यदपेक्षया कारणानि वि-लम्बन्ते । स्यान्मतं — मा भूवन् बाह्या देशादयः । तज्ज्ञानान्येव च कारणानामनुग्राहकाणि भविष्यन्तीति । तन्न, क्षणिकत्वेनानुग्राह्यानुग्राहकयोः साहित्यासम्भवादिति ॥ २५३ ॥

न केवलं कारणशक्तीनां व्यञ्जकान्यर्थवादिनां सन्ति, शक्तयोऽपि कार्यार्थापत्तिप्रमाणिकाः प्रतिपटादिकार्यं तन्त्वादीनां व्यवस्थिताः प्रसिद्धा इत्याह — **शक्तयोऽपीति** ॥ २५४ ॥

भवतस्तु बौद्धस्य (ना ? न वि)ज्ञानाद् भिन्ना अभिन्ना वा पारमार्थिकी शक्तिर्निरूप्यते येन कार्यारम्भव्यवस्था घटत इत्याह — **भवत इति** । संवृतिसद्भावमुत्सृज्येति । संवृत्या यः सद्भावस्तमुत्सृज्य न पारमार्थिकी शक्तिरस्ति । नच संवृतिसत्तया व्यवस्थायाः सिद्धिरित्युक्तं निरालम्बन-वाद इति ॥ २५५ ॥

अपिच शक्तिरिति वासनामेव भवन्तो गायन्ति । सा च पूर्वानु-भवयोनिर्न तत्सदृशज्ञानान्तरोपजननादन्यत्र समर्थेत्यभिप्रायेणाह — **वास-नेति** । ननु वासनानुसारेणैव निमित्तानां तन्त्वादीनां कार्यविशेषनियतत्वं भविष्यति शब्दवासनानामिवार्थबुद्धौ भवन्मते, अत आह — **निमित्तेत्ये-तदन्तेन** । वासनाया इति हेतौ पञ्चमी । यदेतद् वासनाहेतुकं निमित्तनिय-

तस्याश्चासम्भवेनैतदपारार्थ्याच्च दुर्लभम् ।
देशकालनिमित्तादि नच तेऽस्ति नियामकम् ॥
मत्वैतदपिचेत्याह भाष्यकारः परं प्रति ।
तस्मादपरिहारोऽयं तन्तुभ्यस्ते यथा पटः ॥ २५८ ॥
तथा मे तन्तुबुद्धिभ्यः पटबुद्धिरितीदृशः ।
एवमाद्यप्रमाणाभ्यां न तावद् बाह्यशून्यता ॥२५९॥
आगमस्य तु नैवेह व्यापारोऽतोऽन्यथापि वा ।
नोपमा सदृशाभावान्नार्थापत्तिर्विपर्ययात् ॥ २६० ॥

तत्वं तद् वासनाया एवाभावादयुक्तम् । तदभावश्च क्षणिकत्वेनासाहित्याद् वास्यवासकयोरनाश्रित(त्वा? वा)सनाभावा(दा)श्रयानुपपत्तिश्चोक्ता । दुर्लभमिति वक्ष्यमाणेन सम्बन्ध इति । अपिचेयं वासना न परस्य कस्यचिदनुग्रहे वर्तते । अस्थिरानुग्राह्यानुग्राहकत्वानुपपत्तेः । अतः स्वतन्त्रैव कार्यमारभमाणा सर्वान् प्रत्यारभेताविशेषादित्यभिप्रायेणाह — अपारार्थ्यादिति । एवं तावत् शक्त्यभावादेव न तत्कृता कार्यव्यवस्थेत्युक्तं, येऽपि चास्माकं देशकालादयः कारणशक्तीनां व्यञ्जकत्वेनाभिमताः, तेऽपि तन्नियामका न सन्तीत्याह — देशेति ॥ २५७ ॥

सर्वं चेदमभिप्रेत्यापिचेत्यादि भाष्यकारेणाभिहितमित्याह — **मत्वै**त्यादिति । एवं चेत् परिहृतं पर्यनुयोगतुल्यत्वमित्युपसंहरति — **तस्मादिति** । एवं चानुमानदूषणात् प्रत्यक्षस्य च स्वस्मिन् वर्तितुमशक्तेर्न तावद् भवदभिमताभ्यामाद्याभ्यां प्रमाणाभ्यां बाह्यशून्यता सिध्यतीत्याह — **एव**मिति ॥ २५९ ॥

आगमस्त्वनुष्ठाननिष्ठो नैवञ्जातीयके प्रमाणमित्याह — **आगम**स्येति । न बाह्यसद्भावे अभावे चेत्यर्थः । उपमानं तु सिद्धवस्तुनः **सादृ**श्यविषयं न वस्तुसदसद्भावयोर्व्याप्रियते, नच किञ्चिच्छून्यं नाम ज्ञानातिरेकि सिद्धं यच्छून्यतया ज्ञानमुपमीयते गृहेणेव प्रोषितचैत्रेण शून्यं मन्दि-

तस्माद्भावगम्यत्वं शून्यतायाः स्थितं हि नः ।
एवं प्रमाणतोऽसिद्धा यैः प्रमेयाश्रयोच्यते ॥ २६१ ॥

बाह्यस्याणुसमूहादेर्ग्राह्यस्यासम्भवेक्षणात् ।
तैरान्तरासम्भवतो यथोक्ताज्
ज्ञेयं स्वमन्यस्य बलादुपेयम् ।
ग्राह्या नचेष्टाः परमाणवोऽतः
सत्यः समूहः प्रतिपादनीयः ॥ २६२ ॥

रान्तरमित्यभिप्रायेणाह — नोपमेति । अर्थापत्त्या तु तत्तद्भावभेददर्शनानुपपत्तिप्रभवया पृथिव्यादयो भावा व्यवस्थाप्यन्त एवेति सा परिपन्थिन्येव शून्यतायामित्याह — अर्थापत्तिरिति ॥ २६० ॥

एवं चापन्नं षष्ठप्रमाणगोचरत्वं शून्यताया इत्याह—तस्मादिति । एवं तावन्न प्रमाणानुसारेण शून्यता सिध्यतीत्युक्तम् । इदानीं यत्तदुक्तं 'तत्रास्तां यः प्रमेयतः' इति, तदुपन्यस्य दूषयति — एवमित्युपेयमन्तेन । अयमर्थः — न तावज्ज्ञानालम्बनाः परमाणवः अतीन्द्रियत्वात् । तत्सद्भावे प्रमाणाभावाच्च । न तत्समूहः, तदतिरिक्तस्यानिरूपणात् । अवयविनश्च वृत्तिविकल्पातिरिक्तादिपरिचोदनादूरीकृतनिरूपणत्वात् । अतो बाह्यस्याण्वादेः ग्राह्यस्यासम्भवादेव पारिशेष्यसिद्धमात्मालम्बनत्वं सर्वसंविदामिति प्रमेयाश्रया च शून्यता यैरुच्यते, तैरपि वादिभिर्यथोक्तादान्तरस्य ग्राह्यस्यासम्भवात् स्वात्मनि वृत्तिविरोधादिदमिति च पररूपनिरूपणादवश्यमेवान्यस्य ज्ञानाद् ग्राह्यत्वं बलादुपेयमनालम्बनज्ञानासम्भवादिति । (द्वयोरपि समानो निराकरणमार्ग इत्याह ?) स्वांशवदण्वादयोऽपि ग्राह्या न सम्भवन्तीत्युक्तमत आह — ग्राह्या इति । अयमभिप्रायः — यत्तावदणूनामग्राह्यत्वं तदस्माकमपि सिद्धमेवेति किं तन्निराकरणेन । समूहोऽपि वनादितुल्योऽनभ्युपगमनिराकृत एवेति । यस्तु समूहापरनामावयवी स यथा सत्यः, तथा वनोपन्यासावसरे प्रतिपादयिष्याम इत्याह — सत्य इति ॥ २६२ ½ ॥

इति बहिर्विषयप्रतिपादना-
न्न तदभावकृता मतिसंवृतिः ।
उभयतत्त्वविदां परमार्थतः
क्षममिदं धुरि धर्मविचारणे ॥ २६३३ ॥

एवं तावद् बाह्यसिद्धिरुक्ता । इदानीं यत्तन्माध्यमिकमते बाह्यज्ञेयाभावाद् ज्ञे(या ? यज्ञा)नाभावोऽपीत्युक्तं, तच्च बाह्यसिद्धिप्रतिपादनेन परिहृतमित्याह — इतीति । बाह्याभावकृता मतौ संवृतिकल्पना नास्तीत्यर्थः । य एव तु ज्ञानज्ञेयात्मकस्योभयस्य तत्त्वं परमार्थतो जानन्ति मीमांसकाः, तेषामेव चेदं धर्मविचारणे धुरि समर्थमित्याह — उभयेति । अयमभिप्रायः— धर्मो रथोऽस्यावयवो युगापरपर्यायो धूर्विचारः । तेन हि धर्मरथो घटितः, तद्वहनाय चेदं ज्ञानज्ञेयात्मकमुभयं तत्त्वतो ज्ञातं क्षमं भवति । संवृतिकल्पितं तु न धुरं वोढुं क्षममिति धर्मरथोऽवसीदेत् । नह्यसमर्थाभ्यां धुर्याभ्यां धूरुह्यते । नहि परमार्थतोऽसतोः संवित्संवेद्ययोः सामर्थ्यमस्ति । अतो यदुक्तं 'यदा संवृतिसत्येने'ति, दूषितं च 'संवृतेर्न तु सत्यत्वमि'ति तदेवात्रोपसंहृतमित्यनुसन्धातव्यमिति ॥ २६३३ ॥

इत्युपाध्यायसुचरितमिश्रकृतौ काशिकाटीकायां
शून्यवादः समाप्तः ॥

शुभं भूयात् ।

स्मृतग्रन्थाद्यनुक्रमणी ।

पृष्ठम्	वाक्यानि	ग्रन्थनाम	कर्तृनाम
३	'आचारश्चैव साधूनाम्'	स्मृतिः	...
६	'स्वर्गकामो यजेत'	श्रुतिः	...
११	'न निरालम्बनं ज्ञानं'	...	...
,,	'नियोगसिद्धौ सर्वं तदनुगुणम्'	...	...
२२	'न प्रत्यक्षविरुद्धकारणविषयमनुमानम्'	...	...
२५	'औदुम्बरो यूपो भवति'	श्रुतिः	...
,,	'सोऽरोदीद् यदरोदीत्'	,,	...
,,	'बर्हिर्देवसदनं दामि'	,,	...
२६	'अनुष्ठाने पदार्थानां'	..	...
२८	'हिरण्यमात्रेयाय ददाति'	श्रुतिः	...
,,	'अरुणया क्रीणाति'	,,	...
२९	'अध्वर्युर्गृहपतिं दीक्षयित्वा'	,,	...
,,	'अग्निहोत्रं जुहोति यवागूं पचति'	,,	...
,,	'समिधो यजति'	,,	...
३१	'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'	,,	...
,,	'मासमग्निहोत्रं जुहोति'	,,	...
३३	'द्वे सत्ये समुपाश्रित्य'	...	...
,,	...	...	अक्षपादः
७७	'नायं हेतुर्वैधर्म्यवचनत्वात्'	...	भिक्षुः
८१	'भेदप्रपञ्चविलयद्वारेण'	...	...
,,	'विद्यां चाविद्यां च'	श्रुतिः	...
,,	'स एष नेति नेति'	,,	...
,,	'अपशवोऽन्ये गोऽश्वेभ्यः'	,,	...
९६	'स किं वा बुद्धिजन्मापि'	...	...
,,	'अर्थात्मनश्च साधारणत्वात्'	...	...
,,	'तद् द्विविधं सम्यग्ज्ञानं'	...	...
९८	अविभक्तो हि बुद्ध्यात्मा'	...	...
१०१	'एकदेशेन सारूप्ये'	...	...

पृष्ठम्	वाक्यानि	ग्रन्थनाम	कर्तृनाम
१०१	'नान्योऽनुभाव्यो बुद्धयास्ति'	...	...
१०३	'विषयान्तरसञ्चारः'	...	...
१०७	'पूर्वं सङ्गृह्यते पश्चात्'	...	...
१०८	'अप्रत्यक्षोपलम्भस्य'	...	...
१०९	'भिन्नकालं कथं ग्राह्यं'	...	...
११७	'अन्यथैकस्य भावस्य'	...	...
१२७	...	...	कुमारस्वामी
१२८	'बुद्धीन्द्रियशरीरेभ्यः'	...	...
,,	'न त्वेवमात्मैवात्मानम्'	...	...
१२९	'एकमद्वितीयम्'	श्रुतिः	...
,,	'जानात्येवायं पुरुषः'	,,	...
,,	'नहि तदा ज्ञातुर्ज्ञेः'	,,	...
१३०	'प्रत्याहारादिकं योगम्—'	...	...
,,	'निजं यत्त्वात्मचैतन्यम्'	...	...
१५२	'अज्ञेयं कल्पितं कृत्वा'	...	बौद्धाः
१६१	'तदतद्रूपिणोभावाः'	...	...
१६८	...	...	भिक्षुः
१७७	...	...	पतञ्जलिः

खिलपूरणी ।

पृष्ठम्	पङ्क्तिः	खिलांशः	पूरितांशः
३	१२	अधर्म + स्तु	अधर्ममाहुः । आर्यास्तु
५	७	(ग्रहण + त्व?) नेन्द्रि	ग्रहणं तु प्रत्युत्पन्नेन्द्रि
,,	१३	नहि का + + क्तम्	नहि तत्र विषयो भिद्यत इत्युक्तम् ।
,,	१८	हि + + + वर्त	हि वयं वर्त
,,	२२	वि + + + का	विषयानेका
७	७	यो... र्धा	योग्ययागादिधा
,,	९	ष्ट . . च्यते	ष्टलाभे लभ्यते
,,	१५	य . . र्थम	यं योग्यं धात्वर्थम
,,	१७	निव . . . तमावा	निर्दिशते तदेष वा
८	४	न . . प्र	न प्र
,,	२०	ब्दा . . स्य	ब्दार्थस्य
,,	२१	व . . . पा	वं भजते लिङादिव्यापा
,,	२३	वृ . . . व	वृत्तेः कश्चासाव
,,	२६	चेत् . . . स	चेत् नैवमपि स
,,	२८	स . . . प्र	सर्वव्यापाराणां प्र
९	२	मेन प . . वि	मेऽनवस्थापातः वि
१०	१३	ष्टो . . मव्या	ष्टेपायोऽयं व्या
,,	१६	न्ति . . . अतः	न्ति प्रवर्तनाम् । अतः
,,	१८	क्तम् । हि . . त्य	क्तम् । एतदेवाभिप्रेत्य

LIST OF SANSKRIT PUBLICATI.. FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी Bhaktimanjari (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः Syanandurapuravarnana-prabandha (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampuran.	2	0	0

Trivandrum Sanskrit Series.

No. 1	**दैवम् Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*).	1	0	0
No. 2	**अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ Abhinavakaustubhamala and Dakshinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*).	0	2	0
No. 3	**नलाभ्युदयः Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*).	0	4	0
No. 4	**शिवलीलार्णवः Sivalilarnava** (Kāvya) by Nīlakaṇṭha Dīkṣita (*out of stock*).	2	0	0
No. 5	**व्यक्तिविवेकः Vyaktiviveka** (Alankāra) by Mahima-Bhaṭṭa with commentary (*out of stock*).	2	12	0
No. 6	**दुर्घटवृत्तिः Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*),	2	0	0
No. 7	**ब्रह्मतत्त्वप्रकाशिका Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*).	2	4	0
No. 8	**प्रद्युम्नाभ्युदयम् Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*).	1	0	0

	RS.	AS.	P.
७—**विरूपाक्षपञ्चाशिका Virupakshapanchasika** (Vedanta) by Virūpākṣanātha with the commentary of Vidyāçakravartin (*out of stock*).	0	8	0
No. 10—**मातङ्गलीला Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).	0	8	0
No. 11—**तपतीसंवरणम् Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	4	0
No. 12—**परमार्थसारम् Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).	0	8	0
No. 13—**सुभद्राधनञ्जयम् Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).	2	0	0
No. 14—**नीतिसारः Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).	3	8	0
No. 15—**स्वप्नवासवदत्तम् Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*)	1	8	0
No. 16—**प्रतिज्ञायौगन्धरायणम् Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 17—**पञ्चरात्रम् Pancharatra** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0
No. 18—**नारायणीयम् Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*out of stock*).	4	0	0
No. 19—**मानमेयोदयः Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).	1	4	0
No. 20—**अविमारकम् Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 21—**बालचरितम् Balacharita** (Nāṭaka) by Bhāsa (*out of stock*).	1	0	0

	RS.	AS.	
No. 22—**मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारो-रुभङ्गानि Madhyamavyayoga-Duta-vakya-Dutaghatotkacha-Karna-bhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—**नानार्थार्णवसंक्षेपः Nanartharnavasam-kshepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—**जानकीपरिणयः Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—**काणादसिद्धान्तचन्द्रिका Kanadasiddhanta-chandrika** (Nyāya) by Gangādhara-sūri (*out of stock*).	0	12	0
No. 26—**अभिषेकनाटकम् Abhishekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—**कुमारसम्भवः Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—**वैखानसधर्मप्रश्नः Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—**नानार्थार्णवसंक्षेपः Nanartharnavasam-kshepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—**वास्तुविद्या Vastuvidya** (Śilpa) (*out of stock*).	0	12	0
No. 31—**नानार्थार्णवसंक्षेपः Nanartharnavasam-kshepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—**कुमारसम्भवः Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*).	2	8	0

	RS.	AS.	P.
No. 33—**वाररुचसंग्रहः Vararuchasamgraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*).	0	8	0
No. 34—**मणिदर्पणः Manidarpana** (Nyāya) by Rājaçūḍāmaṇimakhin.	1	4	0
No. 35—**मणिसारः Manisara** (Nyāya) by Gopīnātha.	1	8	0
No. 36—**कुमारसम्भवः Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāsikā of Aruṇagirināṭha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas).	3	0	0
No. 37—**आशौचाष्टकम् Asauchashtaka** (Smṛti) by Vararuci with commentary.	0	4	0
No. 38—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the commentary Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa).	2	0	0
No. 39—**चारुदत्तम् Charudatta** (Nāṭaka) by Bhāsa (*out of stock*).	0	12	0
No. 40—**अलङ्कारसूत्रम् Alankarasutra** by Rājānaka Ruyyaka with the Alankārasarvasva of Mankhuka and its commentary by Samudrabandha (*second edition*).	2	8	0
No. 41—**अध्यात्मपटलम् Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Sankara-Bhagavat-Pāda (*out of stock*).	0	4	0
No. 42—**प्रतिमानाटकम् Pratimanataka** by Bhāsa (*out of stock*).	1	8	0
No. 43—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghaṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas).	2	8	0
No. 44—**तन्त्रशुद्धम् Tantrasuddha** by Bhaṭṭāraka Vedottama.	0	4	0

No. 45—**प्रपञ्चहृदयम् Prapanchahridaya.** 1 — —

No. 46—**परिभाषावृत्तिः Paribhashavritti** (Vyākaraṇa) by Nīlakaṇṭha Dīkṣita. 0 8 0

No. 47—**सिद्धान्तसिद्धाञ्जनम् Sidhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.) 1 12 0

No. 48—**सिद्धान्तसिद्धाञ्जनम् Do.** Do. (Part II). 2 0 0

No. 49—**गोलदीपिका Goladipika** (Jyotiṣa) by Parameśvara. 0 4 0

No. 50—**रसार्णवसुधाकरः Rasarnavasudhakara** (Alankâra) by Singa Bhūpāla. 3 0 0

No. 51—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghatīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas). 2 0 0

No. 52—**नामलिङ्गानुशासनम् Namalinganusasana** (Kośa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part IV, 3rd Kâṇḍa). 1 8 0

No. 53—**शाब्दनिर्णयः Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra. 0 12 0

No. 54—**स्फोटसिद्धिन्यायविचारः Sphotasiddhinyayavichara** (Vyâkaraṇa). 0 4 0

No. 55—**मत्तविलासप्रहसनम् Mattavilasaprahasana** (Nâtaka) by Mahendravikramavarman. 0 8 0

No. 56—**मनुष्यालयचन्द्रिका Manushyalayachandrika** (Silpa) (*out of stock*). 0 8 0

No. 57—**रघुवीरचरितम् Raghuviracharita** (Kâvya). 1 4 0

No. 58—**सिद्धान्तसिद्धाञ्जनम् Siddhantasiddhanjana** (Vedânta) by Kṛsnânanda Sarasvatî (Part III). 2 0 0

	RS.	AS.	P.
59—नागानन्दम् **Nagananda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinî of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुतिः **Laghustuti** by Laghubhattâraka with the commentary of Râghavânanda.	0	8	0
No. 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣnânanda Sarasvatī (Part IV).	1	4	0
No. 62—सर्वमतसंग्रहः **Sarvamatasamgraha.**	0	8	0
No 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhāravi with the commentary Sabdârthadîpikā of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः **Meghasandesa** by Kâlidāsa with the commentary Pradīpa of Dakṣiṇâvartanātha.	0	12	0
No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चयः **Tantrasamuchchaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śankara (Part I, 1–6 Patalas) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाशः **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadîpikâ of Śrī Kumāra	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Isânaśivagurudevamiśra (Part I, Sâmānyapâda)	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part I).	2	8	0
No. 71—तन्त्रसमुच्चयः **Tantrasamuchchaya**(Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara(Part II, 7—12 Patalas) (*out of stock*).	3	8	0

No. 72—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Iśānaśivagurudevamiśra (Part II, Mantrapāda).	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः **Isvarapratipattiprakasa** (Vedānta) by Madhusūdanasarasvatī.	0	4	0
No. 74—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya. (Part I — Âcâra and Vyavahâra Adhyâyas).	3	4	0
No. 75—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumâra (Part I).	2	12	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part II).	3	0	0
No. 77—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Iśānasivagurudevamiśra (Part III, Kriyāpāda 1—30 Patalas).	3	0	0
No. 78—आश्वलायनगृह्यसूत्रम् **Asvalayanagrhyasutra** with the commentary Anāvilā of Haradattācārya.	2	6	0
No. 79—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Ganapati Śāstri (Part I—1 & 2 Adhikaraṇas).	3	12	0
No. 80—अर्थशास्त्रम् **Do.** Do. (Part II—3—7 Adhikaranas).	4	0	0
No. 81—याज्ञवल्क्यस्मृतिः **Yajnavalkyasmrti** with the commentary Bâlakrīḍa of Viśvarūpācārya (Part II. Prâyascittâdhyâya).	2	0	0
No. 82—अर्थशास्त्रम् **Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Ganapati Sastri (Part III, 8—15 Adhikaraṇas).	3	4	0
No. 83—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part IV, Kriyāpāda 31–64 Patalas and Yogapāda).	3	8	0

	RS.	AS.	P.
No. 84—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimula-kalpa** (Part III).	2	0	0
No. 85—विष्णुसंहिता **Visnusamhita** (Tantra).	2	8	0
No. 86—भरतचरितम् **Bharatacarita** (Kâvya). by Kṛṣṇakavi.	1	8	0
No. 87—सङ्गीतसमयसारः **Sangitasamayasara** (Sangīta) of Sangītâkara Pârśva-deva.	1	2	0
No. 88—काव्यप्रकाशः **Kavyaprakasa** (Alankâra) of Mammaṭabhaṭṭa with two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhityacûdâmaṇi of Bhaṭṭagopâla (Part I, 1–5 Ullâsas).	3	0	0
No. 89—स्फोटसिद्धिः **Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra.	0	8	0
No. 90—मीमांसाश्लोकवार्त्तिकम् **Mimamsasloka-vartika** with the commentary Kāśikā of Sucaritamiśra (Part I).	2	8	0
No. 91—होराशास्त्रम् **Horasastra** of Varāhamihirācārya with the Vivaraṇa of Rudra.	3	0	0
No. 92—रसोपनिषत् **Rasopanishat.**	2	0	0
No. 93—वेदान्तपरिभाषा **Vedantaparibhasha** (Vedânta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita.	1	8	0
No. 94—बृहद्देशी **Brihaddesi** (Sangita) of Matangamuni.	1	8	0
No. 95—रणदीपिका **Ranadipika** (Jyotiṣa) of Kumaraganaka.	0	4	0
No. 96—ऋक्संहिता **Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka).	1	8	0

No. 97—**नारदीयमनुसंहिता Naradiyamanusamhita** (Smṛti) with Bhāsya of Bhavasvāmin. 2 0 0

No. 98—**शिल्परत्नम् Silparatna** (Silpa) by Śrīkumāra. 2 8 0

No. 99—**मीमांसाश्लोकवार्त्तिकम् Mimamsasloka-vartika** (Mīmāmsa) with the commentary Kāśikā of Sucaritamiśra (Part II). 3 0 0

Apply to:—

The Curator
for the publication of Sanskrit Manuscripts,
Trivandrum.